PATANJALI MAHAVASHAYAS
BY
MADHAV SHASTRI BANDAVE

श्रीः

पातञ्जलमहाभाष्यस्य
(आद्यमाह्निकद्वयम्)

लवपुरीयप्राच्यमहाविद्यालयप्रधानाध्यापकेन
वेदान्त-व्याकरणाचार्य-साहित्य-मीमांसातीर्थेन
श्रीयुतेन भाण्डार्युपाह्वेन माधवशास्त्रिणा

ए. सी. वुल्नर एस्क्वायर एम.ए.सी.आई.ई.
वाइसचैन्सलर पञ्जाब यूनिवर्सिटी
महोदयानामधिष्ठातृतायां
निर्मितया स्फोटविमर्शिन्याख्यया
व्याख्यया सहितम्।

श्रीमाधवशास्त्रि भाण्डारिणैव
संशोधितं प्रकाशितञ्च।

प्रथमावृत्तिः] सन् १९२९ [मूल्यम् १।-)

3-0-0
3-0-0
2-8-0
5-0-0
3-0-0
2-0-0
4-0-0
4-0-0
3-0-0
29-8-0

30-0-0

90.0
180
105
365

भाष्यस्थ-विषय-सूची

पस्पशाह्निके

टीकास्थ-विषय-सूची

किञ्चित्प्रास्ताविकम् ।

अथ कदाचिन्नित्यमुक्तौ जगतो मातापितरौ पार्वतीपरमेश्वरौ कैलासशिखरमधितिष्ठन्तौ लीलाविलासेन परमां मुदमुपयेतुः । तत्र च संतोषातिरेकान्महेश्वरेण किं ते प्रियं करवाणीति सानुनयमनुरञ्जिता पार्वती केनाप्यश्रुतपूर्वा काचनाश्चर्यकारिणी कथा श्रावणीयेति प्रार्थयांबभूव । तत्कथनसमये च कस्याप्यन्तः प्रवेशो माभूदिति नन्दिकेश्वरो द्वारि नियोजितः । अत्रान्तरे महेश्वरस्य परमभक्तः प्रीतिभाजनं च स्वगणीयः पुष्पदन्तनामाऽन्तः प्रवेशं प्रार्थयमानो नन्दिकेश्वरेण निषिद्धो योगाभ्यासबलेन भृङ्गरूपमास्थायाऽन्तः प्रविश्य चन्द्रमौलिना प्रोक्तमद्भुतं विद्याधरचरितं निशम्य स्वभार्यायै जयानाम्न्यै सर्वं यथावत्कथयां बभूव । प्रसङ्गविशेषे च पार्वत्या तच्चरिते सखीजनसङ्घे वर्ण्यमाने जया तच्चरितं परिचिनोतीत्यालोच्य नापूर्वं चरितं महेश्वरेण श्रावितमिति क्रूद्धा महेश्वरमध्यक्षिपत् । महेश्वरोऽपि योगबलेन पुष्पदन्तेन सर्वमिदं गुह्यं प्रकाशितमित्यालोच्य तस्मै पुष्पदन्ताय तत्पक्षपातिने माल्यवन्नाम्ने च मर्त्ययोनिं प्राप्नुतमिति शशाप । जयया प्रार्थ्यमानश्च भगवान् 'कुबेरशापात्पिशाचतां प्राप्तः सुप्रतीकनामा महेश्वरानुचरो विन्ध्याटवीमटन् काणभूतिनाम्ना प्रसिद्धो यदा पुष्पदन्तमुखान्मयोक्तं विद्याधरचरितं श्रोष्यति, तदा पुष्पदन्तस्य शापावसान'मित्यन्वगृह्णात् ।

ततः स पुष्पदन्तो कौशाम्बीनगर्यां प्रयागसमीपे यमुनातीरे (कोसम) इति ख्यातायां सोमदत्तद्विजन्मनो वसुदत्तायां पुत्रत्वं प्राप्तो वररुचिनाम्नाऽवर्धत । तत्र च वररुचे बाल्यावस्थायां पितृवियुक्तस्यैकदा व्याडीन्द्रदत्तनामानौ वीतसीनगरवास्तव्यौ महातापसावुपस्थितौ सुकृद्ग्राहिणं वररुचिमालोक्य तन्मातरमूचतुः—नन्दराजस्य पाटलिपुत्रराजधान्यां श्रीशङ्करस्वामितनयौ वर्षोपवर्षनामानावासाते । तत्र ज्येष्ठो वर्षो दरिद्रो मूर्खोऽपि च श्री

स्वामिकार्तिकसमाराधनेन संप्राप्तनिखिलविद्यो सकृद्ग्राहिणं कंचन शिष्यं ताः निखिलविद्याः प्रपाद्य कृतार्थी बुभूषति. इति । ततस्तां वररुचिमातरं वसुदत्तां धनादिना सन्तोष्य तौ व्याडीन्द्रदत्तौ तं वररुचिं कात्यायनगोत्र-नामानं भ्रातृभावेनोपनीय श्रीवर्षाचार्यसमीपे निन्यतुः । तत :श्रीवर्षा-चार्यो महानन्दमनुभवँ स्त्रीनपि तान् साङ्गान् वेदानपाठयत् । तदा च

सकृच्छ्रुतं वररुचिः व्याडिश्च द्विःश्रुतं वचः ।

त्रिःश्रुतं चेन्द्रदत्तश्च जग्राह गुरुणोदितम् ।

ततः प्रभृति नन्दमहाराजेनाऽन्यैश्च संमन्यमानो वर्षाचार्यः परां प्रतिष्ठां लेभे । नानादिगन्तेभ्यो महनीयां कीर्तिं श्रुत्वा वर्षाचार्यसमीपेऽनेके च्छात्रा आजग्मुः । तेषु च पेशावरप्रान्ते लाहूरनाम्नाऽद्यत्वे ख्याते सलातूर इति प्राक्प्रसिद्धे नगरे उत्पन्नो दाक्षीपुत्रः पाणिनिरपि मन्दबुद्धिरागमत् । सच शिष्यान्तर- कृतोपहासेन सावमानो विद्याकामः प्रयागक्षेत्रेऽक्षय्यवटे तीव्र-तरतपस्यया महेश्वरं प्रसाद्य तत्कृपया दिव्यं व्याकरणं प्रणिनाय । ततो दिव्यज्ञानसंपन्नः पाणिनिः प्रत्यावृत्य वररुचिना सह दिनसप्तकं यावद् वादं विधाय तं विजितवान् । स्वीयं व्याकरणं च प्रचारयामास । ततः प्राक् प्रचलितमैन्द्रं व्याकरणं लुप्तप्रायतामयासीत्। ततः श्रीस्वामिकार्तिकप्रसादेन पाणिनीयव्याकरणरहस्यं स्वयं बुद्ध्वा वर्षाचार्यो व्याडीन्द्रदत्तावपि तद् ग्राहयामास। अपमानितो वररुचिश्च महेश्वरं समाराध्य प्रत्यावृत्य पाणिनीयं शास्त्रं सहस्रशो वार्तिकानि निर्मायोक्तानुक्तदुरुक्तप्रख्यापनेन विशीर्णतां प्रापयत् । अन्यांश्च महेश्वरश्रावितबृहत्कथासम्बन्धिनो ग्रन्थान्निर्माय नन्द-राजस्य साचिव्यमन्वतिष्ठत्। व्याडिश्च पाणिनीये लक्षसंख्यश्लोकात्मकं संग्रह-ग्रन्थं निरमात्। व्याडीन्द्रदत्तौ च स्वगुरवे वर्षाचार्याय प्रतिज्ञातां हेममुद्रा-कोटिदक्षिणां संपादयितुं नन्दराजस्य गृहे गतवन्तौ। इन्द्रदत्तश्च योगबलेन राजशरीरं प्रविश्य तेन दक्षिणां तावतीं व्याडये प्रदाप्य गुरुगृहं व्याडिना सहायासीत् । पाणिनिश्च वररुचिना कात्यायनेन कृतं स्वव्याकरणखण्ड-नात्मकं वाक्यग्रन्थमसहमानो वररुचिं 'त्वमचिरात्पतिष्यसि' इति शशाप । वररुचिरपि महेश्वरप्रसादेन मयेदं विहितं तत्र ते शापदानमनुचितं,

निष्कारणशापप्रदानेन च त्वमपि हिंस्रेण व्यापादितो भविष्यसीति तथैव पाणिनि मशप्यत् । ततश्चारण्ये तस्यामेव त्रयोदश्यां पाणिनिःसिंहेन व्यापादितः कैलासं जगाम । तदुक्तं विष्णुशर्मणा पञ्चतन्त्रे मित्रप्राप्त्याम्–

हिंस्रो व्याकरणस्य कर्तुरहरत्प्राणान् प्रियान् पाणिने
मींमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम् ।
च्छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलं ।
ह्यज्ञानावृतचेतसा मतिरुषां कोऽर्थ स्तिरश्चां गुणैः ॥१॥ इति ।

ततश्च त्रयोदश्यां व्याकरणानध्यायपरिपाठः ।

वररुचिरपि साचिव्याद्विरक्तो निजशापावसानमनुसंदधानः कुबेरशापात् पिशाचतामापन्नस्य काणभूतेः (सुप्रतीकस्य) निकटे व्रजन् दिव्याः कथाः श्रावयित्वा शापनिर्मुक्तः पूर्ववत् पुष्पवन्तरूपेण कैलासे व्यलासीत् । काणभूतिरपि वररुचि—(पुष्पदन्त) पक्षपातित्वान्महेश्वरेण शप्ताय माल्यवते गुणाढ्यनाम्ना भुवि महिताय पुष्पदन्तोदिता बृहत्कथाः श्रावयामास । गुणाढ्येन कविना च बृहत्कथाऽनुवादः कृतः प्रसिद्ध एव । तदनुवादेन च गुणाढ्यो (माल्यवान) पि शापनिर्मुक्तो बभूव ।

(इत्येवं हरचरितचिन्तामणिग्रन्थस्थशब्दशास्त्रावतारनामकसप्तविंशप्रकाशानुवादो यथावदुपन्यस्तः)

तच्चेदं पाणिनीयंव्याकरणं परम्परयाऽनादिभूतमेव तथाहि–

ऐन्द्रं, चान्द्रं, काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं, चापिशलं, शाकलं पाणिनीयकम् ।१।

इत्युक्तानां नवानां व्याकरणानां वाल्मीकिरामायणे हनूमद्वर्णने 'सोऽयं नवव्याकरणार्थवेत्ता,इत्यनेन हनूमतो नवविधव्याकरणज्ञानवत्त्वस्य च वर्णनेन हनूमतः श्रीरामचन्द्रस्य च समये पाणिन्यादेरनुत्पत्या पूर्वपूर्वकल्पीयनवविधव्याकरणसत्वं तन्मूलकत्वं चोत्तरोत्तरकल्पीयव्याकरणस्य सिद्धयति । अतएव (शताच्च ठन्यतावशते) इति सूत्रे कैयटे शाकल काशकृत्स्नव्याकरणस्थं (शताच्च ठन्यतावग्रन्थे इति सूत्रमुपन्यस्य तन्मते शत्यः शतिको वा गोसङ्घः इति साधु । पाणिनिमते तु शतको गोसंघः इत्येव साध्विति व्याकरणस्थ-

तीनां परस्परविरोधमाशङ्क्य नियतकालाश्च स्मृतयो व्यवस्था हेतवो भवन्ति मुनित्रयमतेनाद्यत्वे साध्वसाधुप्राविभागः, इत्युक्तं स्मृतिरूपत्वं संगच्छते। स्मृतीनां श्रुतिमूलकत्वात् श्रुतीनां चानादिपरम्परासिद्धत्वात्। तथा लौकिक-वैदिकोभयविधशब्दविषयकत्वाच्चास्य वेदाङ्गत्वं सर्वसंमतमेव। पाणिन्यादेरनन्तरं च व्याघ्रभूति-श्वोभूतिभ्यां क्रमेण पाणिनिकात्यायनशिष्याभ्या मिदं व्याकरणं बहुतरप्रचारतामानायि।

एकदा च श्रीशेषशायिनो वैकुण्ठनाथस्य समाधौ महेश्वरीयलीलाताण्डवदर्शनामन्दानन्दतुन्दिलितशरीरस्य गौरवमसहमानः शेषनागः समाध्युत्थानानन्तरं भगवन्त माकस्मिकशरीरगौरवकारण मन्वयुङ्क्त। भगवाँश्च प्रसन्नो महेश्वरलीलाताण्डवदर्शनजन्यानन्दतुन्दिलतया वपुषो गौरवं संजातमित्युक्त्वा, भगवान् महेश्वरो मन्मुखेन 'पाणिनीयव्याकरणस्य व्याख्यानं सारवत्तरं कुरु' इति त्वामादिशतीति शेषनागं निरदिक्षत्। ततः श्रीशेषनागोऽपि महेश्वराज्ञां प्रसादं मन्यमानो जनतासौभाग्यवशाद्गोनर्ददेशे (कश्मीरान्तर्गते) प्रादुरासीत्। तत्र च कस्यचिन्महर्षेः सन्ध्याकरणसमये महानद्यां प्रवहन् अर्घ्यप्रदानाञ्जलौ पुनः पुनरागच्छन् महर्षिणा भयेन 'कोभवान्' इति पृष्टे सर्पोऽहमित्युत्तरयामास। रेफः क्व गत इति पृष्टे त्वयाऽपहृत इत्युदतरत्। ततश्च कोप्येष वैयाकरणमूर्तिरिति अञ्जलेः पतित इति पतञ्जलिरिति च जनैः प्रख्यापितोऽभूत्। तदात्वे च पाणिनीयव्याकरणं पिपठिषुभिः परःसहस्रैश्छात्रैः संप्रार्थ्यमानः पतञ्जलिः जवनिकाऽन्तर्हितोऽहं युष्मानध्यापयामि। अन्तर्हितश्चाहं यदि येन केनचनावलोकिष्ये स दुःस्थितिं प्राप्स्यतीति समकेतयत्। तथाऽङ्गीकृते चच्छात्रैः प्रारभत पाठयितुम्। प्रतिदिनं च यावत्पाठितं तदेकमाह्निकमिति प्रासिध्यत्। एवं क्रमेण द्वात्रिंशद्दिनानि यावद् द्वात्रिंशत्संख्याकेष्वाह्निकेषु पाठितेषु त्रयस्त्रिंशे दिने 'कृतदिङ्' इति सूत्रव्याख्यानश्रवणानन्तरं 'कथं परः सहस्रेष्वस्मासु सत्सु प्रतिच्छात्रमयं सशङ्कासमाधानं बहुभिराननैर्युगपत्पाठयति, कति सन्त्यस्य मुखानि, आश्चर्यमयमस्येदं स्वरूपं साक्षात्करणीय'मिति निश्चित्य तिरस्करिणीमपसारयामासुश्छात्राः। दृष्टवन्तश्च

सहस्रफणामणिमण्डलमण्डितं करालदंष्ट्रं वदनम् । तावतैव च तदीयविषमविषमयश्वासफूत्कारैर्भस्मावशेषतां प्राप्नुवन् । तैर्यावच्छ्रुतं तदेव च 'वाग्रूपान्तं भाष्य'मिति प्रसिद्धिः । अपरश्च कश्चिच्छात्रः कार्यवशाद्बहिर्गतः प्रत्यावृत्तः क्रुद्धेन धृतमनुष्यमूर्तिना पतञ्जलिना दृष्टः 'पाठान्ते मङ्गलमकृत्वैव त्वं बहिर्गतस्तेनापराधेन 'राक्षसीं योनिमाप्नुही'ति शप्तः पुनः पुनः निजशापावसानं प्रार्थयमानो 'त्वत्सकाशमागच्छन् पण्डितः पचेर्निष्ठान्तस्य रूपं प्रष्टव्यः, यश्च पक्व इत्युत्तरयेत् स मत्पद्धत्यनुसारेण महाभाष्यं पाठनीयः । स एव च ते शापावसानकाल इत्यन्वगृह्णात् । अवशिष्टं च संपूर्णं महाभाष्यं तस्मै अपरेभ्यश्च च्छात्रेभ्यो द्विपञ्चाशताह्निकैः प्रपाठ्य योगबलेनान्तरधात् ।

स च रक्षोयोनिमनुभवन् पतञ्जलिशिष्यः पथिकान् क्रान्तपचे रूपं पृच्छन् पक्वमित्युत्तरयतो व्यापादयन् बहुतिथे काले गते चन्द्रगुप्तो नाम द्विजः तेन पथा गच्छन् रक्षः-प्रश्नस्य पक्वमित्युत्तरमवदत् । तेन तुष्टो राक्षसस्तं महाभाष्यमध्याप्य शापादमुच्यत ।

चन्द्रगुप्तोऽपि यथाधीतं पञ्चाशीत्याह्निकात्मकं भाष्यं यथावद्वटपत्रेषु संलिख्य सहादायोज्जयिनीं प्रतस्थे । मार्गे च क्वचिद्विश्रम्य स्वापं गते तस्मिन् कानिचन लिखितभाष्याणि वटपत्राणि कश्चिदजोऽशतश्चवर्यां बभूव । तेन च जागरितः खिन्नमनाश्चन्द्रगुप्त उज्जयिनीं प्राप्य स्वाधीतस्मृत्यनुसारेण खण्डितभाष्यभागं समीचकार । यत्र तु असौकर्यमासीत्तत्र ग्रन्थपातसूचिकां कुण्डलनां (०) समकल्पयत् । तदुक्तम्—श्रीहर्षेण फणिभाषितभाष्यफक्किका विषमा कुण्डलनामवापिता (२–९६) इति । तस्यैव च चन्द्रगुप्तस्य विदुषः पुत्रेण महामान्येन भर्तृहरिणा भाष्यव्याख्यानात्मकमतिविस्तृतं वाक्यपदीयं विरचितम् । यस्याद्यावधि अल्पीयानेव भाग उपलब्धो मुद्रितश्च (इत्येवमैतिह्यंवर्णितम्) ।

(अथैषां पाणिनि-कात्यायनपतञ्जलीनां समयविषये किंचित् प्रस्तूयते)

तत्र पाणिनिः कात्यायनश्च नन्दराज्यसमये पाटलिपुत्रनगरे अभूताम्

इत्युक्तम् । तदर्थं नन्दराज्यसमयो निर्णीयते—

शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले ।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः ॥१।५१।

इति राजतरङ्गिण्युक्त्यनुसारेण कलेरारम्भात् ६५३ मितेषु वर्षेषु अतीतेषु कौरवपाण्डवा अभूवन्निति सिध्यति * । कौरवपाण्डवानां महा-युद्धानन्तरं परीक्षितो जन्म इति सुप्रसिद्धमेव, परीक्षितो जन्मानन्तरं १५०० मित वर्षानन्तरं नन्दराज्यकालः । तथा च–विष्णुपुराणम्–

यावत्परीक्षितो जन्म यावन्नन्दाभिषेचनम् ।
एतद्वर्षसहस्रं तु ज्ञेयं पञ्चशतोत्तरम् ॥४।२४।१०४।

एवं च २१५३ मितेषु कलेरारम्भात् वर्षेषु गतेषु नन्दराज्यकालः इति सिद्धम् । अद्यत्वे च ५०३० मिताः कलेर्गताब्दाः तथा च अद्यतनात् कलिगताब्दाद् २८७७ मितवर्षेभ्यः प्राक् काले, एवमीशवीयसंवत्सरा-रम्भात् प्राक् ६४८ मितवर्षसमये पाणिनिकात्यायनव्याड़ि प्रभृतीनां तद्गुरोश्च श्रीमद् वर्षाचार्यस्य स्थितिकाल इति सिद्ध्यति ।

श्रीमतः पतञ्जलेः समयश्च महाभाष्ये "सभा राजाऽमनुष्यपूर्वा" इत्यादौ सूत्रे चन्द्रगुप्तसभा, पुष्पमित्रसभा, पुष्पमित्रो यजते इत्याद्युदा-हरणात् पुष्पमित्रसमयानन्तरं सम्भवतीति सिद्ध्यति । पुष्पमित्रसमयश्च २३६० मितेषु कलिवर्षेषु गतेषु आसीत्— तथा च विष्णुपुराणम्—

महापद्मः (नाम्ना नन्दः) पुत्राश्च एकं वर्षशतमवनीपतयो भविष्यन्ति । ४ । २४ । २५

तेषामभावे मौर्याः पृथ्वीं भोक्ष्यन्ति, वि. पु. ४ । २४ । २७

एवमेते मौर्याः दश भूपतयो भविष्यन्ति, अब्दशतं सप्तत्रिंशदुत्तरम् वि. पु. ४ । २४ । ३२ ।

---

*—राजतरङ्गिणीश्लोकस्थं सार्धपदं षट्–पदस्य विशेषणमित्याश्रित्य सार्धानि षट् शतानीत्यस्य ६५० सार्धनव शतानीत्यर्थं कृत्वा ९५३ मितेषु कलिगताब्देषु पाण्डवस्थितिं केचिन्नव्या वर्णयन्ति । तन्न सम्यक्, लोके सार्धाः षट् इत्युक्ते नवत्वसंख्या बोधस्याऽसंभवात् ।

तेषामन्त्ये पृथ्वीं दश शुङ्गाः भोच्यन्ति । ४ । २४ । ३३

पुष्पमित्रः सेनापतिः स्वामिनं (बृहद्रथनामानं)हत्वा राज्यं करिष्यति, तस्यात्मजोऽग्निमित्र इत्यादि । वि० पु० ४–२४–३३

तथा च कलेः ६५३ मितवर्षानन्तरं पाण्डवकालः+१५०० नन्दकालः +१०० मौर्यकालः+१३७ शुङ्गकालः, संकलनया+२३६० कलिगतादेषु पुष्पमित्रकाल इति सिद्धयति । तदनुरोधेन ईशवीयसंवत्सरारम्भात् प्राक् अष्टमशताब्द्यां (७११ मिताब्देभ्यः प्राक्) भाष्यकृतः समयः इति सिद्धम् । अयं च पतञ्जलिः योगसूत्रकृतः चरकादिप्रणेतुश्च पतञ्जलेरन्य इति केचित् । स एवायमिति प्रामाणिकाः । अस्मिंश्च महाभाष्ये श्रीमद् भर्तृहरेः वाक्यपदीयं, श्रीमत् कैयटस्य च सारवत्तरं व्याख्यानं विद्यमानमपि अतिगहनतया आधुनिकानां व्युत्पित्सूनां अल्पपरिश्रमाणां न तादृशमुपकरोति इत्यालोच्यानेकेषां महनीयानामपेक्षानुरोधात् वाक्यपदीयकैयटप्रदीपाद्यनुसारेण आवश्यककठिनतरविषयाणां सौकर्यसम्पादनाय यावच्छक्यं सरला मर्मोद्घाटिनी च नातिविस्तृता व्याख्या महाभाष्यस्यादित आन्हिकद्वये मया विरचय्य मुद्रापिता । आशासे नवान्हिकपर्यन्तमेवं सरला व्याख्या निर्मास्यसे इति । अत्र च व्याख्यायां प्रायशः स्फोटावश्यकत्वं, वर्ण-पद-वाक्य स्फोटस्वरूपं, प्रत्येकं वर्णानां वाचकत्वावाचकत्वे, अपभ्रंशेषु शक्तिसत्वासत्वे, वर्णसमाम्नाये जाति-व्यक्तिपक्षनिर्देशे वैलक्षण्यं, चतुर्दशसूत्र्या अद्वैतब्रह्म प्रतिपादकत्वेन अपवर्गसाधनत्वादिकं च विस्तरशो विवेचितं वर्तते । व्याख्यायां च स्पष्टत्वार्थं क्वचित् सन्धयोऽपि न कृताः, तत्र चावसानसन्धिकार्ये विसर्गचर्त्वादौ पदसंस्कारपक्षे प्रवृत्तस्य चर्त्वस्य विसर्गस्य वा "जातः संस्कारो न निवर्तते" इति न्यायात् निवर्तनासम्भवात् अग्रे पदान्तरानयनेऽपि क्वचित्तथैवावस्थापनं न्यायासिद्धं भवति । अकृतव्यूहपरिभाषा.निमित्तापायपरिभाषयोरसत्वाऽनित्यत्वे बहुसंमते एव । अत एव–'हरिः ओं'' इत्यादिकं संगच्छते । क्वचित्तु वाक्यसंस्कारपक्षमादाय मध्ये अवसानासम्भवाद् विसर्गचर्त्वादिकं नैव प्रवृत्तम् इति कृत्वा यथोचितसन्धिघटिता अपि प्रयोगाःशास्त्रसिद्धा एव । एवंच—

न चात्रातीव कर्तव्यं दोषदृष्टिपरं मनः ।
दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते ॥

इति भट्टकुमारिलोक्तिमनुसन्धाप्य विद्वद्वरेण्याः स्वभावतो गुणैकपक्षपातिनो यथासम्भवमितो गुणग्रहणार्थं सम्प्रार्थ्यन्ते । त्वरादिवशाद् अवशिष्टं त्रुट्यादिकं च क्षमापयितुमनुरुद्ध्यन्ते । इति

अत्रच लवपुरीय-सुप्रसिद्ध-विद्वद्वर-डाक्टर-लक्ष्मणसरूपमहोदयानां प्रोत्साहनादिकमेव व्याख्यानिर्माणे प्रधानकारणमिति तेषामधमर्णो-

संवत् १९८६
ज्येष्टवदि नवम्यां शनौ
ता० १—६—२९

विदुषा मनुचरो—
भाण्डार्युपाह्वो माधवशास्त्री

* श्रीः *

पतञ्जलिमुनिविरचितं

पाणिनीयव्याकरणमहाभाष्यम् ।

(शास्त्रारम्भप्रतिज्ञाभाष्यम्)–**अथ शब्दानुशासनम् ।**

अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते ।—

शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ।

श्रीमत्करीन्द्रवदनः प्रत्यूहचयखण्डनः ।

नः पायादेकरदनः श्रीगौरीप्रियनन्दनः ॥

अथेदं संक्षिप्तं पातञ्जलमहाभाष्यस्य व्याख्यानं बालव्युत्पित्सुबोधाय प्रारभ्यते । अत्र भाष्ये इतरभाष्यापेक्षया वार्तिककृदुक्तोक्ताऽनुक्तदुरुक्तचिन्ताराहित्यात्, स्वकीयेष्ट्यादिकथनेनाऽन्वाख्यातृत्वधर्मसत्वाच्च महत्वं बोध्यम् । तत्र "**वृद्धिरादैच्**" इत्यादौ पाणिन्यारब्धभागे मङ्गलार्थवृद्धिशब्दस्येव "**सिद्धे शब्दार्थसम्बन्धे**" इत्यादि कात्यायनारब्धभागे सिद्धशब्दस्येव भाष्यकृता ऽऽ(पतञ्जलिनाऽऽ) रब्धे, **अथशब्दानुशासन**मित्यादिभागे—

ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।

कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

इति स्मृत्या, अथशब्दस्यान्यार्थं नीयमानदध्यादिवत् मङ्गलफलकत्वबोधनात् "अथ" शब्दस्य पूर्वं प्रयोगः—**अथ शब्दानुशासनमिति।**

"**स्वपदानि च वर्ण्यन्ते**" इति विष्णुधर्मोत्तरपुराणोक्तभाष्यलक्षणसिद्धत्वात् स्ववाक्योपात्तपदानामर्थः स्वयं भाष्यकृता प्रदर्श्यते —"**अथेत्ययं शब्दोऽधिकारार्थ**" इति । अयमित्युक्त्या "**अथातो ब्रह्मजिज्ञासा**" इत्यादौ अथ शब्दस्यानन्तर्यार्थकत्वेऽपि न दोषः । फलितमाह—"**शब्दानुशासनं नाम शास्त्र** (व्याख्यातव्यत्वेन) **मधिकृतं वेदितव्य**मिति । शब्दानुशासनमिति व्याकरणस्याऽन्वर्थकं नामेत्यर्थः । शिष्टानां शासनमनुशासनमितिव्युत्पत्त्याऽनादि-

(अनुशासनीयशब्दनिर्णयाधिकरणम्)

(जिज्ञासा)— **केषां शब्दानाम् ?।**

(समाधानभा०)-**लौकिकानां वैदिकानां च। तत्र लौकिकास्तावत् गौः, अश्वः, पुरुषः, हस्ती, शकुनिः, मृगः, ब्राह्मण इति। वैदिकाः खल्वपि* शन्नो देवी रभिष्टये—इषे त्वोर्जे त्वा। अग्निमीळे पुरोहितम्। अग्न आयाहि वीतय इति।**

सिद्धानां साधूनामसाधुभ्यो विविच्य पृथक्कथनरूपो ऽनुवादो व्याकरणेन क्रियते, नतु नूतनाःशब्दा निर्मीयन्ते इति ध्वन्यते। तथा च श्रुतिः— **वाग् वै पराची अव्याकृताऽवदत् ते देवा इन्द्रमब्रुवन् नो इमां वाचं व्याकुर्विति, सोऽब्रवीत् वरं वृणै मह्यञ्चैवैष वायवे च सह गृह्यातामिति, तस्मादैन्द्रवायवः सह गृह्यते—तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् सैषा-व्याकृता वागुद्यत** इति।

शब्दानुशासनमिति व्याकरणस्यापरपर्य्यायवर्णनेन साधुत्वबोधनरूपं व्याकरणस्य साक्षात् प्रयोजनं सकलाधिकारिप्रवृत्तये भाष्यकृता उक्तम्। वार्तिक-कारस्तु **लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम** इत्यादिना विशिष्टा-धिकारिणां कृते प्रयोजनं वक्ष्यति। भाष्योक्तानि **रक्षो**हेत्यादीनि तु प्रयोजन-प्रयोजनानीत्यर्थः।

शब्दानुशासनमित्युक्त्या च साधुशब्दानामनुशासनमित्यर्थलाभात् ध्वनीनामपभ्रंशानाञ्चाविषयत्वं सूचितम्।

ननु लौकिकशब्दमात्रविषयकं शाकटायनादिशास्त्रं व्याख्यातव्यत्वेनाधि-कृतमथवा वैदिकशब्दमात्रविषयकं प्रातिशाख्यादिकम्, इति शङ्कानिरासायाह **केषां शब्दानामिति। लौकिकानां वैदिकानाञ्चे**त्युत्तरम्, एतेन पाणिनीयव्या-करणस्य शाकटायनप्रातिशाख्याद्यपेक्षया व्यापकविषयत्वेनाभ्यर्हितत्वं वेदाङ्गत्वञ्च सूचितम्। अत्र लौकिकशब्देन प्रयोज्यप्रयोजकवृद्धव्यवहारावगम्यशक्तिकाः शब्दा गृह्यन्ते। वैदिकशब्देन चानुपूर्वीविशेषावच्छिन्नमन्त्रादिघटकाः स्वरविशेष-विशिष्टा गृह्यन्ते। तथा च दर्शयति—**"तत्र लौकिकास्तावत् गौरश्वः"** इत्यादि। **वैदिकाः—"शन्नो देवी रभिष्टय"** इत्यादि*।

---

* क्रमेणाथर्वयजुर्ऋक्साम वेदानां प्रारम्भमन्त्रा उदाहृताः।

(जिज्ञासाभा०) **अथ गौरित्यत्र कः शब्दः ?।**

किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं। स शब्दः ?।

अथ वाक्यार्थज्ञाने पदपदार्थज्ञानं कारणं, तथा च यावत् पर्यन्तं शब्द-अनुशासन-इत्यादिपदानां पृथक् पृथक् पदार्थबोधो न भवति तावत् वाक्यार्थज्ञानस्यासंभव इत्याशयेनाह **"अथ गौरित्यत्र कः शब्दः"** इति। अथ इत्यस्य पृच्छ्यते इति शेषः । ननु प्रयोज्यप्रयोजकवृद्धव्यवहारे शब्द-पदस्य वाचके शक्तिमिति रूढ़त्वात् असंदिग्धत्वेन को जिज्ञासावसरः ? इति चेदुच्यते । शब्दार्थयोस्तादात्म्यस्य वैयाकरणमते सिद्धत्वात् **"रामेति द्व्यक्षरं नाम मान भङ्गः पिनाकिन"** इत्यादौ शब्दार्थयोरभेदेन व्यवहारात्, पुरोवर्तिनि गवादौ कोऽयमिति पृष्टे गौरित्येवमुत्तरवाक्ये शब्देन सहाभेदनिर्देशात् शब्द-द्रव्ययोस्तादात्म्यं सिद्धम्।गुणक्रियाजातीनां तु द्रव्यवृत्तित्वेन साक्षाच्छब्दाभेदा-संभवेऽपि गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योश्चाभेदात् **तदभिन्नाभिन्नस्य तदभिन्नत्वमिति** न्यायात् जातिक्रियागुणाभिन्नेन द्रव्येण सहाभेदापन्नस्य शब्दस्य जातिक्रियागुणैरपि सह तादात्म्यं सिद्धयति । तथाच द्रव्यगुणक्रियाजातीनां तद्वाचकानां च अभेदाध्यवसायात् पूर्वोक्ता जिज्ञासा संभवति। किञ्च **तस्यभाव** इति सूत्रभाष्योक्तरीत्या **गुणक्रियासमूहो द्रव्यमिति**पक्षे गुणक्रियादीनां समूह-समूहिनोरभेद इति न्यायात् द्रव्यात्मकतया गुणक्रिययोरपि शब्दाभेदशङ्का उपपद्यत एव । जातेस्तु जातिशक्तिवादे वाच्यवाचकयोरभेदात् शब्दाभेदशङ्का सूपपन्नैव । पृच्छ्यते—**"किम् यत्तत् सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः"** इति । यत्तदिति समुदायः यच्छब्दार्थे वर्तते, सास्ना–गलकम्बलः लाङ्गूलं–पुच्छम्, ककुदं–स्कन्धः, विषाणं–शृङ्गमेषां समाहारः, तदस्यास्तीति तादृशोऽर्थो गौः तद्रूपः। एतावता उद्देश्यमुक्तं 'स शब्द' इति विधेयम्। उद्देश्यविधेययोरैक्यमापादयत् सर्वनाम पर्यायेण तत्तल्लिङ्गभागित्यभियुक्तोक्तेः। विधेयसामानाधिकरण्यात् स इति पुंल्लिङ्ग निर्देशः "शैत्यं हि यत्सा प्रकृति-र्जलस्य" इति वत् । सामान्त्रितमित्यादौ तूद्देश्यसामानाधिकरण्यात् 'सा' इति स्त्रीलिङ्गनिर्देशः ।

नेत्याह। द्रव्यं नाम तत्।

यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति, स शब्दः ?।

नेत्याह। क्रिया नाम सा।

यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति, स शब्दः ?।

नेत्याह। गुणो नाम सः।

यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वाच्छिन्नं सामान्यभूतं, स शब्दः ?।

नेत्याह। आकृतिर्नाम सा॥

कस्तर्हि शब्दः ?।

(समाधानभा०)–येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति, स शब्दः॥

उत्तरयति–नेत्याह *द्रव्यं नाम तदिति, शब्दत्वशब्दाऽभावव्यतिरिक्तत्वे सति श्रोत्रेन्द्रियग्राह्यत्ववतो लोके शब्दत्वप्रसिद्धया द्रव्यस्य श्रोत्रेन्द्रियग्राह्यत्वाभावेन न शब्दत्वमिति भावः। अनेनैव प्रकारेण क्रियागुणजातीनां शब्दत्वाऽभावं प्रपञ्चयति–यत्तर्हि तदिङ्गितं चेष्टितमिति। इङ्गितमभिप्रायसूचको व्यापारः, चेष्टितं बाह्येन्द्रियव्यापारः, निमिषितमक्षिव्यापारः। अत्र गुणात् प्राक् क्रिया निर्देशेन वैयाकरणमते-संयोगविभागादीनां क्रियान्तर्भावः, इति सूचयति, नतु नैयायिकमते इव गुणान्तर्भावः। यत्तर्हि तद् शुक्लो नीलः कपिलः कपोत इति" अत्र प्रकाराऽर्थेनेतिशब्देन गन्धरसादयः लिङ्गसंख्यादयश्च गृह्यन्ते। यत्तर्हि—"तद्भिन्नेष्वभिन्नं छिन्नेष्वाछिन्नं सामान्यभूतम्" भिन्नेषु नानाभूतासु गवादिव्यक्तिषु, अभिन्नमेकरूपेण ज्ञायमानम्, छिन्नेषु=नाशितासु आश्रयव्यक्तिषु, अच्छिन्नमविनाश्यमानम्, सामान्यभूतमिनि, भूतशब्दः स्वरूपार्थकः जात्यादि स्वरूपमित्यर्थः।

निर्णीतार्थं पृच्छति 'कस्तर्हि शब्द' इति वैयाकरणमतेन स्फोटरूपः शब्द इति सिद्धान्तमाह "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्द इति' अयम्भावः–घटादिपदे प्रत्येकं वर्णानां वाचकत्वे

---

* वै. मते शब्दस्य द्रव्यत्वामित्यग्रे 'आकाशदेशः शब्द' इत्यादिना स्फुटीकारिष्यते।

अथवा—प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा–शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः, इति। ध्वनिं कुर्वन्नेव-मुच्यते। तस्माद् ध्वनिः शब्दः॥

प्रथमवर्णेनैव कृतार्थत्वात् द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तिः । अथ प्रत्येकं वर्णा अनर्थकाः तत्समुदायोऽर्थवान् इति चेत्तथापि वर्णानां क्रमेणोपत्त्योत्तर-वर्णस्थितिकाले पूर्वपूर्ववर्णनाशेन नष्टवर्तमानोत्पत्स्यमानानां समुदायासम्भवः। नच नैयायिकोक्तरीत्या पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतचरमवर्णानुभवजन्य-समूहालम्बनात्मकैकस्मृतिविषयस्य पदस्य शक्त्याऽऽश्रयत्वं वाचकत्वं च सम्भ-वतीति वाच्यम्, संस्कारस्य तत्तत्पदार्थविषयकत्वेऽपि तत्तत्क्रमविषयकत्वाभावेन येन क्रमेण संस्कारस्तेनैव क्रमेण स्मृतिरिति नियमाभावात् रस, राज, नद्यादि, शब्दानुभवजन्यसंस्कारैः सरः, जरा, दीनादिपदानामपि स्मृतिविषयत्वसंभवेना-निष्टप्रसक्तेः ।

तस्मात् वर्णव्यतिरिक्तो वैखर्यादिनादसहितवर्णाभिव्यङ्ग्यः, अखण्डः, स्फटिकादिवत्पररूपग्राही व्यापकः मनोमात्रग्राह्यः स्फोटः अङ्गीक्रियते । नच जरादिशब्दश्रवणेन व्यत्ययेन राजादिवर्णानुरञ्जितस्फोटाभिव्यक्तिरिति पूर्ववदेव दोष इति वाच्यम् ? यथा पटे अनेकरञ्जकद्रव्याहितोऽनेकवर्णोपरागः क्रमेण भवति, तथा एकस्मिन् स्फोटे नानावर्णोच्चारणक्रमेण क्रमवानेव तत्तद्वर्णानामनु-रागः, स च स्थिरो मनोग्राह्यश्चेति सुव्यवस्थितत्वात् ।

इदानीं वैयाकरणैकगम्यं स्फोटवादं त्यक्त्वा मन्दबुद्धिसाधारण्येन लोकप्र-सिद्धध्वनिशब्दवादमाह **अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द उच्यते** इति। प्रतीतः-अवबुद्धः पदार्थो येन, एतादृशो ध्वनिः लोके शब्दत्वेन प्रसिद्धः। प्रतीतपदार्थक इत्युक्त्या अनर्थकशङ्खादिध्वनिनिरासः । लोकप्रसिद्धव्यवहार-माह–**'शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्य्ययं माणवक, इति। ध्वनिं कुर्वन्नेवमुच्यत इति। 'तस्माद् ध्वनिः शब्द'** इति सार्थको ध्वानिरित्यर्थः ।

अन्वाख्यातव्यशब्दस्वरूपमुक्त्वा अनुशासनस्वरूपस्य व्याख्यातव्यत्वेन

(शब्दानुशासनप्रयोजनाधिकरणम्)

(प्रयोजनजिज्ञासाभा०)–**कानि पुनः शब्दानुशासनस्य प्रयोजनानि ?** ।

(उत्तर संग्रहवाक्यं)। **रक्षोहागमलघ्वसन्देहाःप्रयोजनम्** ।

प्राप्तावपि तदावश्यकत्वद्योतक मधिकारिज्ञानसंपादकञ्च प्रयोजननिरूपणमारभते। किञ्च

सिद्धार्थं सिद्धसम्बन्धं श्रोता श्रोतुं प्रवर्तते
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ।

इति भट्टोक्तेरनुबन्धचतुष्टयमधिकारिप्रवृत्तिसिद्धयेऽवश्यं वक्तव्यम् । अनुबन्धत्वञ्च ग्रन्थाध्ययनादिप्रवृत्तिप्रयोजकज्ञानविषयत्वम् । सर्वत्र प्रवृत्तिः 'इदं मदिष्टसाधन'मिति ज्ञानाद् भवति। तत्रेदमित्यनेन विषयः, मदित्यस्मच्छब्देनाधिकारी, इष्टपदेन प्रयोजनं, साधनपदेन साधनत्वादिसम्बन्धः। तथा च विषयप्रयोजनसम्बन्धाधिकारिचतुष्टयज्ञानाभावे इदं मदिष्टसाधनमित्याकारकं प्रवृत्तिजनकं ज्ञानं न संभवति, तस्मात् प्रकृते विषयः–अन्वाख्येयशब्दाः, साक्षात्प्रयोजनमनुशासनम् । प्रयोजनप्रयोजनञ्च रक्षोहादि भाष्यकृता उच्यते, सम्बन्धस्तु सम्बन्धिज्ञानाधीननिरूपणत्वात् पृथङ्नोच्यते, तदुक्तं भट्टैः—

विषयश्च फलञ्चैव सम्बन्धस्याश्रयावुभौ ।
तदुक्त्यन्तर्गतस्तस्मात् पृथङ् नोक्तः प्रयोजनात् । इति

एवमधिकार्य्यपि यः प्रयोजनमात्मीयत्वेनानुसन्दध्यात्, सोऽर्थात्क्षिप्त एव ।

तत्र प्रयुज्यते प्रवर्त्यते पुरुषो विषये येन तत्प्रयोजनमिति व्युत्पत्त्या प्रवर्तकं प्रयोजनशब्देनोच्यते, अत एवागमे प्रयोजनत्वसमन्वयः सिद्धयति। तच्च द्विविधं साक्षात् प्रवृत्तिकरं, स्तुतिनिन्दाद्वारा प्ररोचनां संपाद्य प्रवृत्तिकरञ्च । लोके प्रयोजककर्तरि प्रवर्तकत्वव्यवहारस्तु तादृशेष्टसाधनत्वज्ञापकत्वद्वारा प्रवर्तते । आगमेऽप्येवमेव । मुख्यं प्रवर्तकन्तु फलमेव । गौणं स्तुतिनिन्दाकरं प्ररोचकरूपम् । तत्र मुख्यप्रयोजनमाह 'रक्षोहागमलघ्वसन्देहाःप्रयोजनम्' रक्षा च ऊहश्च आगमश्च लघु च असन्देहश्चैषामितरेतरद्वन्द्वः। प्रयोजनशब्दः करणल्युडन्तः, तेन प्रयोजनी च प्रयोजनश्च प्रयोजनश्च प्रयोजनञ्च प्रयोजनश्च एषां पञ्चानां–**नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्** '

(व्याख्याभा०)—रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यतीति।

ऊहः खल्वपि, न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्।

इत्यनेनैकशेषैकवद्भावौ। अतएव प्रश्ने कानि प्रयोजनानि इति बहुवचनम्, उत्तरवाक्ये च प्रयोजनमित्येकवचनम्, इति संख्याभेदेऽपि नाऽसङ्गतिः तादृशानुशासनसत्त्वात्।

तत्र रक्षा वेदरक्षणम्। "**लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यती**'ति, अयं भावः—लोकेऽदृष्टान् लोपागमवर्णविकारान् वेदे दृष्ट्वा व्याकरणज्ञानाभावे पुरुषो भ्राम्येत्, व्याकरणज्ञाने तु न भ्रमो भवति, अर्थनिश्चयश्च भवति। यथा 'देवा अदुह्र'। इत्यत्र दुहेर्लङि झस्य अदादेशे कृते **लोपस्त आत्मनेपदेष्विति** तलोपः, **बहुलं छन्दसीति** रुट् वेदे भवति। लोके तु अदुहत। इति लोपागमयो रुदाहरणम्। उद्ग्राभञ्च निग्राभञ्च, इत्यत्र ग्रहधातोर्घञि 'हृग्रहोर्भः छन्दसी'ति हस्य भः, इति वर्णविकारोदाहरणम्। विकारो भावरूपादेशः।

ऊहः—प्रकृतियागस्थमन्त्रघटकदेवतादिवाचकपदानां विकृतियागस्थ देवतादिबोधानुकूलपरिवर्तन मूहः, इत्यूहस्य लक्षणम्। यस्मिन्यागे साक्षादुपदिष्टा इतिकर्तव्यता, यागान्तरेण चोदकवाक्यात् (प्रकृतिवद्विकृतिः कर्तव्या इति वाक्यात्) प्राप्यते, सा प्रकृतिः, तदन्या विकृतिरिति मीमांसकमर्यादा। तथा च सर्वेषामिष्टियागानां दर्शपूर्णमासौ प्रकृतिः। सर्वेषां सोमयागानामग्निष्टोमसंस्था प्रकृतिः। सर्वेषां पशुयागाना मग्नीषोमीयपशुयागः प्रकृतिरिति उत्सर्गः। तत्रेष्टिप्रकृतौ उपदिष्टः 'अग्नये त्वा जुष्टं निर्वपामी'ति मन्त्रः 'सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः' इति विहितायां सौरेष्टौ इतिकर्तव्यताकाङ्क्षायां चोदकवाक्येन सर्वैः पदार्थैः सह प्रापितः। तत्र अग्निदेवतासम्बन्धिनिर्वापप्रकाशकमन्त्रस्थाग्निपदस्य चतुर्थ्यन्तस्य सूर्यदेवताकयागे सूर्यसंम्बन्धिनिर्वापप्रकाश-

आगमः खल्वपि—'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति । प्रधानं च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति ॥

नासमर्थत्वादग्निपदं विहाय सूर्यपदं तत्स्थाने विनियुज्य 'सूर्याय जुष्टं निर्वपामि' इति मन्त्रः संपद्यते । तदेवं 'सूर्याय' इति प्रकृत्यूहः विभक्तेस्तदवस्थत्वात्, एवं लिङ्गसंख्यादीनामप्यूहो बोध्यः ।

आगमो नाम वेदोक्तं व्याकरणाध्ययनविषयकं विधिवाक्यम् । 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चे'ति । ब्राह्मणेनाधिकारिणा इत्यर्थः। निष्कारणं दृष्टकारणानपेक्षया इत्यर्थः । अनेन व्याकरणाध्ययनस्य नित्यत्व मुक्तम् । 'एकःशब्दः सम्यक् ज्ञातः-कामधुक् भवति, इति श्रुत्या च काम्यत्वमपि । श्रुतिवाक्यद्वयबलेन खादिरत्वे इव नित्यत्वकाम्यत्वयोः समावेशः । धर्म इत्यस्य धर्मत्वेनाभिमताध्ययनज्ञानादिक्रियाकर्मत्वेनौपचारिकधर्मत्ववान् इत्यर्थः ।

षडङ्ग इति षड् अङ्गानि यस्य । तथा चाथर्वणिक श्रुतिः 'द्वे विद्ये वेदितव्ये इति ह स्माहुर्यद् ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिष मिति । अथ परा यया तदक्षरमद्रेश्यमधिगम्यते, इत्यादिः ।

अत्र वेदः स्वस्वशाखारूपः, अध्येयः गुरुमुखोच्चारणाऽनूच्चारणरूपाऽध्ययनेन प्राप्तव्यः । ज्ञेयश्च–अनादिमीमांसानिर्णीतसिद्धान्ताऽवगमकत्वेन ज्ञानविषयीकर्तव्यः । अध्येयो ज्ञेयश्चेत्युभयोक्त्या केवलाऽक्षरग्रहणं न विशिष्टधर्माय प्रत्यवायपरिहाराय चेति सूचितं, तथाहि वक्ष्यति—यदधीत मविज्ञातमिति। किं च 'तेन प्रोक्त'मिति सूत्रभाष्योक्तरीत्या तत्तदर्थतादात्म्यापन्नपदविशेषविशिष्टाऽनुपूर्वीविशेषे एव वेदत्वप्रसिद्ध्याऽर्थज्ञानेनाऽक्षरग्रहणेन च मिलित्वा वेदग्रहणं भवति । अन्यथाऽर्थमात्रग्रहणेऽक्षरमात्रग्रहणे वाऽन्धसंघदृष्टगजन्यायापत्तिः ।

प्रधानं च षडङ्गेषु व्याकरणम् । इति,

मुख व्याकरणं तस्य ज्यौतिषं नेत्रमुच्यते ।

लघ्वर्थं चाध्येयं व्याकरणम्। 'ब्राह्मणेनावश्यं शब्दा ज्ञेयाः' इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम्।

असंदेहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति—'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेते'ति। तस्यां सन्देहः– स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति—यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति।

निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे।
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान् प्रचक्षते। इत्युक्तेः।

लघ्वर्थमिति—'ब्राह्मणेन निष्कारणो धर्मः' इति श्रुत्या सार्थवेदाध्ययने विहितेऽवश्यं तत्तदर्थतादात्म्यापन्नसकलसाधुशब्दानां ज्ञानं नान्तरीयकतया विहितमेव, तेषाञ्च सर्वेषां साधुशब्दानां ज्ञाने व्याकरणबोधितपदस्फोटवर्णस्फोटादिकल्पितप्रक्रियाविभागमन्तरेणाऽन्यो लघुरुपायो नास्त्येव। तथा च वक्ष्यति–बृहस्पतिरिन्द्राय प्रतिपदोक्तानां शब्दानां शब्दपारायणं दिव्यवर्षसहस्रपर्यन्तं प्रोवाच नान्तं जगामेति।

असन्देहाऽर्थमिति—स्थूलपृषतीमग्निवारुणीमनड्वाहीमालभेते'ति श्रुतिः, अग्नीवरुणौ देवते अस्या इत्याग्निवारुणी अनड्वाही गौः, तत्र स्थूलपृषती शब्दे सन्देहः! किमय बहुव्रीहिरुत कर्मधारयः, तत्र बहुव्रीहौ स्थूलानि पृषन्ति–शरीरस्थरक्तबिन्दवः यस्या इति विग्रहे स्थौल्यं बिन्दुष्वन्वेति, नाऽनड्वाह्यां, स्थूला चासौ पृषतीति कल्पे तु पृषतीशब्देन लक्षणया बिन्दुमत्या अभिधानात् स्थौल्यं गवि अन्वेति न तु पृषत्सु, इत्यर्थभेदसन्देहे पूर्वपदप्रकृति स्वरत्वात् बहुव्रीह्यर्थनिर्णय इति सिद्धान्तः। 'बहुव्रीहौ प्रकृत्या पूर्वपद' मिति सूत्रेण अच्प्रत्ययान्तस्थूलशब्देऽन्तोदात्तत्वस्य श्रूयमाणत्वात्। तत्पुरुषे तु समासस्येत्यनेनाऽन्तोदात्तत्वे पृषतीशब्दस्य ईकार उदात्तः श्रूयेतेति भावः।

(प्ररोचकप्रयोजनसंग्रहवाक्यभा०)–इमानि च भूयःशब्दानुशासनस्य प्रयोजनानि—तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उतत्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुण, इति।

(विवरणभा०)–तेऽसुराः—हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद्-ब्राह्मणेन न म्लेच्छितवै=नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः'। (तेऽसुराः) म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्॥

दुष्टः शब्दः—"दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न

इदानीं मुख्यप्रयोजनान्युक्त्वा प्ररोचक प्रयोजनान्याह—प्ररोचना च विधेयस्तुति निषेध्यनिन्दाभ्यां भवति, इति कृत्वा व्याकरणज्ञानप्रशंसां तदभावनिन्दाञ्च त्रयोदशभिः वैदिक प्रतीकैराह **इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि तेऽसुरा** इत्यादीनि, तेऽसुरा हेऽलयो हेऽलय इति कुर्वन्तः परावभुवुः क्त्वन्तर्भूते संस्कृतभाषणेऽपशब्दोच्चारणस्य निषेधार्थोऽयमर्थवादः। अत्र हे हेप्रयोगे हैहयो, रिति प्लुतस्य प्रकृतिभावस्य चाकरणं म्लेच्छनं। किञ्च हे ऽलयो हे ऽलय-इत्यत्र 'अरय' इति पदमात्रस्य 'आबाधे चे'त्यनेन द्वित्वे कर्तव्ये, 'हेऽरय' इति पदसमुदायस्य द्वित्वकरणं रेफस्य–लत्वकरणं च म्लेच्छनम्। अनेन निन्दार्थवादेन "तस्माद् ब्राह्मणेन न म्लेच्छितवै" इति निषेध्यं निन्द्यते, तेन च व्याकरणाध्ययनस्य स्तुत्या व्याकरणमध्येय मिति विधिः कल्प्यते यस्स्तूयते स विधीयते इति न्यायात्। नहि निन्दा निन्दितं निन्दितुं प्रभवति अपितु विधेयं स्तोतुमिति न्यायेन प्रकृतनिन्दाया विधेयस्तुतौ पर्य्यवसानात्। भाष्ये **"न म्लेच्छितवै** इत्यस्य व्याख्यानं **नापभाषितवै"** इति 'कृत्यार्थे तवैकेन्केन्यत्वनः। इति पा० सूत्रेण तव्यप्रत्ययार्थे तवैप्रत्यये न म्लेच्छितव्यमिति फलितम्। ब्राह्मणेनेत्यस्याधिकारिणेत्यर्थः॥ **म्लेच्छो ह वा एष यदपशब्दः। म्लेच्छा माभूमेत्यध्येयं व्याकरणम्॥** अत्र उभयस्मिन् वाक्ये निन्दार्थकाद् म्लेच्छधातोः कर्माणि घञन्तात् म्लेच्छशब्दसिद्धिः। तेन निन्द्या इत्यर्थः। अपशब्दस्यापि निन्द्यत्वं पापसाधनत्वात्।

दुष्टश्शब्द इति—स्वरेण वर्णेन वा मिथ्या प्रयुक्तोऽत एव दुष्टः

तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" इति । दुष्टान् शब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम् । (दुष्टःशब्दः)

यदधीतम् —'यदधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित ॥ तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम् । (यदधीतम्)

शब्दो विवक्षितमर्थं नाह । किञ्च स दुष्टशब्दः वाग्रूपवज्रतामापन्नः तेन दोषेण यजमानं नाशयति । यथा स्वरेणापराधात् इन्द्रशत्रुशब्दः । अयमर्थो तैत्तिरीयसंहितायां द्वितीयकाण्डे पञ्चमे प्रपाठके वर्णितः । इन्द्रस्य अभिचारः त्वष्ट्राऽऽरब्धः । तत्र 'इन्द्रशत्रु र्वर्धस्व' इतिमन्त्र ऊहितः । इन्द्रस्य शातयिता—नाशयिता भवेत्यर्थकः इन्द्रशत्रुशब्दो विवक्षितः । शत्रुशब्दश्चात्र शातनक्रिया-वाचको न तु रूढः । तत्र तत्पुरुषसमासेन 'समासस्य' इत्यन्तोदात्तत्वे कर्तव्यत्वेन प्राप्ते ऋत्विजा विस्मृत्याद्युदात्त इन्द्रशत्रुशब्दः प्रयुक्तः, तेन च 'बहुव्रीहौ प्रकृत्या पूर्वपद' मिति पूर्वपदप्रकृतिस्वरबलेन बहुव्रीहौ पर्य्यवसन्ने इन्द्रः शत्रुः-(शातयिता) यस्येत्यर्थबोधात् इन्द्रेण नाश्यमानः त्वं (अग्निः) वर्धस्व इति प्रैषेण विपरीतं सम्पन्नम् । इन्द्रस्य मारणार्थं कृतेनाभि-चारिकेण यागेनोत्पादितोऽग्निज्वालाविशेषरूपोऽसुरः इन्द्रमहत्वा स्वयमिन्द्रद्वारा नष्टः इति स्वरदोषमात्रेण फलवैपरीत्यम् ॥ अनेन निन्दार्थवादेन एष निषेधः फलति **'दुष्टाञ् शब्दान् मा प्रयुक्ष्महि'** इति ।

"यदधीतम्" यन्मन्त्रादिकम्, अधीतं=अक्षरशः अधिगतम् । अविज्ञातम् अर्थतो न विज्ञातं केवलं निगदेन—पाठमात्रेण शब्दयते उच्चार्यते, तन्मन्त्रादिकं यथा शुष्कैधः—शुष्कमपि इन्धनम्, अनग्नौ अग्निना—अनुपश्लिष्टं (औपश्लेषि-काधिकरणे सप्तमी) न ज्वलति, तथा कर्हिचित् क्वचिदपि न ज्वलति न सफलं भवतीत्यर्थः । अनेनार्थवादेनानुमितं निषेधमाह 'तस्मादनर्थकं माधि-गीष्महि' इति 'अध्येयं व्याकरण' मिति ।

१—'दुष्टः शब्दः' इत्यस्य स्थाने 'मन्त्रो हीनः' इति पाठः (ना० शि० १ । ५, पा० शि० श्लो० ५२)

२—निरुक्ते (१ । १८ खण्डे) यदधीतमित्यस्य स्थाने यद्गृहीतमिति पाठः ।

यस्तु प्रयुङ्क्ते–यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद् व्यवहार-काले ॥ सोऽनन्त माप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥ कः ? वाग्योगविदेव। कुत एतत ?। यो हि शब्दान् जानात्यपशब्दानप्यसौ

"**यस्तुप्रयुङ्क्ते**" इति—विशेषे–तत्तदर्थविशेषनिरूपितशक्तिमच्छब्दानां प्रयोगविशेषे कुशलः–निपुणः व्यवहारकाले यथावत् शाब्दबोध-कारणानुसन्धानपूर्वकं शब्दान्–पदविशेषान् प्रयुङ्क्ते–उच्चारयति। स वाग्-योगवित्–वाचां तत्तदर्थेन योगं तादात्म्यरूपशक्तिविशेषं वेत्तीति वाग्योगवित् परत्र परलोके, अनन्तम्–अक्षयं, जयमाप्नोति। च तदन्यः अपशब्दैः– अपभ्रष्टशब्दप्रयोगैः, अधर्मसम्पन्नः सन् दुष्यति अभ्युदयभङ्गवान्भवति।

स्थूणानिखननन्यायेन प्रकृतार्थदार्ढ्यायाशङ्क्यते—**कः ?** पूर्वपक्ष्युत्तरं– '**वाग्योगविदेव**'। प्रश्नः '**कुत एतत्**—'उत्तरं—'**यो हि**' इत्यादि अपशब्द ज्ञानेऽप्यधर्म इत्यन्तम्। वाग्योगविदः गुणापेक्षया दोषबाहुल्यमाह 'अथवा इत्यादि बहवो अपभ्रंशा' इत्यन्तेन। अवाग्योगविदस्तु न दोषो नापि गुणः इत्याह '**अथ यो अवागयोगविद् अज्ञानं तस्य शरण**'मिति 'यदज्ञानकृतं तदकृतं भवति' इति न्यायात्। यथा व्याघ्रादीनां हिंसाकर्तृत्वदोषो नास्ति, अज्ञानात्, तद्वदित्यर्थः।

सिद्धान्ती परिहरति—**विषम उपन्यास इति**। '**नात्यन्तायाज्ञानं शरणं भवितुमर्हति,** अयं भावः—अनधिकारिणां तत्तद्विधिनिषेधयोरननुष्ठाने तथा ज्ञानाभावेऽपि च दोषो नास्ति। तद्विषय एव पूर्वोक्तो न्यायः। अत एव 'न शूद्रे पातकं किंचित् न च संस्कारमर्हति' इति स्मृतिरनधिकारिणां दोषाभावं दर्शयति।। अधिकारिणां तु विधिनिषेधयोः अनुष्ठानावश्यकत्वात्तत्-परिज्ञानस्यापि आवश्यकत्वेन अज्ञानमननुष्ठानं चेत्युभयमपि दोषावहमेव। तदेव दर्शयति '**योहि अजानन् वै**' इत्यादि। तथा च **दुष्यति चापशब्दै**रित्यत्र सन्निधानात् वाग्योगविदेव कर्ता इति कल्पनं न्यायविरुद्धमिति कृत्वा योग्यतावशात् अवाग्योगवित् कर्ता अध्याहर्तव्य इत्याह **एवं तर्हीति**।

पूर्वोक्तं वाग्योगविदो दोषबाहुल्यं परिहरति—'**अथ यो वाग्योगवित्**

जानाति । यथैव हि शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः । अथवा भूयानधर्मः प्राप्नोति । कुत एतत् ? । भूयांसोऽपशब्दाः, अल्पीयांसः शब्दा इति । एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः । तद्यथा गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्यादयो बहवोऽपभ्रंशाः । अथ योऽवाग्योगविद्, अज्ञानं तस्य शरणम् । विषम उपन्यासः । नात्यन्तायाज्ञानं शरणं भवितुमर्हति । योह्यजानन् वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात् । एवं तर्हि—सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥ कः ? । अवाग्योगविदेव । अथ यो वाग्योगविद् । विज्ञानं तस्य शरणम् । क्व पुनरिदं पठितम् ? । भ्राजा नाम श्लोकाः । किं च भोः श्लोका अपि प्रमाणम् ? । किं चातः ? । यदि श्लोका अपि प्रमाणम् । अयमपि श्लोकः प्रमाणं भवितुमर्हति—'यदुदुम्बरवर्णानां घटीनां मण्डलं महत् । पीतं न गमयेत्स्वर्गं किं तत् क्रतुगतं नयेत्'॥ प्रमत्तगीत एष तत्रभवतः । यस्त्वप्रमत्तगीतस्तत्प्रमाणम् ।

(यस्तु प्रयुङ्क्ते)

विज्ञानं तस्य शरणमिति । अयमाशयः—वाग्योगविदः साधुशब्दानां गवादीनां, ततोऽधिकसंख्याकानां गावी गोणीत्यादीनामपभ्रंशानां च ज्ञानसत्वेऽपि प्रयोगकाले अपभ्रंशान् परिहृत्य विज्ञानवशात् साधूनामेव स—प्रयोगं करिष्यतीति । अपभ्रंशानां च प्रयोगात् अधर्मः, न तु ज्ञानमात्रात् इति वक्ष्यते । तथाच न दोषलेशोऽपि ।

जिज्ञासते क्व पुनरिदं पठितमिति, उत्तरम्—कात्यायनप्रणीताः भ्राजा नाम श्लोकाः तत्र पठितमित्यर्थः । पौरुषेयेषु श्लोकेषु प्रामाण्यसंशयात् पृच्छति किंच भोः ? श्लोका अपि प्रमाणमिति ? सिद्धान्ती—किंच अतः । प्रामाण्ये सति को दोष इत्यर्थः । पूर्वपक्षी—यदि श्लोका अपि प्रमाणम्, अयमपि प्रमाणं भवितुमर्हति । "यदुदुम्बरवर्णानामिति" सौत्रामणियागे 'परिक्रीणीयादुच्छेषणस्य पातारं' तैत्ति० ब्रा० इति विहितस्य सुरापानस्य निन्दात्मिका दैत्यवञ्चनाय पूज्यस्यापीश्वरस्य स्वस्मिन् प्रमत्तत्वमारोप्येयमुक्तिः ।

अविद्वांसः—अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥ अभिवादे स्त्रीवन्माभूमेत्यध्येयं व्याकरणम्। (अविद्वांसः)

उदुम्बरवर्णानां ताम्रवर्णानां घटीनां सुराकलशानां महत् मण्डलं केनचन पीतमपि पिबन्तं यदि स्वर्गं न गमयेत् तर्हि तत् सुराकलशमण्डलं सौत्रामणीक्रतुगतं किमर्थं नयेत्, इति आक्षेपादैत्यवञ्चनाय। सिद्धान्ती—**प्रमत्तगीत एष** इति प्रमत्तेन आरोपितप्रमादेन गीत इत्यर्थः। तत्र भवत इति कर्तरि षष्ठीविधानाद्भावे क्तप्रत्ययः प्रमत्तशब्दे।

अयं भावः पौरुषेयाणामपि श्लोकानां वेदबोधितार्थानुवादकत्वे प्रामाण्यमव्याहतमेव स्मृत्यादिवत्। वेदविरुद्धार्थप्रतिपादकत्वे तु भ्रमप्रमादविप्रलिप्साद्यप्रामाण्यकारणसत्त्वात् अप्रामाण्यमेव। "यस्तु प्रयुङ्क्ते" इत्यस्य तु 'एकः पूर्वपरयोः" इति सूत्र भाष्योक्त—"एकः शब्दः सम्यग् ज्ञातः" इत्यादिश्रुतिमूलकत्वात् प्रामाण्यम्। यदुदुम्बरवर्णानामित्यस्य तु श्रुतिमूलकत्वाभावात् वक्तृदोषाच्चाप्रामाण्यमुपपद्यते इति।

अविद्वांसः–इति—ये (व्याकरणं) अविद्वांसः प्रत्यभिवादे आशीर्वादवाक्ये, नाम्नः–अभिवादकनाम्नः प्लुतिं–प्लुतिकरणं, न विदुः–न जानन्ति, तेषु अविद्वत्सु, विप्रोष्य–प्रवासादेत्य, कामं–यथेच्छं, स्त्रीष्विव (अभिवादवाक्ये) "अयमहमभिवादये" इति वदेत्, न तु स्वनामगृह्णीयात्, स्वनामग्रहणफलस्य आशीर्वादवाक्ये प्लुतिघटिततन्नामप्रयोगरूपस्य स्त्रीसन्निधाविव अविद्वत्सन्निधौ अभावात्। अनेन निन्दार्थवादेन फलितमाह 'अभिवादे स्त्रीवन्माभूमे'ति तथा च मनुः—

अभिवादात्परं विप्रो ज्यायांसमभिवादयन्।
असौ नामाहमस्मीति स्वनामपरिकीर्तयेत् ॥
नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽयमहं ब्रूयात् स्त्रियः सर्वास्तथैव च ॥ २–१२३॥

विभक्तिं कुर्वन्ति—याज्ञिकाः पठन्ति-'प्रयाजाः* सविभक्तिकाः कार्या' इति। न चान्तरेण व्याकरणं प्रयाजाः साविभक्तिकाः शक्याः कर्तुम्।
(विभक्तिं कुर्वन्ति)

यो वा इमाम्—यो वा इमां पदशः† स्वरशोऽक्षरशश्च वाचं विदधाति, स आर्त्विजीनो भवति। आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम्
(यो वा इमाम्)

चत्वारि—'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश'‡ ॥इति॥

"विभक्तिं कुर्वन्ति"–इति—पुनराधेयेष्टौ श्रूयते 'प्रयाजा साविभक्तिकाः कार्या' इति। न चान्तरेणेत्यादि स्पष्टम्। अयं भावः—प्रयाजाः सविभक्तिका इति विधिना केवलविभक्तेः प्रयोगानर्हत्वात् प्रकृतिः आक्षिप्यते। सा च अग्नि-शब्दरूपा नाऽन्या "त्वमग्ने प्रयाजानुयाजानां पुरस्तात् त्वं पश्चात्" इति मन्त्रवर्णात्। ताश्च विभक्तयः क्रमेण संबोधन, सप्तमी, तृतीया द्वितीया-रूपाश्चतस्रः। तथाचापस्तम्बः ' अग्ने अग्ने, अग्नावग्ने, अग्निना अग्ने, अग्निमग्ने इति चर्तुर्षु प्रयाजेषु चतस्रो विभक्तीर्ददाति नोत्तमे ' इति, नोत्तमे इत्यस्य पञ्चमप्रयाजे विभक्तिर्नेत्यर्थः।

"यो वा इमाम्" इति—विद्वान् यजेत, विद्वान याजयेत्, इति न्यायस्य मूलभूता इयं श्रुतिः। "यज्ञर्त्विक्भ्यां घखञौ" इति सूत्रेण, "यज्ञर्त्विक्भ्यां 'तत्कर्म अर्हति' इति च उपसंख्यानम्" इति वार्तिकेन च निष्पन्नेन आर्त्विजीन शब्देन क्रमेण यजमानस्य ऋत्विजश्चोच्यमानत्वात्।

" चत्वारि "—यद्यपि अयं मन्त्रो निरुक्ते वेदस्तुतिपरत्वेनान्यत्र अग्निस्तुतिपरत्वेन व्याख्यातः। तथापि परमर्षिभिः ध्यानविशेषबलात् अनुसंहितम्

---

*—प्रयाजानां विभक्तीः कुर्यात्......कस्मात् ? सविभक्तयः प्रयाजा भवन्तीति। (का० सं० ६. १.

†—वर्णशोऽक्षरशो ज्ञानाद विभक्तिपदशोऽपि च (वाज० प्रा० ८.२७)

‡—ऋ० सं० ४। ५८। ३।

चत्वारि श्रृङ्गाणि पदजातानि नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाः त्रयः काला भूतभविष्यद्वर्त्तमानाः । द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च । सप्त हस्तासो अस्य सप्त विभक्तयः । त्रिधा बद्धः त्रिषु स्थानेषु बद्धः, उरसि कण्ठे शिरसीति । वृषभो वर्षणात् । रोरवीति शब्दं करोति । कुत एतत् ? । रौतिः शब्दकर्मा । महो देवो मर्त्यां आविवेशेति महान् देवः शब्दः । मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश ॥ महता

अग्नितत्त्वं वेदतत्त्वं स्फोटतत्त्वं च कारणरूपेणैकमिति कृत्वा एष मन्त्रः स्फोटरूपशब्दस्तुतावपि विनियुज्यते । तथा च हरिः—

स्वरूपज्योतिरेवान्तः परा वागनपायिनी

यस्यां दृष्टस्वरूपायामधिकारो निवर्तते । इति ।

अस्य नित्यशब्दस्य चत्वारि–चतुःसंख्याकानि श्रृङ्गा–श्रृङ्गाणि (शेश्छन्दसि इति शेर्लोपे नलोपः) विवर्तकार्यरूपाणि, नामाख्यातोपसर्गनिपातरूपाणि, त्रयो अस्य (प्रकृत्यान्तः पादमिति प्रकृतिभावः) पादाः भूतभविष्यत्वर्तमानकालरूपाः, द्वे शीर्षे-शीर्ष शब्दोऽदन्तः क्लीवे, नित्यकार्यरूपौ द्वौ शब्दात्मानौ, अस्य सप्त हस्तासः (आज्जसेरसुक्) सप्त विभक्ति रूपाः, अत्र विभक्तिशब्देन कारकषट्कं षष्ठ्यर्थसम्बन्धश्च इति सप्तकं गृह्यते, तेन यथासंभवं तदर्थकसुपां तिङां च ग्रहणं बोध्यम् । उरसि कण्ठे शिरसि इति त्रिधा बद्धः, अत्र कण्ठपदेन ओष्ठप्रभृति आकाकलकपर्यन्तरूपकण्ठान्तर्गतस्थानमात्रं गृह्यते । बद्धशब्दस्य व्यञ्जकध्वन्यनुत्पत्तौ अनभिव्यक्त इत्यर्थः । वृषभः-वृष इव भातीति, काम वर्षणसाम्यात् । तथा च श्रुतिः—"एकः शब्दः—कामधुक् भवतीति" रोरवीति—नानाविवर्त शब्दैः व्यवहारं सम्पादयति, महो महान् देवः—परब्रह्मस्वरूपः अन्तर्यामी शब्दः, मर्त्यान् मरणधर्मान् आविवेश प्रविष्टवान्, तस्य यथावत् ज्ञानेन उपासनेन च तत्सायुज्यप्राप्तिः फलम् । तथा च हरिः—

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।

प्राहुर्महान्तं वृषभं येन सायुज्यमश्नुते इति । श्रुतिश्च—सूक्ष्मामर्थेनाप्र-

देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम् ॥

अपर आह-'चत्वारि वाक्परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः॥ गुहा त्रीणि निहिता नेङ्गयन्ति, तुरीयं वाचो मनुष्या वदन्ति *॥ 'चत्वारि वाक्परिमिता पदानि'। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। 'तानि विदुर्ब्राह्मणा ये मनीषिणः'। मनस ईषिणो मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति'। गुहायां त्रीणि निहितानि नेङ्गयन्ति-न चेष्टन्ते न निमिषन्तीत्यर्थः। 'तुरीयं वाचो मनुष्या वदन्ति'। तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्त्तते चतुर्थमित्यर्थः। (चत्वारि)

विभक्ततत्वामेकां वाचमभिष्यन्दमानाम्, तामन्ये विदुरन्यामिव च नाना-रूपामात्मनि सन्निविष्टाम्। इति

"चत्वारीति" चत्वारि—चतुःसंख्याकानि वाक्परिमिता " शेश्छन्दसि " इति शेर्लोपे नलोपः। वाचः परिमितानि वाक्परिमितानि। वाचः-शब्दस्य परिमितानि परिच्छिन्नानि एतावन्त्येव पदानि सन्ति इत्यर्थः। तानि नामा-ख्यातोपसर्गनिपातरूपाणि परा-पश्यन्ती-मध्यमा-वैखरी-रूपाणि च। चत्वा-रीत्यस्य द्वितीयव्याख्यानबलाद् एषोऽर्थो लभ्यते। नामादीनां मध्ये च एकैकं चतुरंशमिति च उत्तरार्धतात्पर्याल्लभ्यते। ये मनीषिणः-मनःसंयमिनः ब्राह्मणाः (वैयाकरणाः) ते विदुः। अवैयाकरणानां तदज्ञाने हेतुमाह-" गुहेति " गुहा—सुपां सुलुगिति ङेर्लुक्। गुहायामज्ञानरूपायां मूलाधार-नाभि-हृदयरूपायां च, त्रीणि नामादीनामंशचतुष्टयान्तर्गतमंशत्रयं, परा-पश्यन्ती-मध्यमा-त्रयं च, निहिता-पूर्ववत् शेर्लुक्, निरुद्धानीत्यर्थः, अतएव 'न इङ्गयन्ति' अस्यैव व्याख्यानं न चेष्टन्ते न निमिषन्तीत्यर्थः, इति।

मनुष्याः—अवैयाकरणाः यद् वदन्ति तत् वाचः—नामादिरूपायाः चतुश्चतुरंशायाः तुरीयं चतुर्थांशमात्रं वदन्ति। तथा परादिरूपायाः वाचः तुरीयं वैखरीमात्रं वदन्ति। वैयाकरणास्तु—शास्त्रज्ञानेन तद्बललब्धयोगेन च

---

*—(ऋ० सं० १। १। १६४। ४५। गो० ब्रा० २. १६.)

गुहास्थमज्ञानं विनाश्य उभयविधायाः वाचः अंशचतुष्टयमपि जानन्तीत्यर्थः। तत्र परादीनां स्वरूपं यथा—

परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा । इति ।

हरिरप्याह—

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥ इति ।

पश्यन्ती-मध्यमा-वैखरीणां सविकल्पकज्ञानविषयत्वात् त्रय्याः इति अनेकतीर्थभेदायाः इति च वाचो विशेषणम् । निर्विकल्पकज्ञानविषयायाः परायास्तु अनेकतीर्थभेदत्वं-नानाविवर्तभावापन्नत्वं नास्तीत्याह हरिः—

स्वरूपज्योतिरेवान्तः परा वागनपायिनी ।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ॥ इति ॥

येषां व्याकरणज्ञानं नास्ति तन्मते वैखर्येव एका वाक् । अतएव नैयायिकैः पामरसाधारण्येन वैखरीनिष्पन्नस्य अनित्यस्य शब्दत्वं वाचकत्वं चाङ्गीक्रियते—तथा च हरिः—

वैखरी शब्दनिष्पत्तिः मध्यमाऽश्रुतिगोचरः ।
आन्तरार्था च पश्यन्ती सूक्ष्मा वागनपायिनी ॥

लोकप्रसिद्धशब्दनिष्पादिका वैखरीत्यर्थः । तथा—

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद् दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः ॥

इत्यनेन वायोः अणुभ्यः (शब्दतन्मात्रेभ्यः) तथा जीवज्ञानाच्च मतभेदेन शब्दसृष्टिं दर्शितवान् । सिद्धान्ते तु हरेः स्फोटाख्यं नित्यं शब्दब्रह्मवाचकत्वेनाभिप्रेतम् । तदुक्तम्—

अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ इति ॥

वागधिष्ठातृदेवताप्रसादजनकञ्च व्याकरणाध्ययनमित्याह—

उतत्वः--'उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृन्वन्न शृणोत्येनाम्। उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः* ॥' 'उतत्वः' अपि खल्वेकः पश्यन्नपि न पश्यति वाचम् । अपि खल्वेकः शृण्वन्नपि न शृणोत्येनामिति । अविद्वाँसमाहार्धम् । 'उतो त्वस्मै तन्वं विसस्रे' तनुं विवृणुते । 'जायेव पत्य उशती सुवासाः । तद्यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते, एवं वाग्वाग्विदे स्वात्मानं विवृणुते । वाङ् नो विवृणुयादात्मानमित्यध्येयं व्याकरणम्। (उतत्वः)

सक्तुमिव-'सक्तुमिव† तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।

" उतत्वः " इति—त्वशब्दोऽन्यवाचकः । एक उतशब्दो निश्चयवाचकः, द्वितीयः अप्यर्थकः । त्वः—अन्यः (अवैयाकरणः) पश्यन्नपि वक्तृश्रोत्रो र्व्यवहारं साक्षात्कुर्वन्नपि ताभ्यां व्यवह्रियमाणां वाचं न ददर्श व्यत्ययेन लिट् । न पश्यति इत्यर्थः । उत इति निश्चये। तथा उत त्वः (अवैयाकरणः) शृण्वन्नपि श्रोत्रेन्द्रियेण साक्षात्कुर्वन्नपि एनां वाचं न शृणोति । अविदुषो दर्शनं श्रवणं च निष्फलत्वाद् अदर्शनमश्रवणं च भवति, इत्यर्थः । त्वस्मै–अन्यस्मै, (वैयाकरणाय) ' उ ' इति निश्चयेन, सुवासाः शोभनं-निर्णिक्तं वासः-वसनं यस्याः रजोनिर्मुक्तिस्नानानन्तरं परिहितधौतवसना । पत्ये-भर्त्रे, उशती-कामयमाना, जायेव, तन्वमुत-गोपनीयशरीरमपि (तन्वमिति च्छान्दसत्वात् 'अमि पूर्व' इत्यस्य विकल्पः) सा वाग्देवी विसस्रे-विवृणुते 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्' । कठ० इति श्रुत्योपास्योपासकयोरभेदावस्थायामुपास्यं स्वयमेव स्वस्वरूपमुपासकाय प्रकाशयतीति बोधनात् ।

" सक्तुमिव " इति—तितउना–चालन्या, सक्तुमिव पुनन्तः-गालयन्तः, यत्र–यस्यां वाचि, धीराः–ध्यानशीलाः, मनसा–साध्वसाध्व-वधानेन वाचं-अपभ्रंशरहितां वाणीम्, अक्रत–कृतवन्तः । अत्रा (अत्रि

---

*—ऋ० सं० १० । ७१ । ४)

†—(ऋ० सं० १० । ७१ । २)

अत्रा सखायः सख्यानि जानते । भद्रैषां लक्ष्मीर्निहिताधिवाचि' ॥ सक्तुः—सचतेर्दुर्धावो भवति, कसतेर्वा विपरीताद्विकसितो भवति । तितउ परिपवनं भवति—(ततवद्वा तुन्नवद् वा) धीरा ध्यानवन्तः । मनसा प्रज्ञानेन । 'वाचमक्रत' वाचमकृषत । अत्रा सखायः सन्तः सख्यानि जानते । क ? । य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः । के पुनस्ते ? । वैयाकरणाः । कुत एतत् ? । 'भद्रैषां लक्ष्मीर्निहिताधिवाचि' । एषां वाचि भद्रा लक्ष्मीर्निहिता भवति । लक्ष्मीर्लक्षणाद् भासनात्परिवृढा भवति । (सक्तुमिव)

सारस्वतीम्—याज्ञिकाः पठन्ति—'आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्', प्रायश्चित्तीया माभूमेत्यध्येयं व्याकरणम् । (सारस्वतीम्)

दशम्यां पुत्रस्य—याज्ञिकाः पठन्ति—दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् ।

तुनुघेतिदीर्घः) अस्यां वागधिष्ठातृदेवतायां सखायः सख्यभक्तिं प्राप्ताः, सख्यानि सायुज्यानि, जानते—अनुभवन्ति, एषां सख्यभक्तिमतां सायुज्यशालिनां अधिवाचि—वेदान्तादौ वर्ण्यमाना लक्ष्मीः परमार्थसंविद्रूपा, भद्रा—निश्रेयशकरी, निहिता—सन्निहिता भवति । यस्मिन् मार्गे सायुज्यं भवति, येषां च भवति, तत् सर्वं क ? इत्यादि प्रश्नोत्तरैर्दर्शितम् ।

"**सारस्वतीम्**"—आहिताग्निः—श्रौताग्निमान् यज्ञावसरे असाधुशब्दमुच्चार्य दोषभाक् भवति । तत्परिहाराय प्रायश्चित्तस्थानीयां सरस्वतीदेवताकामिष्टिं निर्वपेत् । शेषं स्पष्टम् ।

"**दशम्यां पुत्रस्य**" इति—दशम्यामिति औपश्लेषिकाधिकरणे सप्तमी, तेन दशमरात्र्युत्तरकालमेकादशे द्वादशे वाह्नि, इति फलितम् । तत्र जातपुत्रस्य नामकरणं कुर्यात् । तच्च नाम घोषवदादि—घोषप्रयत्नवन्तः हश्प्रत्याहारान्तर्गतवर्णाः आदौ यस्य तत् । एवम्—अन्तरन्तस्थं—अन्तःस्थिता अन्तस्थाः—यरलवान्यतमः यस्य तत् । "अवृद्धम्" इति—आदिवृद्धिरहितं, त्रिपुरुषानूकं त्रिसंख्याकाः पुरुषाः

तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्, इति । न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्। (दशम्यां पुत्रस्य)

सुदेवो असि—सुदेवो असि वरुण यस्य ते सप्त सिन्धवः । अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव। 'सुदेवो असि वरुण, सत्यदेवोऽसि ! 'यस्य ते सप्त सिन्धवः' सप्त विभक्तयः । 'अनुक्षरन्ति काकुदम्' काकुदं तालु। काकुर्जिह्वा, सास्मिन्नुद्यत इति काकुदम्। 'सूर्म्यं सुषिरामिव'। तद्यथा-शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः सप्तविभक्तयस्ताल्वनुक्षरन्ति। तेनासि सत्यदेवः। सत्यदेवाः स्यामेत्यध्येयं व्याकरणम्।

(सुदेवो असि)*

त्रिपुरुषाः तान् अनुकायति वदति इति तथा। नामकरणाधिकारिणो जातपितुः पितृपितामहप्रपितामहान्यतमवाचकम् । " अनरिप्रतिष्ठितम् " शत्रुप्रतिष्ठितं (शत्रुवाचकं) यन्न भवति ।

" द्व्यक्षरम् " स्वरद्वययुक्तम् हरि-हर-इत्यादिकं, चतुरक्षरम् वा स्वर-चतुष्टययुक्तं वा, कृतं कृत्प्रत्ययान्तं देवदत्त-विष्णुमित्रादिरूपं नाम कुर्यात् न ताद्धितान्तमिति ।

व्याकरणज्ञानात् पुण्यविशेषेण वरुणेन यादृशं फलं प्राप्तं, तादृशं सर्वैः व्याकरणज्ञानेन प्राप्तुं शक्यते इत्याह "सुदेवो असीति" 'प्रकृत्याऽन्तः पाद-मव्यपरे' इति प्रकृतिभावः। हे वरुण ! त्वं (व्याकरणज्ञानेन) सुदेवः सत्यदेवः (साधुशब्दभाषी देवः) असि, यस्य (जलाधिष्ठातुः) ते सप्त सिन्धवः-सप्तविभक्ति-तुल्याः सप्त समुद्राः काकुदं-तालु अनुप्राप्य क्षरन्ति-निर्गच्छन्तः, प्रकाशन्ते। काकुदस्थं च पापं निर्दहन्ति। तत्र दृष्टान्तमाह-अग्निः सुषिरां सुषिः-छिद्रम् अस्या अस्ति इति सुषिरां सच्छिद्रां सूर्म्यं सूर्मिं (सूर्मिःस्थूणाऽयःप्रतिमा इति कोषः) शोभनाम् अयःप्रतिमाम् अन्तः प्रविश्य तत्रत्यं मलं भस्मीकृत्य यथा प्रतिमां शुद्धां करोति, एवं सप्त समुद्राः जलाधिष्ठातुः, सप्त विभक्तयश्च वैयाकरणस्य

---

*--(ऋ० सं० ८ । ६९ । १२)

(जिज्ञासा)-किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते, न पुनरन्यदपि किंचित् 'ओं' इत्युक्त्वा वृत्तान्तशः शमित्येवमादीन् शब्दान् पठन्ति ?।

(समाधानभाष्यम्)-पुराकल्प एतदासीत्-संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। तेभ्यस्तत्तत्स्थान*करणना†दानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते। तदद्यत्वे न तथा। वेदमधीत्य त्वरिता वक्तारो भवन्ति—

तालुदेशे प्रकाशं प्राप्य शारीरं पापं दूरीकुर्वन्ति। तथा च वरुणेन सह साम्य-प्राप्तये व्याकरणाध्ययनमावश्यकम्।

ननु व्याकरणं पिपाठिषद्भ्य इदं गौणं मुख्यं च प्रयोजनं यथाऽन्वाख्यायते एवं वेदमन्यवेदाङ्गानि च पिपठिषद्भ्योऽपि प्रयोजनमन्वाख्येयम्। यदि तु "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति" श्रुत्या नित्यत्वात् प्रत्यवायपरिहाराय वेदाध्ययनं, न तु काम्यफलायेत्युच्येत, तत् प्रधानवेदाङ्गे व्याकरणेऽपि तुल्य मिति—आशङ्कते—"किं पुनरिद'-मित्यादि। 'न पुनरन्यदपि किञ्चि'दिति। वेदाध्ययनवत् नित्यत्वात् प्रयोजनानुसन्धानं विनैवास्याप्यध्ययनासिद्धिः। अत एव वेदाध्यायिनः ओमित्युक्त्वा (अभ्युपेत्य) 'शन्नो देवीः' इत्यादीन् शब्दान् वृत्तान्तशः-प्रपाठकशः अद्यत्वे पठन्ति। अन्यथा वेदाध्ययनेऽपि प्रयोजनं वर्णनीयामित्यर्थः।

विभागेनोत्तरमाह—पुरा कल्पे इत्यादि, स्थानं ताल्वादि, करणम्—आभ्यन्तरप्रयत्नः, नादम्—अनुप्रददति ते नादानुप्रदानाः, नादप्रयत्नवन्त इत्यर्थः। नादग्रहणेन सर्वे बाह्यप्रयत्ना उपलक्ष्यन्ते, अयं भावः—वेदाध्ययनकाले बाल्यावस्थाव-

---

*—स्वराणां यत्रोपसँहारस्तत् स्थानम् तै० प्रा० अ० २ सू० ३१।
यदुपसँहरति तत् करणम् ,, ,, ,, ,, ३२।
अन्येषां तु यत्र स्पर्शनं तत् स्थानम् ,, ,, ,, ,, ३३।
येन स्पर्शयति तत् करणम् ,, ,, ,, ,, ३४।
†—नादोऽनुप्रदानँ स्वरघोषवत्सु। ,, अ० १ सू० ८।
अघोषेषु श्वासः ,, ,, ,, ,, १०।

'वेदान्नो वैदिकाः शब्दाः सिद्धा, लोकाच्च लौकिकाः । अनर्थकं व्याकरणम्' इति ॥ तेभ्य एवं विप्रातिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे–इमानि प्रयोजनान्यध्येयं व्याकरणम्–इति ॥

(उपसंहारभा०) उक्तः शब्दः । स्वरूपमप्युक्तम् । प्रयोजनान्यप्युक्तानि ।

(अनुशासनरीतिनिरूपणाधिकरणम्)

शब्दानुशासनमिदानीं कर्त्तव्यम् । तत्कथं कर्त्तव्यम् । किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेशः, आहोस्विदुभयोपदेश इति, अन्यतरोपदेशेन कृतं स्यात् । तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते । 'पञ्च पञ्चनखा भक्ष्याः' इत्युक्ते गम्यते एतद्—'अतोऽन्येऽभक्ष्या' इति । अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः । तद्यथा 'अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकरः' इत्युक्ते गम्यत एतद्–'आरण्यो भक्ष्य' इति । एवमिहापि–यदि तावच्छब्दोपदेशः क्रियते, गौरित्येतस्मिन्नुपदिष्टे गम्यत एतद् 'गाव्यादयोऽपशब्दाः' इति । अथापि अपशब्दोपदेशः क्रियते, गाव्यादिषूपदिष्टेषु गम्यते एतत् – गौरित्य... शब्द...

त्वात् प्रयोजनजिज्ञासामध्येतारो न कुर्वन्ति, व्याकरणाध्ययनकाले तु प्रौढावस्थावत्त्वात् तेषां प्रयोजनजिज्ञासा उदेति, इति । 'सुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे' इति । अत्राचार्य्यः-पतञ्जलिः, इदं शास्त्रं–प्रयोजनान्वाख्यानरूपम् ।

"अथ शब्दानुशासन"मित्यत्र 'पदपदार्थज्ञानं वाक्यार्थबोधे कारण' मिति विधया अपेक्षितं शब्दपदार्थं, तत् स्वरूपमावश्यकत्वात् प्रयोजनञ्चोक्त्वा अनुशासनपदार्थमिदानीमाह—तत् कथं कर्तव्यमित्यादिना । साधुशब्दोपदेशे उपादेयकथनं विधिर्भवति । असाधुशब्दोपदेशे तु तत्प्रयोगनिषेधो भवति । उभयोपदेशे च विधिनिषेधयोः स्पष्टा प्रतिपत्तिर्भवति । तत्रान्यतरोपदेशेनापि विधिनिषेधयोः क्रमेण श्रुत्याऽर्थापत्त्या च गम्यमानत्वमित्यत्र "पञ्च पञ्चनखा भक्ष्याः, अभक्ष्यो ग्राम्यकुक्कुटः" इत्याद्युदाहरणम् ।

शशकी शल्यकी गोधा कूर्मी खड्गी च पञ्चमः ।
इति पञ्चनखाः पञ्च ।

किं पुनरत्र ज्यायः ? । लघुत्वाच्छब्दोपदेशः । लघीयाञ्छब्दोपदेशः । गरीयानपशब्दोपदेशः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । इष्टान्वाख्यानं खल्वपि भवति ॥ तत्र यथा गौरित्यस्य शब्दस्य गावी-गोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः

अथैतस्मिञ् शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्त्तव्यः । गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः ? ॥ नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः एवं हि श्रूयते—'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम ।' बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो, न चान्तं जगाम, किं पुनरद्यत्वे । यः सर्वथा चिरञ्जीवति वर्षशतं जीवति । चतुर्भिश्च प्रकारै र्विद्योपयुक्ता भवति—आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति, तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात् । तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः ।

इदानीं कल्पद्वये न्याय्यत्वं विचारयति । किं पुनरत्र ज्याय इति । अत्र–कल्पद्वये, लाघवात् उपादेयत्वेनेष्टत्वाच्च साधुशब्दोपदेशकल्प एव ज्यायान्, इत्युत्तरम् । शङ्कते—साधुशब्दोपदेशकल्पेऽपि साकल्येन शब्दज्ञाने प्रतिपदपाठ उपायः, उत उत्सर्गापवादात्मकोऽनुगमः, तत्राद्यमिन्द्रबृहस्पति-दृष्टान्तेन निषेधति-नेत्याहानभ्युपाय एष इत्यादिना । दिव्यं वर्षसहस्रमिति—मनुष्याणामेकं सौरं (मेषसंक्रान्तितः सूर्यस्य पुनर्मेषसंक्रमणपर्यन्तम्) वर्षं देवानामेकं दिनं भवति । तादृशानि षष्ट्युत्तरशतत्रयमितानि दिनानि दिव्यमेकं वर्षं, तादृशवर्षाणां सहस्रमित्यर्थः । शब्दपारायणमिति—शास्त्र विशेषस्य योगरूढं नामैतत् । आगमकालः–गुरुमुखात् श्रुत्वा ग्रहणकालः । स्वाध्यायकालः–चिन्तनाभ्यासकण्ठीकरणादिकालः । प्रवचनकालः–पाठनकालः, व्यवहारकालः–याजनादिकालः । उत्सर्गापवादयोर्लक्षणमाह–सामान्येनोत्सर्ग इत्यादि ।

कथं तर्हीमे शब्दाः प्रतिपत्तव्याः ?॥ किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम् । येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् ॥ किं पुनस्तत् ?। उत्सर्गापवादौ ।। कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः ।। कथंजातीयकः पुनरुत्सर्गः कर्तव्यः, कथंजातीयकोऽपवादः ?॥ सामान्येनोत्सर्गः कर्तव्यः । तद्यथा--'कर्मण्यम्* ' तस्य विशेषेणापवादः । तद्यथा-'आतोऽनुपसर्गे कः'† ।।

(पदानां जाति-व्यक्तिवाचकत्वनिर्णयाधि०)

किं पुनराकृतिः पदार्थः, आहोस्विद् द्रव्यम् ?। उभयमित्याह । कथं ज्ञायते ? । उभयथा ह्याचार्येण सूत्राणि पठितानि--आकृतिं पदार्थं मत्वा—'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ‡' इत्युच्यते । द्रव्यं पदार्थं मत्वा 'सरूपाणाम् $—' इत्येकशेष आरभ्यते ॥ किं पुनर्नित्यः शब्दः, आहोस्वित्कार्यः ? । संग्रह एतत्प्राधान्येन परीक्षितम्—नित्यो वा स्यात्कार्यो वेति । तत्रोक्ता दोषाः ॥ प्रयोजनान्य-

---

अथ उत्सर्गापवादाभ्यां लक्षणं प्रवर्त्यमिति सिद्धे तल्लक्षणस्थानि पदानि किं जातिबोधकानि, उत व्यक्तिबोधकानि इति जिज्ञासया, किं च सकृद्गतिन्याय—पुनःप्रसङ्गविज्ञानादिन्यायानां जातिव्यक्तिपक्षयोः अन्यतराश्रयणे न सिद्धिः, किन्तु उभयाश्रयणे इति दृढीकरणाय शङ्कते-किं पुनराकृतिः पदार्थ इत्यादि । उतरमाह—उभयमिति । ननु व्याकरणेनान्वाख्यायमानः शब्दो ध्वनिव्यङ्ग्यनित्यवर्णरूपः (मीमांसकाभिप्रेतः) अथवा ध्वनिव्यङ्ग्यो नित्यपदवाक्यस्फोटरूपः (वैयाकरणाभिप्रेतः) उत सार्थकध्वनिरूपो ऽनित्यः (नैयायिकाभिप्रेतः) इत्याशङ्क्योत्तरमाह-संग्रहे इत्यादिना । संग्रहो नाम व्याडिमहर्षिकृतो लक्षसंख्यश्लोकात्मको ग्रन्थः, तत्र दोषाः प्रयोजनानि चोक्तानीति । तथा हि—वर्णनित्यत्वे व्यापकस्य तस्य विकारासंभवाद् इकः स्थाने यण् न स्यात् । कार्यत्वपक्षे तत्तच्छब्दानन्तर्यरूपसंहिताया अभावाद् यणादिर्न स्यात् ।

---

*—(३ । २ । १)†—(३ । २ । ३)
‡—(१ । २ । ५८)$—(१ । २ ६४)

प्युक्तानि। तत्र त्वेष निर्णयः+यद्येव नित्यः, अथापि कार्यः, उभयथापि लक्षणं प्रवर्त्यमिति।

(शब्दनित्यत्वे शास्त्रस्य धर्मजनकतानिर्णयाधि०)॥

कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्—

* सिद्धे शब्दार्थसम्बन्धे ? १-१ *

सिद्धे शब्दे अर्थे सबन्धे चेति। अथ सिद्धशब्दस्य कः पदार्थः ?। नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते ?। यत्कूटस्थेष्वविचालिषु भावेषु वर्तते। तद्यथा—सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति ननु च भोः कार्येष्वपि वर्तते। तद्यथा-सिद्ध ओदनः, सिद्धः सूपः, सिद्धा यवागूरिति। यावता कार्येष्वपि वर्तते, तत्र कुत एतन्नित्यपर्या-

---

तथा प्रत्ययादिकस्य प्रकृतेः परत्वादिविधानं न स्यात्—इत्यादयो दोषाः। तथा अनवयवस्य स्फोटस्य नित्यस्य व्यञ्जकध्वनिधर्मेणान्वाख्यानम् "इकोयणचि" इत्यादिना च स्थानिबुद्धिप्रसङ्गे आदेशबुद्धिः कर्तव्या, इति बुद्धिविपरिणाममात्रं बोध्यते इत्यादि व्याकरणस्य प्रयोजनं चोक्तम्। उभयथेति नित्यानित्यपक्षद्वये इत्यर्थः।

अथ पाणिनिशास्त्रारम्भसमर्थनाय 'उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते। तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा विचक्षणाः'। विष्णुध० इति वार्तिकलक्षण-लक्षितं कात्यायनकृतमाद्यं वार्तिकमाक्षेपरूपेणावतारयति-कथं पुनरिदमिति। 'सिद्धे शब्दार्थसम्बन्धे इति—शब्दश्च अर्थश्च सम्बन्धश्च एषां समाहारः शब्दार्थसम्बन्धं तस्मिन्, सिद्धशब्दस्य प्रत्येकमन्वयः—द्वन्द्वादौ द्वन्द्वान्ते द्वन्द्वसमीपे च श्रूयमाणं पदं प्रत्येकमभिसंबध्यते इति न्यायात्' सुसूक्ष्मजट-केशेन, प्रादिपदिकार्थलिङ्गपरिमाणवचनमात्रे, वन्यौ मातापितरौ, इति क्रमेणोदाहरणानि।

सिद्ध शब्दो नित्यवाचकः, सिद्धा द्यौः इत्यादौ कूटस्थेषु (अविनाशिषु) अविचालिषु (देशान्तरप्राप्तिरहितेषु) तत्प्रयोगात्। सिद्ध ओदन इत्यादौ कार्येऽपि सिद्धशब्दप्रयोगः इति द्वैधात् शङ्कते—कुत एतन्नित्यपर्यायवाचिनो

यवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्द इति । संग्रहे तावत्कार्य-प्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति । इहापि तदेव। 'अथवा सन्त्येकपदान्यप्यवधारणानि। तद्यथा–अब्भक्षो वायुभक्ष इति–अप एव भक्षयति, वायुमेव भक्षयतीति गम्यते । एवमिहापि सिद्ध एव, न साध्य इति। अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः–अत्यन्तसिद्धः सिद्ध इति। तद्यथा–– देवदत्तो दत्तः, सत्यभामा भामेति। अथवा' व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्'' इति नित्यपर्यायवाचिनो ग्रहण-मिति व्याख्यास्यामः ।

ग्रहणमित्यादि । उत्तरं-संग्रहे (व्याड़िग्रन्थे) कार्यप्रतिपक्षार्थाभिधायी सिद्धशब्दः सामर्थ्यात् वर्णितः । तत्समानतन्त्रत्वाद् इहापि सिद्धशब्दो नित्यार्थक इति ।

अथवा एव—शब्दसत्त्वे द्विपदमवधारणम्, द्योतकत्वेन एवशब्दाप्रयोगे तु एकपदमवधारणम् इत्युच्यते, अतएव "इकोयणऽचि" इत्यादौ यण् भवत्येव इति सूत्रे एवपदाभावेऽपि अवधारणं भवति । एतन्मूलक एव "सर्वं वाक्यं सावधारण" मिति न्यायः प्रसिद्धः, इत्याशयवानाह–सन्त्येकपदा-न्यप्यवधारणानीति ।

अथवा 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोप इष्टः' इति वार्तिकेन 'अत्यन्त' इति पूर्वपदस्य लोपे "यः शिष्यते स लुप्यमानार्थाभिधायीति" न्यायेन अवशिष्टः सिद्धशब्द एव अत्यन्तसिद्ध इत्यर्थकः, अत्यन्त इत्यर्थबलाच्च कार्यार्थकस्य सिद्धशब्दस्य न ग्रहणम् इत्यर्थः ।

अथवा व्याख्यानत इति, विशेषस्य–अन्यतराद्यर्थरूपस्य व्याख्यानतः भाष्यकृदादिकृतव्याख्यानात् प्रतिपत्तिः–निश्चयः (प्रतिपत्तॄणां) संदेहात् शास्त्रम्, अलक्षणं न, अननुष्ठापकं लक्षणमलक्षणं तथा न। शास्त्रस्य निर्णय-जनकत्वस्वाभाव्यात्, अस्माकं सन्देहमात्रेण शास्त्रं दुष्टं न भवति, किन्तु अभियुक्तव्याख्यानाद् अर्थनिश्चयं कृत्वा स्वकीयसंदेहदूरीकरणं श्रोतॄणां कर्तव्यमिति भावः ।

किं पुनरनेन वर्ण्येन। किं न महता कण्ठेन नित्यशब्द एवोपात्तः, यस्मिन्नुपादीयमानेऽसंदेहः स्यात्?। मङ्गलार्थम् । माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते, वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति। अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते। किं तर्हि! आभीक्ष्ण्येऽपि वर्तते। तद्यथा नित्यप्रहसितो नित्यप्रजल्पित इति। यावताभीक्ष्ण्येऽपि वर्त्तते तत्राप्यनेनैवार्थः स्यात्—'व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्' इति । पश्यति त्वाचार्यो मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति, शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति । अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः ।

अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते—'सिद्धे शब्देऽर्थे सम्बन्धे चेति। आकृतिमित्याह। कुत एतत्?। आकृतिर्हि नित्या,

---

माङ्गलिकः—मङ्गलप्रेप्सुः कात्यायनः शास्त्रादौ मङ्गलार्थं नित्यशब्दं विहाय सिद्धशब्दं प्रयुक्तवान् । तत्र फलमाह—'**मङ्गलादीनि**' इत्यादि। **वीरपुरुषाणीति**—वीराः पुरुषाः येषां तानि, श्रोतॄणां परैः अपराजयात्। "**आयुष्मत्पुरुषाणीति**"—पूर्ववद् बहुव्रीहिः, शास्त्रानुष्ठाने धर्मोपचयादायुर्वर्धनात्। "**सिद्धार्था**" इति—अध्ययनसम्पन्ना इत्यर्थः।

किं च नित्यशब्दोपादानेऽपि किमयं नित्यशब्दो नित्यप्रहसितादिवत् आभीक्ष्ण्यार्थकः, उत नित्या द्यौः, इतिवद् अविनाश्यर्थकः, इति शङ्कोदयेन तत्रापि व्याख्यानादेव इष्टसिद्धिः स्यात् । एवं च नित्यशब्दसिद्धशब्दयोः अन्यतरोपादाने समानैव व्याख्यानाधीना गतिः । केवलं मङ्गललोभेन सिद्धशब्दप्रयोग आदृत इत्याह-**अयं खल्विति** ।

ननु शब्दश्चार्थश्च सम्बन्धश्चेति त्रयाणां समाहारः, इत्युक्तम् । तत्रार्थशब्देन किदृशोऽर्थोऽभिप्रेतः । यत्र सिद्धपदार्थस्य (नित्यत्वस्य) अन्वयः सम्भवेत्—इत्याशङ्कोत्तरमाह-**आकृतिमिति**, जातिरूपार्थस्य नित्यत्वेन सा

द्रव्यमनित्यम् । अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः ?। सिद्धे शब्दे अर्थसम्बन्धे चेति । नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः । अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः-- सिद्धे शब्दे अर्थे सम्बन्धे चेति । द्रव्यं हि नित्यमाकृतिरनित्या । कथं ज्ञायते ? । एवं हि दृश्यते लोके मृत्कयाचिदाकृत्या युक्ता पिण्डो भवति, पिण्डाकृति मुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते, पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः । आकृतिरन्या चान्या च भवति द्रव्यं पुनस्तदेव । आकृत्युपमर्देन द्रव्यमेवावशिष्यते ॥

आकृतावपि पदार्थ एष विग्रहो न्याय्यः--सिद्धे शब्दे अर्थे सम्बन्धे

अर्थपदवाच्या इत्यर्थः । द्रव्यस्य अर्थपदवाच्यत्वे तु तस्य अनित्यत्वात् शब्दश्चार्थसम्बन्धश्चानयोः समाहार इति विग्रहः स्यात् । ननु शब्दप्रतियोगिकः अर्थानुयोगिकः यः शक्तिरूपः सम्बन्धः, तस्य अनुयोगिभूतः पदार्थो द्रव्यरूपो यदि अनित्यः, तर्हि कथं सम्बन्धस्य नित्यत्त्वम् । अत आह—नित्यो ह्यर्थवतामिति । अयं भावः—नित्यस्य स्फोटरूपशब्दस्य बौद्धार्थेनैव तादात्म्यं तदेव च शक्तिः, सच बौद्धो ऽर्थ एव (अध्यातमभावापन्नः) बहिः तत्तत्स्थूलरूपेण भौतिकेन परिणमते । तस्य च अनित्यत्वम् । तद्बीजभूतः सूक्ष्मो ऽर्थ आन्तरो वासनारूपत्वात् स्थिरः, तेन सह शब्दस्य नित्यं सम्बन्धमादाय स्थूलार्थेऽपि शब्दस्य नित्यः सम्बन्ध इति व्यवहारः, इति ।

इदानीमद्वैतपक्षे जातेरपि अनित्यत्वात् "आत्मैवेदं सर्वमिति" श्रुत्या असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वमेव सर्वत्र तत्तदुपाधिवैशिष्ट्येन तत्तच्छब्दवाच्यम्, तच्च नित्यम्, तदेव द्रव्यशब्देनाभिधीयते । आकृतिशब्देन च अवयवसंस्थानमभिप्रेयते इति पक्षमादायाह—"**अथवा द्रव्य एव पदार्थ एष विग्रहो न्याय्य**" इति । अस्मिँश्च पक्षे नित्यस्य लक्षणं तदेव, यद्ब्रह्ममात्रे समन्वितं वक्ष्यमाणं **ध्रुवं कूटस्थ**मित्यादि बोध्यम् ।

अद्वैतेन लोके व्यवहाराभावात् व्यवहारे च आकृतेः (जातेः) एकाकारपरामर्षहेतुत्वाद् व्यावहारिकं नित्यत्वमित्यभिप्रेत्याह—**आकृतावपि**

चेति। ननु चोक्तं—आकृतिरनित्या, इति। नैतदस्ति। नित्याऽऽकृतिः। कथम्?। न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति। द्रव्यान्तरस्था तूपलभ्यते।

अथवा नेदमेव नित्यलक्षणम्—ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्य-वृध्द्यव्यययोगि यत्तन्नित्यमिति। तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते। किं पुनस्तत्त्वम्। तद्भावस्तत्त्वम्। आकृतावपि तत्त्वं न विहन्यते

पदार्थे' इत्यादि। अस्मिंश्च पक्षे नित्यत्व लक्षणं यावद्व्यवहारस्थायित्वरूपम् इत्याह–**अथवा नेदमेव नित्यलक्षणमिति**। **ध्रुवं कूटस्थमित्यादौ** ध्रुवशब्दस्य व्याख्यानं—कूटस्थमिति। कूटमयोघनः तद्वत्तिष्ठतीति कूटस्थम्। अनेन संसर्गानित्यता परिहृता, सा च यथा स्फटिकस्य लाक्षाद्युपधाने स्वरूपतिरोधानेन पररूपावभासः, तत्र उपधानापगमे स्वरूपप्रतिभासात् परिणामानङ्गीकारः। **अविचालीति**। रूपान्तरापत्तिर्विचालः, यथा पयसो दध्यादिरूपता, सोऽस्यास्तीति विचालि, तद्भिन्नमविचालि, अनेन विशेषणेन परिणामानित्यता परिहृता।

अग्रे अनपायोयजनविकारि, अनुत्पत्ति, अवृद्धि, अव्यययोगि इति पदच्छेदः। एभि र्विशेषणैः षण्णां भावविकाराणामसम्बन्ध उच्यते। तत्र उत्पत्तेः सत्तापर्यन्तत्वात् 'अनुत्पत्ति' इत्यनेन जन्मसत्तारूपौ भावविकारौ परिहृतौ। 'अवृद्धि' इत्यनेन तृतीयो वृद्धिलक्षणः। अपायो–अपचयः, उपजनः–विपरिणामः, तौ च तौ विकारौ अस्य स्तः, तत् अपायोपजन विकारि, तद्भिन्नम्, अनेन पञ्चमचतुर्थौ अपक्षयविपरिणामरूपौ निरस्तौ। व्ययो विनाशः, तद्योगो ऽस्यास्तीति व्यययोगि, तद्भिन्नम्। अनेन षष्ठो विनाशः परिहृतः, इति षड्भावविकारासम्बन्धप्रदर्शनेन प्रध्वंसानित्यता परिहृता। एवं च संसर्ग-परिणाम-प्रध्वंसानित्यतारहितत्वरूपमेव नित्यत्वलक्षणं नाभिप्रेतं, किन्तु आश्रयद्रव्ये नष्टेऽपि तद्वृत्तिर्धर्मः गोत्वादिरूपो यो न विहन्यते, सोऽपि नित्यः, अपरस्मिन्नाश्रये विद्यमानत्वात्। एवं च आश्रयप्रवाह–नित्यत्वाद् आश्रितस्य नित्यत्वमित्याह–**तदपि नित्यं यस्मिन् तत्त्वं न विहन्यते** इति।

अथवा किं न एतेन–इदं नित्यमिदमनित्यमिति। यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते—सिद्धे शब्देऽर्थे सम्बन्धे चेति॥

कथं पुनर्ज्ञायते—सिद्धः शब्दोऽर्थः सम्बन्धश्चेति।

* लोकतः १-२ *

यल्लोकेऽर्थमर्थमुपादाय शब्दान् प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते। तद्यथा–घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह–'कुरु घटं, कार्यमनेन करिष्यामीति, न तद्वच्छब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह–कुरु शब्दान् प्रयोक्ष्ये' इति तावत्येवार्थमुपादाय शब्दान्प्रयुञ्जते॥

यदि तर्हि लोक एषु प्रमाणं, किं शास्त्रेण क्रियते?॥

* **लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः १-३** *

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते॥ किमिदं धर्म-

---

ननु अस्मिन्नपि पक्षे शशशृङ्गादीनां पदार्थत्वं न स्यात् शशशृङ्गत्वस्य प्रवाहनित्यतायाः कूटस्थनित्यताया वा अभावात् इत्याशंक्याह–**अथवा किन्न एतेन** इत्यादि। **यद् नित्यं तं पदार्थं मत्वैष विग्रह इति**। अयं भावः। शशशृङ्गादीनां बाह्यत्वाभावेऽपि बौद्धत्वमस्त्येव, सर्वत्र शाब्दबोधे बोद्धपदार्थ एव विषयो न तु बाह्यः, बौद्धश्च प्रवाहनित्यः, तमेव मत्वा एष विग्रह इति।

अथ शब्दार्थसम्बन्धानां नित्यत्वे प्रमाणं पृच्छति–**कथं पुनर्ज्ञायते** इति। उत्तरमाह–**लोकत** इति, लोकव्यवहारलिङ्गकानुमानेनेत्यर्थः। लोकस्य प्रत्यक्षादीनामिव स्वातन्त्र्येण प्रामाण्याभावात्। तथाचानुमानम्–शाब्दबोधौपयिकशब्दार्थसम्बन्धाः नित्याः, अनादिवृद्धव्यवहारपरम्पराव्युत्पत्तिपूर्वकव्यवहारविषयत्वात्। यन्नैवं तन्नैवं यथा घटादि, तदाह–**यल्लोके ऽर्थमर्थमुपदायेति**।

शङ्क्यते–यदि लोक व्यवहारेणैव अनादिपरम्परागतेन शब्दार्थसम्बन्धानां ज्ञानं भवति, तर्हि शास्त्रेण किं क्रियते। उत्तरमाह–**'लोकत' इति**। लोकत इत्यस्यावृत्त्या एकेनांशेन लोकतः शब्दार्थसम्बन्धानां नित्यत्वं ज्ञायते इत्युक्तम्। अपरस्य लोकत इत्यस्य अर्थप्रयुक्ते इत्यत्रान्वयः। लोके अर्थेन आत्मप्रत्यायनाय प्रयुक्तो अर्थप्रयुक्तः, तादृशे शब्दप्रयोगे शास्त्रेण–व्याकरणशास्त्रेण धर्मनियमः क्रियते।

नियम इति ?। धर्माय नियमो धर्मनियमः, धर्मार्थो वा नियमो धर्मनियमः। धर्मप्रयोजनो वा नियमो धर्मनियमः ॥

ॐ यथा लौकिकवैदिकेषु १-४ ॐ

प्रियतद्धिता दाक्षिणात्याः-यथा लोके वेदे चेति प्रयोक्तव्ये 'यथा लौकिकवैदिकेषु' इति प्रयुञ्जते। अथवा युक्त एवात्र तद्धितार्थः। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु॥ लोके तावद् 'अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकर' इत्युच्यते। भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते। शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्, तत्र नियमः क्रियते, इदं भक्ष्यमिदमभक्ष्यमिति। तथा खेदात्स्त्रीषु प्रवृत्तिर्भवति। समानश्च खेद-

---

धर्मस्य नियमः धर्मनियमः इति षष्ठीसमासः। धर्मार्थो वा नियम इति मध्यमपदलोपी समासः। धर्मस्य नियमेन सह उपकार्योपकारकभावः सम्बन्ध इति बोधयितुं धर्माय नियम इति भाष्ये उक्तम्। न तु तादृशो विग्रहः सम्भवति। प्रकृतिविकारभावे एव तादर्थ्यचतुर्थीसमासनियमात्। अत्र द्विविधेऽपि समासे धर्मशब्देन पुण्यविशेष उच्यते

प्राभाकारमतेन तृतीयं पक्षमाह—धर्मप्रयोजनो वा नियम इति। अत्रापि मध्यमपदलोपी समासः। धर्मः-लिङादिपदवाच्यं कार्य्यं प्रयोजनः प्रयोजको यस्य इति धर्मप्रयोजनः। नियोगाख्येन कार्येण प्रयुक्त इत्यर्थः। तथा च प्राभाकराः—स्वात्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये।

कुर्वत् स्वर्गादिकमपि प्रधानं कार्यमेव नः॥ इति।

तत्र दृष्टान्तमाह-"यथा लौकिकवैदिकेषु" समुदायशब्दा अवयवेष्वपि प्रवर्तन्ते इति न्यायेन लोके वेदे इति प्रयोक्तव्ये प्रियतद्धितत्वाद् अध्यात्मादित्वात् भवार्थे ठञ्। अत्रावयवावयविनोर्विभागो भवार्थ प्रयोजक आरोपित इत्यरुच्याह-अथवेति। कृतान्तेषु (सिद्धान्तेषु) इति पदमध्याहृत्य तद्विशेषणत्वेन लौकिकवैदिकपदं भवार्थप्रत्ययान्तमावश्यकमेव, तेन च लोके वेदे च भवायां शाब्दीभावनायामार्थीभावनायां चेति फलितम्। लोके तावत्-"अभक्ष्यो ग्राम्यकुक्कुटः" इति तथा खेदात् स्त्रीषु प्रवृत्तिर्भवति इति। खेदो-रागः खिन्ते इष्टालाभे दैन्यमु-

विगमो गम्यायां चागम्यायां च तत्र नियमः क्रियते—इयं गम्येयमगम्येति ॥

वेदे खल्वपि–'पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्यः'' इत्युच्यते। व्रतं च नामाभ्यवहारार्थमुपादीयते। शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम्। तत्र नियमः क्रियते ॥ तथा—'बैल्वः खादिरो वा यूपः स्यात्' * इत्युच्यते। यूपश्च नाम पश्वनुबन्धार्थमुपादीयते। शक्यं चानेन यत्किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्धुम्। तत्र नियमः क्रियते ॥ तथा–'अग्नौ कपालान्याधिश्रित्याभिमन्त्रयते-'भृगूणामङ्गिरसां धर्मस्य तपसा तप्यध्वम्' इति। अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि संतापयति। तत्र च नियमः क्रियते–एवं क्रियमाणमभ्युदयकारि भवतीति ॥ एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते--शब्देनैवार्थोऽभिधेयो नापशब्देनेति ॥ एवं क्रियमाणमभ्युदयकारि भवतीति ॥

त्पादयति इति खेदः, तादृशश्च रजोगुणकार्यविशेषो राग एव। गम्या-स्वेन ऊढा। अगम्या-तदन्या। वेदे खल्वपि पयोव्रतमित्यादि। पयो दुग्धं ज्योतिष्टोमदीक्षावसरे भोज्यं यस्य। 'व्रताद् भोजनतन्निवृत्त्योः' इति उभयत्र णिच्स्मरणात्। यवागूः–उष्णिका, आमिक्षा (तप्ते पयसि दधनि प्रक्षिप्ते सति विशीर्णस्य पयसो यो घनभागः, सा आमिक्षा, यो द्रवभागः, तद्वाजिनसंज्ञकम्) इति प्रसिद्धम्। तथा यूपः-अष्टाश्रीकृतो यज्ञियपशुबन्धनस्तम्भविशेषः। कपालानि पुरोडाशश्रपणार्थानि आकारविशेषविशिष्टानि पाषाणशकलानि।

अत्र सर्वत्र दृष्टप्रयोजने ऽन्यथा सिद्धेऽपि एवमेव कर्तव्यमिति नियमबलात् नियमादृष्टं कल्प्यते, एवं व्यवहारेऽपि अपशब्दैः साधुशब्दैश्चार्थबोधे समानेऽपि साधुशब्देनैवार्थो अभिधातव्य इति नियमबलाद् नियमादृष्टं कल्प्यते।

तत्र अपभ्रंशैः अर्थबोधोत्पत्तौ मतभेदेन प्रकारद्वयम्-केचन मन्यन्ते-अपभ्रंशैः साधुशब्दस्मरणद्वारा शाब्दबोधः, तथा च अपभ्रंशेषु शक्तिर्नास्ति साधुत्वमपि नास्ति, साधुष्वेव शक्तिः, ततश्च शक्तत्वं साधुत्वं चैकमेव पर्यवसन्नम् इति।

तथा च हरिः—

ते साधुष्वनुमानेन, प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्यैव, शब्दार्थस्य प्रकाशकाः ॥१॥
न शिष्टैरनुगम्यन्ते, पर्याया इव साधवः ।
ते यतः स्मृतिशास्त्रेण, तस्माद् साक्षादवाचकाः ॥२॥
अम्बाऽम्बेति यथा बालः शिक्षमाणः प्रभाषते ।
अव्यक्तं, तद्विदां तेन व्यक्ते भवति निर्णयः ॥३॥
एवं साधौ प्रयोक्तव्ये, योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥४॥

अपरे मन्यन्ते-साक्षादपभ्रंशा एव वाचकाः, मध्ये साधूनां स्मरणव्यवधानं न भवति, प्रत्युत स्त्रीशूद्रादीनां साधुशब्दस्यार्थसंशये ऽपभ्रंशेन तन्निर्णयः । तस्माद् अपभ्रंशेषु शक्तत्वमस्त्येव, पुण्यजनकतावच्छेदकधर्मविशेषरूपं साधुत्वं तु नास्तीति विशेषः । तथाच हरिः—

पारम्पर्यादपभ्रंशाः विगुणेष्वभिधातृषु ।
प्रसिद्धिमागता येषु, तेषां साधुरवाचकः ॥१॥
दैवी वाग् व्यकीर्णेयमशक्तैरभिधातृभिः । इति ।

अत्र मते शक्तत्वं साधुत्वं च भिन्नमिति पर्यवसन्नम् ।

ननु साधूनामेव प्रयोगः कर्तव्यः, नासाधूनां इति नियमे सिद्धे शास्त्रेण साधूनां स्वरूपं विविच्योच्यते इत्यवगतम् । परन्तु येषाम्, ऊष तेर इत्यादीनां प्रयोग एव नास्ति तेषां साधुत्वानुशासनं किमर्थं मित्याशयवान् आह–"अस्त्य प्रयुक्त" इति । किं च प्रयुक्तेषु साध्वसाधुषु प्रयुक्तसाध्वन्वाख्यानेन तेषु धर्मः, प्रयुक्तासाधुषु अधर्मः, इत्यर्थकेन "लोकतोऽर्थप्रयुक्ते" इत्यादिवार्तिकेन एष व्याकरणस्मृतिः प्रयोगमूलिका इति फलितम् । तथा च अप्रयुक्ताना मप्रयोगेणैव असाधुत्वानुमानाद् असाधूनां उष तेर इत्यादीनामनेनान्वाख्यानात्

सन्ति वै शब्दा अप्रयुक्ताः । तद्यथा—ऊष, तेर, चक्र, पेचेति ॥ किमतो यत्सन्त्यप्रयुक्ताः ? ॥ प्रयोगाद्धि भवान् शब्दानां साधुत्वमध्यवस्यति । ये इदानीमप्रयुक्ता नामी साधवः स्युः ॥ इदं तावद्विप्रतिषिद्धम्--यदुच्यते--सन्ति वै शब्दा अप्रयुक्ता इति । यदि सन्ति, नाप्रयुक्ताः; अथाप्रयुक्ता न सन्ति, सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम् । प्रयुञ्जान एव खलु भवानाह--सन्ति शब्दा अप्रयुक्ता इति । कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात् ? । नैतद्विप्रतिषिद्धम् । सन्तीति तावद्ब्रूमः, यदेताञ्शास्त्रविदः शास्त्रेणानुविदधते । अप्रयुक्ता इति ब्रूमः । यल्लोकेऽप्रयुक्ता इति । यदप्युच्यते-- कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति । न ब्रूमोऽस्माभिरप्रयुक्ता इति । किं तर्हि ? । लोकेऽप्रयुक्ता इति । ननु च भवानप्यभ्यन्तरो लोके । अभ्यन्तरोऽहं लोके नत्वहं लोकः ॥

❀ अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात् ❀ २-२

अस्त्यप्रयुक्तः इति चेत् । तन्न । किं कारणम् ? । अर्थे शब्दप्रयोगात् । अर्थे शब्दाः प्रयुज्यन्ते । सन्ति चैषां शब्दानामर्थाः, येष्वर्थेषु प्रयुज्यन्ते ॥

❀ अप्रयोगः प्रयोगान्यत्वात् ❀ २-३

अप्रामाण्यमस्य शास्त्रस्य, वार्तिकोक्तनियमानुपपत्तिश्च, इत्याशयवानाह-"अस्त्यप्रयुक्त" इति । वार्तिकाशयं तन्मुखादेव स्पष्टं ज्ञातुं पृच्छति—किमतो यत् सन्ति अप्रयुक्ता इति । दोषदाता आह-प्रयोगाद्धि भवान् शब्दानां साधुत्वमध्यवस्यति इति, उक्तोर्थः । एकदेशी अप्रयुक्तत्वासत्त्वयोः समनियतत्वमभिप्रेत्य शङ्कते-इदं तावत् विप्रतिषिद्धमिति । दोषवादी अप्रयुक्तत्वासत्त्वयोः समनियतत्वं नास्तीति दर्शयति-नैतत् विप्रतिषिद्धमिति । शास्त्रेणान्वाख्यायमानत्वादेषां सत्त्वं, लोके अप्रयुज्यमानत्वाच्चाप्रयुक्तत्वम् ॥ अर्थसद्भावः शब्दप्रयोगे लिङ्गम् इति मन्यमानः एषां शब्दानामर्थसत्त्वात् प्रयोगोऽपि स्यात्, तथा चाप्रयुक्तत्वमेव नास्ति, इति सिद्धान्त्येकदेशी आह-'अस्त्यप्रयुक्त इति चेन्न, अर्थे शब्दप्रयोगात्' । पुनराक्षेप्ताऽऽह-अप्रयोगः

अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः ।कुतः ?।'प्रयोगान्यत्वात्'। यदेषां शब्दानामर्थेऽन्याञ्छब्दान् प्रयुञ्जते । तद्यथा--ऊषेत्यस्य शब्दस्यार्थे-'क यूयमुषिताः', तेरेत्यस्यार्थे-'क यूयं तीर्णाः', चक्रेत्यस्यार्थे- 'क यूयं कृतवन्तः । पेचेत्यस्यार्थे-'क यूयं पक्वन्त' इति ॥

* अप्रयुक्ते दीर्घसत्रवत् * २-४

यद्यप्यप्रयुक्ताः अवश्यं दीर्घसत्रवल्लक्षणेनानुविधेयाः । तद्यथा दीर्घ--सत्राणि वार्षशतिकानि वार्षसहस्त्रिकाणि च। न चाद्यत्वे कश्चिदप्याहरति, केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते।

* सर्वे देशान्तरे * २-५

सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते ॥ न चैवोपलभ्यन्ते। उपलब्धौ यत्नः क्रियताम्। महान् हि शब्दस्य प्रयोगविषयः। सप्तद्वीपा

प्रयोगान्यत्वादिति । अर्थसद्भावेन सामान्यतः शब्दप्रयोगे कल्पितेऽपि ऊषतेरादिविशेषशब्दप्रयोग एव कल्पनीयः, इत्यत्र मानाभाव इति भावः। सिद्धान्ती प्रयोगाभावेऽपि केषाञ्चिद् अन्वाख्यानं समर्थयते-**अप्रयुक्ते दीर्घसत्रवदिति**। वार्षशतिकादीनां सत्राणामद्यत्वे प्रयोगाभावेऽपि यथा तदध्ययन ज्ञानमात्रात् पुण्योत्पत्तिः, एवमप्रयुक्तानां साधुत्वज्ञानादपि पुण्योत्पत्तिरित्त्यर्थः। एषां पाणिनिकात्यायनादिसमयेऽप्रयुक्तत्वेऽपि ततः पूर्वकाले तेषां प्रयोगसत्वेन तदीयमनुशासनं समूलकमेव, पूर्वं प्रयोगसत्ता च तेषामन्वाख्यानबलादेवानुमीयते। इदानीं पाणिन्यादिसमयेऽपि अप्रयुक्तत्वमेषां नास्तीत्याह— 'सर्वे देशान्तरे' इति।

सप्तद्वीपेति-द्विर्गता आपो यस्मिन्निति द्वीपम्, उभयतो वर्तमानेन समुद्रेण मध्यस्थो भूभागो द्वीपमित्युच्यते । तथाहि—भारतवर्षादिनैकवर्षमण्डितं जम्बूद्वीपम्, ततो लवणसमुद्रः। प्लक्षद्वीपम्-इक्षुरससमुद्रः । शाल्मली द्वीपम्-सुरासमुद्रः । कुशद्वीपम्-सर्पिः समुद्रः। क्रौञ्चद्वीपम्-दधिसमुद्रः। शाकद्वीपम्-क्षीरसमुद्रः । पुष्करद्वीपम्-शुद्धोदकसमुद्रः । इति सप्तभिः पूर्वपश्चिमायतैः क्रमेण उत्तरदिशातो दक्षिणाप्रवणैः सम्पन्नाः सप्त द्वीपाः नामतो निर्दिष्टा

वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्ना, एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं, नवधाथर्वणो वेदः। वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः। एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य 'सन्त्यप्रयुक्ता' इति वचनं केवलं साहसमात्रमेव। एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते, तद्यथा--शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एनमार्या भाषन्ते

बोद्धव्याः। तत्रास्माकमिदं जम्बूद्वीपम्। तत्रापि नवखण्डयुक्तं भारतवर्षम् तथा च सिद्धान्तशिरोमणौ—

ऐन्द्रं, कशेरुशकलं, किल ताम्रपर्णं।
मन्यद्गभस्तिमदतश्च कुमारिकाख्यम्।
नागं च सौम्यमिह वारुणमन्त्यखण्डं।
गान्धर्वसंज्ञमिति भारतवर्षमध्ये ॥१॥

त्रयो लोका इति—भूर्लोक-भुवर्लोक-स्वर्लोकाख्याः। तत्र भूर्लोकः पार्थिवशरीरभाजां, भुवर्लोकः जलीयशरीरभाजां, स्वर्लोकश्च तैजसशरीरभाजां निवासस्थानम्। इति विवेकः। चत्वारो वेदाः इति—ऋग्यजुःसामाथर्वाख्याः। तत्र वेदमन्त्राणां—ऋक्त्व-यजुष्ट्व-सामत्वजात्यवच्छिन्नत्वेन त्रिविधत्वेऽपि हौत्र-आध्वर्यव-औद्गात्र-शान्तिकपौष्टिकादि चतुर्विधकर्मविनियुक्तत्वेन चतुष्ट्वव्यवहारः। त्रिविधजात्यवच्छिन्नत्वेन तु वेदत्रयी त्रयीतनुः, इत्यादिव्यवहारः। साङ्गा इति—शिक्षा, कल्पो, व्याकरणम्, निरुक्तम्, छन्दो, ज्यौतिषमिति षट् अङ्गानि। सरहस्या इति—रहस्यमुपनिषदः ताभिः सहिताः इत्यर्थः। वाकोवाक्यमिति "किं स्विदावपनं महत्" "भूमिरावपनं महत्" इत्याद्युक्तिप्रत्युक्तिरूपो ब्राह्मणग्रन्थो वाकोवाक्यम्। पूर्वचरितानुकीर्तनम्—इतिहासः। वंशसृष्टिलयादिकीर्तनं पुराणम्। वैद्यकमिति–दृष्टायुर्वेदमूलभूतो वेदभाग इत्यर्थः। ऊष तेरेत्यादीनां वेदे प्रयुक्तत्वं दर्शयति-सप्तास्ये इत्यादि।

पूर्वोक्तः शास्त्रेण क्रियमाणो धर्मनियमः "एकः शब्दः सम्यक् ज्ञातः शास्त्रान्वितः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुक् भवति" इति श्रुति-

शव इति। हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते,दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु ॥ ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दाः, एतेषामपि प्रयोगो दृश्यते ॥ क ? । वेदे । तद्यथा 'सप्तास्ये रेवती रेवदूष' * यद्वो रेवती रेवत्यां तमूष ', ' यन्मे नरः श्रुत्यं ब्रह्म चक्र†' 'यत्रा नश्चक्रा जरसं तनूनाम् ' ‡ इति ॥

(साधुशब्दज्ञानपूर्वकप्रयोगस्य धर्मजनकताधि०)

किं पुनःशब्दस्य ज्ञाने धर्मः, आहोस्वित् प्रयोगे ? । कश्चात्र विशेषः ? ॥

*** ज्ञाने धर्म इति चेत्तथाऽधर्मः * ३-१**

ज्ञाने धर्म इति चेत्तथाऽधर्मोऽपि प्राप्नोति ? । यो हि शब्दाञ्जानाति, अपशब्दानाप्यसौ जानाति । यथैव शब्दज्ञाने धर्मः,एवमपशब्दज्ञानेप्यधर्मः॥ अथवा भूयानधर्मः प्राप्नोति ? । भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद्यथा गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमाद्योऽपभ्रंशाः ॥

मूलक इत्युक्तमेव । तत्र किं सम्यक् ज्ञातः कामधुक् भवति, सुप्रयोगात्तु सम्यक् ज्ञातत्वानुमानम् । अथवा सुष्टु प्रयुक्तः कामधुक् भवति, सुप्रयुक्तत्वं तु सम्यक् ज्ञानात् । इति उभयथा सम्भवे तत्र **"यदैकस्मादपूर्वं तदा इतरत्तदर्थम्"** (पूर्वमीमांसा) इति न्यायाद् एकस्य प्राधान्य मपरस्याङ्गत्वं च कल्प्यम् । तथा च **'प्रथमं वा नियम्येत'** इति न्यायाश्रयणात् ज्ञानस्य प्राधान्यं प्रयोगस्याङ्गत्वमाश्रित्याह **'किं पुनः शब्दस्य ज्ञाने धर्म'** इति । अथवा-

सर्वत्रैव हि विज्ञानं, संस्कारत्वेन गम्यते ।
पराङ्गञ्चात्मविज्ञानाद् अन्यत्रेत्यवधार्यताम् ॥

इति उक्तनयेनात्मविज्ञानातिरिक्तसकलज्ञानस्य ज्ञेयसंस्कारकत्वेनाङ्गत्वात् प्राधान्यासम्भवे प्रयोगस्य प्राधान्यमाश्रित्याह **"आहो स्वित् प्रयोग"** इति अत्र ज्ञानप्राधान्यकल्पे प्रयोगप्राधान्यकल्पे च पृथक् २ दूषणमाह— **"ज्ञाने धर्म इति चेत्तथा अधर्म"** इति । स्पष्टम् । वेदविरुद्धश्चायं कल्पः—

---

* ऋ० सं० ४।५१।५॥ † का० सं० ६।१८॥ ‡ वाज० सं० २५।२२॥ ऋ० सं० १।८६।६॥

* आचारे नियमः * ३-२

आचारे पुनर्ऋषिर्नियमं वेदयते 'तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः, इति ॥ अस्तु तर्हि प्रयोगे ॥

* प्रयोगे सर्वलोकस्य * ३-३

यदि प्रयोगे धर्मः, सर्वो लोकोऽभ्युदयेन युज्येत । कश्चेदानीं भवतो मत्सरो, यदि सर्वो लोकोऽभ्युदयेन युज्येत? ॥ न खलु कश्चिन्मत्सरः, प्रयत्नानर्थक्यं तु भवति । फलवता च नाम प्रयत्नेन भवितव्यम् । न च प्रयत्नः फलाद् व्यतिरेच्यः ॥ ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान् प्रयोक्ष्यन्ते ॥ त एव साधीयोऽभ्युदयेन योक्ष्यन्ते ॥ व्यतिरेकोऽपि वै लक्ष्यते । दृश्यते हि कृतप्रयत्नाश्चाप्रवीणाः, अकृतप्रयत्नाश्च प्रवीणाः । तत्र फलव्यतिरेकोऽपि स्यात् ॥ एवं तर्हि—नापि ज्ञान एव धर्मो नापि प्रयोग एव ॥ किं तर्हि? ।

शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ३-४

इत्याह "आचारे नियम" इति । ऋषिः (वेदमन्त्रः) "तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवु" रित्यादिना आचारे-साधुशब्दप्रयोगे नियमं ज्ञापयति, तथाच साध्वसाधूनां प्रयोगादेव धर्माधर्मौ, इति वेदतात्पर्यम् । तच्च ज्ञाने धर्म इति पक्षेण विरुद्धम् । इदानीं श्रुत्यविरुद्धं द्वितीयं पक्षमाह- "अस्तु तर्हि प्रयोगे" इति । अत्र कल्पे दूषणमाह "प्रयोगे सर्वलोकस्य" प्रयोगाद्धर्म इति कल्प्यमाने व्याकरणज्ञाः अव्याकरणज्ञाश्च उभयेऽपि साम्येन प्रयोगात् फलं प्राप्नुयुः । तथा च व्याकरणाध्ययनपरिश्रमानर्थक्यम्, इत्याशयवानाह—"प्रयत्नानर्थक्यं तु भवतीति" व्याकरणाध्ययनस्य सम्यक् प्रयोगस्य च साध्यसाधनभावमाशङ्क्य निरस्यति-"ननु च" इत्यादिना ।

सिद्धान्ती आह—"शास्त्रपूर्वके प्रयोगे अभ्युदयः, तत्तुल्यं वेदशब्देन" शास्त्रानुसंधानपूर्वके प्रयोगे अभ्युदयः-विशेष फलप्राप्तिः, तत् शास्त्रानुसंहित-शब्दप्रयोगजं फलं वेदशब्देन वेदः शब्दः वाचको यस्य इति वेदशब्दः-अनुष्ठानमित्यर्थः तेन तुल्यं । अनुष्ठानमपि यथा ज्ञानपूर्वकं क्रियमाणमभ्युदय-

शास्त्रपूर्वकं यः शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते । 'तत्तुल्यं वेदशब्देन'। वेदशब्दा अप्येवमभिवदन्ति' 'योऽग्निष्टोमेन यजते, य उ चैनमेवं वेद' योऽग्निं नाचिकेतं चिनुते, य उ चैनमेवं वेद' ॥ अपर आह- 'तत्तुल्यं वेदशब्देने' ति। यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्ति। एवं यः शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति ॥

अथवा पुनरस्तु–ज्ञान एव धर्म इति। ननु चोक्तं–ज्ञाने धर्म इति चेत्तथाऽधर्म इति। नैष दोषः, शब्दप्रमाणका वयम् । यच्छब्द आह तदस्माकं प्रमाणम् । शब्दश्च शब्दज्ञाने धर्ममाह नापशब्दज्ञाने ऽधर्मम्। यच्च पुनरशिष्टाप्रतिषिद्धं, नैव तद्दोषाय भवति, नाभ्युदयाय । तद्यथा हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति, नाभ्युदयाय ॥

अथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने। यो ह्यपशब्दाञ्जानाति

कारि भवति, तथा इदमपीत्यर्थः । अनुष्ठानस्य ज्ञानपूर्वकस्य फलजनकत्वे प्रमाणमाह "योऽग्निष्टोमेन यजते यउच एनमेवं वेद" इति, अत्र चकारोपादानेन ज्ञानविशिष्टानुष्ठानात् फलमुक्तम् । "तत्तुल्यं वेदशब्देन" इत्यस्यापरा व्याख्या यथा–वेदशब्दाः (वेदरूपाः शब्दा इत्यर्थः) नियमपूर्वम्-अनध्यायकालपरिवर्जनादिनियमपूर्वम् पठिताः फलवन्तो भवति । एवं शास्त्रानुसन्धानपूर्वकः शब्दप्रयोगो ऽभ्युदयकारीत्यर्थः। इदानीं ज्ञानमात्राद्धर्म इति पक्षेऽपि दोषो नास्तीत्याह "अथवेति" "सम्यग्ज्ञातः कामधुक् भवति" इति श्रुत्या साधुशब्दज्ञानस्य फलस्य च साध्यसाधनभावे उक्तेऽपि असाधुशब्दज्ञानस्य अधर्मस्य च साध्यसाधनभावो नोक्तः । इति न पूर्वोक्तो "ज्ञाने धर्म इति चेत्तथा अधर्मः" इति दोषः प्रसज्यते। ननु तुल्यन्यायात् कल्प्यते इत्यत आह "अथवाऽभ्युपाय" इत्यादि। अयं भावः–अपशब्दज्ञानपूर्वकसाधुशब्दनिश्चयेन धर्मः इत्युक्ते अपशब्दज्ञानस्यापि विशेषणतया

शब्दानप्यसौ जानाति । तदेवं 'ज्ञाने धर्मः' इति ब्रुवतोऽर्थादापन्नं भवति—'अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः' इति ॥

अथवा कूपखानकवदेतद् भविष्यति । तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति । सोऽप्सु संजातासु तत एव तं गुणमासादयति, येन च स दोषो निर्हण्यते । भूयसा चाभ्युदयेन योगो भवति । एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन स दोषो निर्घानिष्यते, भूयसा चाभ्युदयेन योगो भविष्यति ॥

यदप्युच्यते—'आचारे नियमः' इति । याज्ञे कर्मणि स नियमो ऽन्यत्रानियमः । एवं हि श्रूयते—'यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः' । ते तत्रभवन्तो यद्वा न स्तद्वा न इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे पुन कर्मणि नापभाषन्ते ॥ तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितम् । ततस्ते पराभूताः ॥

साधुशब्दज्ञाने प्रविष्टत्वेन तस्य विशेषणतया धर्मकजनकत्वमेव सिद्ध्यति उक्त श्रुतेः, तथा च प्रत्यक्षश्रुत्या अपशब्दज्ञानस्य विशेषणतया धर्मजनकत्वे उक्ते अपशब्दज्ञानस्य फलाकाङ्क्षाभावात् सामर्थ्यमूलिका कल्प्यश्रुतिर्न सिद्ध्यति इति ।

इदानीं "तुष्यतु दुर्जन" न्यायेन कल्पितश्रुत्या अपशब्दज्ञानस्याधर्मजनकत्वे सिद्धेऽपि कूपखानकन्यायेन साधुशब्दज्ञानादुत्पन्नं प्रत्यक्षश्रुतिबोध्यत्वादुत्कृष्टं धर्मफलं कल्प्यश्रुतिबोध्यत्वाद् दुर्बलमपशब्दज्ञानजमधर्मफलं प्रति बाधिष्यते-इत्याह-'अथवे'ति । यदप्युक्तम् ज्ञाने धर्म इति कल्पः श्रुति विरुद्धः "हेलयो हेलय" इत्यादि—आचार नियमादिति । तदपि न "यर्वाणस्तर्वाण" इत्यादि श्रुतिसहकारेण "न म्लेच्छितवै" इति श्रौत निषेधस्य "यज्ञकर्ममात्रविषयत्वं न तु सार्वत्रिकत्वम्" तथा च यज्ञभिन्नस्थले साधुशब्दज्ञानमात्रात् धर्माङ्गीकारेऽपि न दोष इत्याशयात् (यद्वा-यद्वस्तु

अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः ?॥ सूत्रम् ॥

*** सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः * ४-१**

सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते—'व्याकरणस्य सूत्रम्' इति। किं हि तदन्यत्सूत्राद् व्याकरणम् ?, यस्यादः सूत्रं स्यात्।

*** शब्दाप्रतिपत्तिः * ४-२**

शब्दानां चाप्रतिपत्तिः प्राप्नोति—'व्याकरणाच्छब्दान् प्रतिपद्यामहे' इति। नहि सूत्रत एव शब्दान् प्रतिपद्यन्ते। किं तर्हि ?। व्याख्यानतश्च। ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति॥ न केवलानि चर्चापदानि व्याख्यानम्—'वृद्धिः, आत्, ऐज्' इति। किं तर्हि ?॥ उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति॥ एवं तर्हि शब्दः।

तद्वा-तद्वस्तु वर्तताम्, नः अस्माकं किं हीयते इत्यर्थप्रतिपादनाय 'यद्वा नः तद्वा नः' इति वक्तव्ये यर्वाणस्तर्वाण इति प्रयोगं कृतवन्त ऋषयः, तेन हेतुना तन्नामकाः सम्पन्नाः इत्यर्थः)॥

अथ शब्दानुशासनमित्यत्र शब्दानुशासनमिति व्याकरणस्य अन्वर्थकं नाम इत्युक्तम्, तथा "नचान्तरेण व्याकरणं", "तस्माद् अध्येयं व्याकरणम्" इत्यादौ साक्षात् भाष्यकृता व्याकरण शब्दस्य उपादानात् तदर्थविषये जिज्ञासा। किं लक्षणभूतं—सूत्रमात्रं व्याकरणम्, उत लक्ष्यभूतः—शब्द एव व्याकरणम्, उत उभयं मिलित्वा व्याकरणमिति। तत्र आद्यपक्षे दोषद्वयं क्रमेणोद्घाटयति—"सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः"। षष्ठी हि भेदस्थले भवति व्याकरणस्य सूत्रस्य च अभेदे व्याकरणस्य सूत्रमिति षष्ठी अनुपपन्ना स्यात् तथा "शब्दाप्रतिपत्तिः" सूत्रमात्रात् साधुशब्दज्ञानाभावात् व्याकरणात् शब्दान् प्रतिपद्यामहे इत्यादि व्यवहारानुपपत्तिः "व्याख्यानत" इति—

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।
अध्याहारोऽनुषङ्गश्च, व्याख्यानं षड्विधं स्मृतम्॥

शब्दे ल्युडर्थः ४-३

यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते–व्याक्रियन्ते शब्दा अनेनेति व्याकरणम् । नहि शब्देन किंचिद् व्याक्रियते । केन तर्हि ? । सूत्रेण ।

* भवे च तद्धितः ४—४ *

भवे च तद्धितो नोपपद्यते—'व्याकरणे भवो योगो वैयाकरणः' इति ॥ नहि शब्दे भवो योगः । क तर्हि ? । सूत्रे ॥

* प्रोक्तादयश्च तद्धिताः ४—५ *

प्रोक्तादयश्च तद्धिता नोपपद्यन्ते 'पाणिनिना 'प्रोक्तं पाणिनीयम्' । आपिशलं काशकृत्स्नमिति । नहि पाणिनिना शब्दाः प्रोक्ताः ॥ किं तर्हि ? ॥ सूत्रम् ॥ किमर्थमिदमुभयमुच्यते 'भवे', 'प्रोक्तादयश्च ताद्धती' इति । न प्रोक्तादयश्च तद्धिता इत्येव भवेऽपि तद्धितश्चोदितः स्यात् ? । पुरस्तादिदमाचार्येण दृष्टम् 'भवे च तद्धितः' इति, तत्पाठितम्, तत उत्तरकालमिदं दृष्टम् 'प्रोक्तादयश्च तद्धिताः' इति तदपि पठितम्, न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति ॥

अयं तावददोषः–यदुच्यते—'शब्दे ल्युडर्थः, इति ॥ नावश्यं करण-

इति लक्षितं व्याख्यानम् । षड्विधमित्यस्य षडवयवकमित्यर्थः । तत्र षडन्यतमानां यथासम्भवं समावेशः । न तु सर्वत्र व्याख्याने सर्वावयवसम्भवः । इदानीं द्वितीयपक्षे दोषत्रयमुद्भावयति—"शब्दे ल्युडर्थः" इति—शब्दो हि व्याकृतिक्रियायाः कर्मकारकभूतो, न तु करणम् । तथा च–करणल्युडन्त व्याकरणशब्दो न शब्दबोधकः । 'भवे च तद्धितः" "प्रोक्तादयश्च तद्धिताः" इति च दोषद्वयं शब्दमात्रं व्याकरणमिति कल्पे । व्याकरणे भवो योगः-सूत्रं वैयाकरणः । तथा पाणिनिना प्रोक्तं पाणिनीयं व्याकरणम्—इत्यादि नोपपद्यते, तत्र हेतुः स्पष्ट एव, द्वितीयमात्रेण सिद्धे प्रपञ्चार्थं वार्तिकद्वयस्य पार्थक्यम् । द्वितीयपक्षोक्त—दोषत्रयमध्ये आद्यो दोषः सुपरिहरः इत्याह-अयं तावददोष इति । यथा प्रस्कन्दनं प्रपतनमित्यत्र अपादाने ल्युट्, तथा व्याकरणमित्यत्र बाहुलकात् कर्मणि ल्युट्, इति भावः ।

धिकरणयोरेव ल्युड्विधीयते ॥ किं तर्हि ? अन्येष्वपि कारकेषु- 'कृत्यल्युटो बहुलम्' इति । तद्यथा प्रस्कन्दनं प्रपतनमिति ॥ अथवा शब्दैरपि शब्दा व्याक्रियन्ते । तद्यथा 'गौः' इत्युक्ते सर्वे सन्देहा निवर्त्तन्ते, नाश्वो, न गर्दभ इति ॥ अयं तर्हि दोषः_भवे प्रोक्तादयश्च तद्धिताः-इति ॥ एवं तर्हि—

* लक्ष्यलक्षणे व्याकरणम् ४—६ *

लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति ॥ किं पुन र्लक्ष्यं ? किं वा लक्षणम् ? ॥ शब्दो लक्ष्यः, सूत्रं लक्षणम् ॥ एवमप्ययं दोषः समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते । सूत्राणि चाप्यधीयान इष्यते वैयाकरण इति ॥ नैष दोषः । समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्त्तन्ते । तद्यथा पूर्वे पञ्चाला उत्तरे पञ्चालाः; तैलं भुक्तम् घृतं भुक्तम्, शुक्लो नीलः कपिलः कृष्ण इति ॥ एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेष्वपि वर्तते ॥

अथवा पुनरस्तु सूत्रम् । ननु चोक्तम्-सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्न इति ॥ नैष दोषः, व्यपदेशिवद्भावेन भविष्यति ॥ यदप्युच्यते-

---

करणे ल्युट् पक्षेऽपि शब्दा व्याकरणमिति कल्पे दोषो नास्तीत्याह—**अथवेति**। विपरीतव्यावृतिः सदृशसंग्रहश्च व्याकृतिः, इति भावः । शब्दे व्याकरणमिति पक्षे अवशिष्टं दोषद्वयं दुष्परिहरमिति कृत्वा तृतीयपक्षं सिद्धान्तरूपेण आह- "लक्ष्यलक्षणे व्याकरणमिति" अस्मिन् पक्षे लक्ष्यलक्षणसमुदायवाचको व्याकरणशब्दः **"समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्ते"** इति न्यायेन लक्ष्यमात्रे लक्षणमात्रे वा व्याकरणशब्दप्रयोगो नानुपपन्नः । यथा अर्थसहितेषु तत्तन्मन्त्रेषु वेदत्वप्रसिद्धावपि मन्त्रमात्रे वेदशब्द उक्तन्यायात् प्रवर्तते—इत्याशयवानाशङ्क्य परिहरति **एवमप्ययं दोष** इत्यादि ।

इदानीं "लक्षणं व्याकरणमिति" पक्षे उक्तदोषद्वयं परिहृत्य तस्यापि पक्षस्य उपादेयत्वमाह-**अथवा पुनरस्तु सूत्रमिति'** व्यवदेशवद्भावेने,ति विशिष्टो-मुख्यो अपदेशो-व्यवहारः सोऽस्यास्तीति व्यपदेशी (मुख्यव्यवहारवान्) तेन

'शब्दाप्रतिपत्तिः' इति । नहि सूत्रत एव शब्दान् प्रतिपद्यन्ते । किं तर्हि ? व्याख्यानतश्चेति ॥ परिहृतमेतत्–तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति ॥ ननु चोक्तं—न केवलानि चर्चापदानि व्याख्यानम्–वृद्धिः, आत्, ऐजिति। किं तर्हि ? । उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति, इति । अविजानत एतदेवं भवति । सूत्रत एव हि शब्दान् प्रतिपद्यन्ते ॥ आतश्च सूत्रत एव । यो ह्युत्सूत्रं कथयेन् नादो गृह्येत ।

(वर्णोपदेशप्रयोजनाधि०)

अथ किमर्थो वर्णानामुपदेशः ? *** वृत्तिसमवायार्थ उपदेशः ५–१ ***

वृत्तिसमवायार्थो वर्णानामुपदेशः। किमिदं वृत्तिसमवायार्थ इति ? वृत्तये समवायो वृत्तिसमवाय इति। वृत्त्यर्थो वा समवायो वृत्तिसमवायः। वृत्तिप्रयोजनो वा समवायो वृत्तिसमवायः। का पुनर्वृत्तिः ? शास्त्रप्रवृत्तिः।

तुल्यम् एकस्मिन् असहायेऽपि कार्यं भवति इत्यर्थिकया "व्यपदेशवदेकस्मिन्" इति परिभाषया इत्यर्थः । शब्दाप्रतिपत्तिं परिहरति "यदप्युच्यते" इत्यादि । उत्सूत्रं–सूत्रमर्यादामुल्लङ्घ्य । "नादो गृह्येत" न अदः (इदम्) अङ्गीक्रियेत । अथवा नादः ध्वनिमात्रं (अविवक्षितार्थमिव) गृह्येत

एवं पाणिनीयशास्त्रस्य आरब्धव्यतां प्रतिबन्धकहेतुखण्डनपूर्वकं साधकहेतुभिः समर्थ्य 'अइउण्' इत्यादि चतुर्दशसूत्र्याः उपदेशमाक्षिप्य समर्थयते– "अथ किमर्थ" इत्यादिना "वृत्तिसमवायार्थ उपदेश" इति । वृत्तिः–लाघवेन शास्त्रप्रवृत्तिः समवायो–वर्णानामानुपूर्व्येण–क्रमविशेषेण सन्निवेशः, तदर्थमुपदेश इत्यर्थः । वृत्तिसमवाय इत्यत्र 'धर्मनियम' इत्यत्रोक्तरीत्या समासः कल्पत्रयेण बोध्यः । अयं भावः सर्वव्यञ्जनबोधने हलिति, स्वरमात्रबोधने अजिति, वर्गाणां प्रथममात्रबोधने चय् इति, प्रथम द्वितीयबोधने खय् इति । तृतीय मात्रबोधने जशिति चतुर्थमात्र बोधने झष् इत्यादि विवक्षितप्रत्याहारविशेषाः क्रमविशेषसन्निवेशं विना न सिध्यन्तीति । तत्र चतुर्दशसूत्रीस्थवर्णक्रमोऽनादिसिद्ध एव वेदत्वात् । अनुबन्धास्तु महेश्वरकृता एवेत्यग्रे वक्ष्यते । तथा च ऋक्

अथ कः समवायः ?। वर्णानामानुपूर्व्येण संनिवेशः। अथ क उपदेशः? उच्चारणम् ।कुत एतत् ?। दिशिरुच्चारणक्रियः। उच्चार्य हि वर्णानाह—'उपदिष्टा इमे वर्णा' इति।

*** अनुबन्धकरणार्थश्च ५—२ ***

अनुबन्धकरणार्थश्च वर्णानामुपदेशः—अनुबन्धानासङ्क्ष्यामीति । नह्यनुपादिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम्। स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च । वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम्। प्रत्याहारो वृत्त्यर्थः।

*** इष्टबुद्ध्यर्थश्च ५—३ ***

इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः—'इष्टान् वर्णान् भोत्स्यामहे' इति। न ह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्या विज्ञातुम्।

***इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः* ५-४**

इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्तव्यः। एवंगुणा अपि हि वर्णा इष्यन्ते।

तन्त्रव्याकरणे शाकटायनः—"इदमक्षरच्छन्दो वर्णशः समनुक्रान्तम्, यथा आचार्या ऊचुः—ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः, तं खल्विममक्षरसमाम्नायमित्याचक्षते न भुक्त्वा न नक्तं प्रब्रूयात् ब्रह्मराशिरिति । ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको वेदराशिरित्यर्थः। क उपदेशः—उच्चारणमिति अज्ञातस्वस्वरूपज्ञापकोच्चारणमित्यर्थः।"अनुबन्धकरणार्थश्च' इति अनुबन्धकरणं च महेश्वरकृतमेव न तु पाणिनिकृतम्।"इष्टबुद्ध्यर्थश्चेति" साधुशब्दघटकतया इष्टानां स्वरव्यञ्जनानां चतुर्दशसूत्र्यैव बोधः,वैयाकरणैः तदर्थं मातृकाः-वर्णमालाः न पठनीया इत्यर्थः।

शङ्कते—"इष्टबुद्ध्यर्थश्चेति चेत्" इत्यादि। अयं भावः—साधुशब्दघटकत्वेन यथा चतुर्दशसूत्रीनिर्दिष्टा वर्णा इष्टाः, एवं तत्र अनिर्दिष्टा अपि

* आकृत्युपदेशात्सिद्धम् ५—५ *

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिः । तथोवर्णाकृतिः ।

* आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः ५-६*

आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधो वक्तव्यः । के पुनः संवृतादयः ? संवृतः, कलो, ध्मात, एणीकृतो,ऽम्बूकृतोऽर्द्धको, ग्रस्तो, निरस्तः, प्रगीत, उपगीतः, क्ष्विण्णो, रोमश, इति ।

अपर आह–'ग्रस्तं निरस्तमविलम्बितं निर्हतमम्बूकृतं ध्मातमथो विक-

---

दीर्घादयोऽनुनासिकादयश्च साधुशब्दघटकत्वेन इष्टाः । तेषां चानुपदेशान्न्यूनता तदर्थमुपदेशः कर्तव्य इत्यर्थः । किं च 'अइउण्' इत्यादौ अकारादयो यदि एकश्रुत्या उपदिष्टाः तदा उदात्तानुदात्तस्वरितभेदैः पुनरुपदेशः कर्तव्यः । त्रैस्वर्येण प्रयोगस्य इष्टत्वात् । सिद्धान्तयति–"आकृत्युपदेशात् सिद्धमिति"

आकृतिर्जातिः तदवच्छिन्नस्य उपदेशः—यथा अत्वावच्छिन्नः साधुः, इत्वावच्छिन्नः साधुः, उत्वावच्छिन्नः साधुः, इत्यादिरूपेण तत्तज्जात्यवच्छिन्नानामुपदेशे अत्वाद्यवच्छिन्नानामष्टादशादिसंख्याकाना मुदात्तादीनां ग्रहणं भविष्यतीत्यर्थः । ननु अत्वाद्यवच्छिन्नस्य उपदेशे यथा इष्टा अष्टादश अकाराः गृह्यन्ते, तथा अनिष्टा अपि संवृतकलादिदोषविशिष्टा अकारा अत्वावच्छिन्नत्वेन हेतुना गृह्येरन् । तथा च तदतिव्याप्तिनिरासार्थं तेषां साधुत्वप्रतिषेधः कर्तव्यः । एव मित्वोत्वाद्यवच्छिन्नानां संवृतकलादीनां प्रतिषेधो वक्तव्य इत्यर्थः । तत्र संवृतत्वं ह्रस्वाकारमात्रस्य गुणः, एकारादीनामाकारादीनां च दोषः ।

कलः-स्थानान्तरनिष्पन्नः काकलीत्वने प्रसिद्धः । ध्मातः-श्वासभूयिष्ठतया ह्रस्वोऽपि दीर्घ इव लक्ष्यमाणः । एणीकृतः-अविशिष्टः, किमयमोकारः उत औकारः इति संदिह्यमानः । अम्बूकृतः-व्यक्तोऽपि अन्तर्मुख इव श्रूयमाणः । अर्धकः-दीर्घोऽपि ह्रस्व इव । ग्रस्तः-जिह्वामूले निगृहीतः, अव्यक्तो वा । निरस्तः-निष्ठुरः । प्रगीतः-सामवत् उच्चारितः । उपगीतः-समीपवर्णान्तरगीत्या अनुरक्तः । क्ष्विण्णः-कम्पमान इव, रोमशो-गम्भीरः, अविलम्बितः-वर्णान्तरसम्भिश्रः,

म्पितम् । संदष्टमेणीकृतमर्धकं द्रुतं विकीर्णमेताः स्वरदोषभावना इति। अतोऽन्ये व्यञ्जनदोषाः । नैष दोषः ।

*** गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिः ५—७ ***

गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति । अस्त्यन्यद् गर्गादिबिदादिपाठे प्रयोजनम् । किं ? समुदायानां साधुत्वं यथा स्यादिति। एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि। सा तर्हि वक्तव्या। * लिंगार्था तु प्रत्यापत्तिः ५-८* लिङ्गार्था सा तर्हि भवति । तत्तर्हि वक्तव्यम् । यद्यप्येतदुच्यते । अथ वै तर्हि अनेकमनु-

---

निर्हतो-रूक्षः।संदष्टो-वर्धित इव। विशीर्णो वर्णान्तरे प्रसृतः, एकोऽप्यनेकनिर्भासीति वा—

उक्ताक्षेपं परिहरति-"गर्गादि" इत्यादि । गर्गादिगणे दोषरहितानामेवपाठात् दुष्टानां वर्ज्यत्वं कल्प्यते इति भावः । ननु गर्गादिप्रकृतिकयञन्तसमुदायानां साधुत्वं यथा स्याद् इत्यर्थं चरितार्थः पाठो न कलादिदोषं निवर्तयेद् इत्याह–"अस्त्यन्यदिति" प्रकारान्तरेण दोषं परिहरति–'एवं तर्हीति"। अयं भावः–प्रक्रियादशायां दुष्टानां दोषरहितानां चेत्युभयविधानां वर्णानां श्रवणेऽपि परिनिष्ठितदशायामत्वादिजात्यवच्छिन्नाः अष्टादशादिसंख्याविशिष्टाः दोषरहिताः प्रत्यापद्यन्ते इति शास्त्रान्ते वक्तव्यमिति । यद्यपि तथा प्रत्यापत्तिकरणे गौरवं, तथापि आकृतिनिर्देशप्रयुक्तदोषपरिहारः, एवमनुबन्धस्थानीय-तत्तद्धात्वादिगतकलादिलिङ्गनिवृत्तिश्च, इति प्रयोजनद्वयं प्रत्यापत्त्या सिद्ध्यति इत्याह–"लिङ्गार्था तु प्रत्यापत्तिरिति" तु शब्दः–अप्यर्थकः लिङ्गार्था इत्यस्य अनुबन्धस्थानीयतत्तद्धात्वादिगतकलादिलिङ्ग (चिन्ह) निवृत्त्यर्था–इत्यर्थः । अप्यर्थकेन तु–शब्देन आकृतिनिर्देशप्रयुक्तदोषपरिहारः संगृहीतः ।

ननु टकारककारमकारङकाराद्यनुबन्धानां स्थाने धुट्, तुक्, नुम्, शीङ् इत्यादौ कलादयो दोषाः लिङ्गत्वेनासञ्जनीयाः इति गौरवमित्याह–"तत्तर्हि वक्तव्यमिति" । समाधत्ते—यद्यप्येतदुच्यते "अथ वै तर्हि" इत्यादि ।

बन्धशतं नोच्चार्यमित्संज्ञा च न वक्तव्या, लोपश्च न वक्तव्यः। यदनुबन्धैः क्रियते तत्कलादिभिः करिष्यते॥ सिद्ध्यत्येवम्। अपाणिनीयं तु भवति, यथान्यासमेवास्तु। ननु चोक्तम्–'आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधः' इति। परिहृतमेतत्, गर्गादिबिदादिपाठात् संवृतादीनां निवृत्ति र्भविष्यति–इति। ननु चान्यद् गर्गादिबिदादिपाठे प्रयोजनमुक्तम्। किम्? समुदायानां साधुत्वं यथा स्यादिति। एवं तर्ह्युभयमनेन क्रियते–पाठश्चैव विशेष्यते' कलादयश्च निवर्त्यन्ते। कथं पुनरेकेन यत्नेनोभयं लभ्यम्?। लभ्यमित्याह। कथम्?। द्विगता अपि हेतवो भवन्ति। तद्यथा–आम्राश्च सिक्ताः पितरश्च प्रीणिताः' इति। तथा वाक्यानि द्विष्ठानि भवन्ति–श्वेतो

अथ वै तर्हि इत्यस्य तथापीत्यर्थः, यदनुबन्धैः क्रियते तत् कलादिभिः करिष्यते इति। अनुदात्तङित आत्मनेपदमित्यस्य स्थाने "कलादात्मनेपदम्" इति "स्वरितञितः" इत्यस्य स्थाने 'ध्मातात् कर्तृगामिनि क्रियाफले" एवं टकितौ कलध्मातौ पठित्वा "आद्यन्तौ कलध्मातौ" इति सूत्रणीयम्। एवं टुवम उद्गिरणे इत्यादीन् ट्वितः ग्रस्तान् पठित्वा "ग्रस्तादथुच्" एवं डुदाञ् दाने इत्यादि ड्वितः अर्धकदोषयुक्तान् पठित्वा "अर्धकात् क्त्रिः" इति "आदिरन्त्येनेत्यत्र अदिः कलै सह। तथा च अनुदात्तस्वरिताद्यनुबन्धासञ्जनं ञकार–ङकाराद्यनुबन्धासञ्जनं च न कर्तव्यम्, तेषामित्संज्ञालोपौ च न वक्तव्यौ इति लाघवमिति।

खण्डयति—"अपानिणियं तु भवतीति" पाणिनीयशास्त्रस्य अनेकत्र व्यत्यासो व्याख्यानसापेक्षः कर्तव्यो भवति इत्यर्थः। तस्मात् "यथान्यासमेवास्तु" संव्रतादीनां प्रतिषेधस्तु पूर्वोक्तरीत्या गर्गादिबिदादिपाठाद् भविष्यति। न च पाठस्य प्रयोजनान्तरमुक्तमिति वाच्यम्, एकेन यत्नेन प्रयोजनद्वयस्य संपादयितुं शक्यत्वात्। "द्विगता" इति–द्वौ अर्थौ प्रति गताः द्विगताः। वाक्यानि द्विष्ठानीति। द्वयोः अर्थयोः तिष्ठन्ति तानि द्विष्ठानि, यथा–कः कीदृशश्च धावति इति प्रश्ने 'श्वेतो धावति' इत्युत्तरवाक्ये श्वा इतः इति च्छेदेन कः इत्यस्य उत्तरम्। श्वेत इति छेदेन कीदृश इत्यस्योत्तरम्। तथा केषां जनपदानां

धावति, अलम्बुसानां यातेति। अथवा इदं तावदयं प्रष्टव्यः-क्वेमे संवृतादयः श्रूयेरन्निति ? आगमेषु ?। आगमाः शुद्धाः पठ्यन्ते। विकारेषु तर्हि ? विकारा अपि शुद्धाः पठ्यन्ते। प्रत्ययेषु तर्हि। प्रत्यया अपि शुद्धाः पठ्यन्ते। धातुषु तर्हि ?। धातवोऽपि शुद्धाः पठ्यन्ते। प्रातिपदिकेषु तर्हि ? प्रातिपदिकान्यपि शुद्धानि पठ्यन्ते। यानि तर्ह्यग्रहणानि प्रातिपदिकानि ?। एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्त्तव्यः। शशः षषः इति मा भूत्। मञ्चको मञ्जक इति मा भूत्।

आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः।
उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः ॥१॥

इति प्रथमं पस्पशाह्निकम् ॥

गन्ता, को वा समर्थः इति प्रश्नद्वये उत्तरम्-अलं बुसानां याता इति। अलम्बुसाः देशविशेषाः, तेषां गन्ता इति आद्यप्रश्नस्योत्तरम्। (यः) बुसानां पलालवर्णानां याता प्राप्तिमान् (स गन्तुम्) अलं समर्थः इति द्वितीय प्रश्नस्य उत्तरम्। "यानि तर्ह्यग्रहणानी"ति गर्गादिबिदादिगणे नास्ति (कार्यार्थं) ग्रहणं येषां तानि अग्रहणानि—अपठितानि इत्यर्थः।

इति पस्पशान्हिकम्।

अपसारिताः सप्रमाणसमाधानेन दूरीकृताः स्पशाः व्याकरणस्यारब्धव्यतादिप्रतिबन्धकाः आक्षेपविशेषा यस्यां सा पस्पशा 'स्पशबाधनस्पर्शनयोः' इत्यस्मात् पचाद्यचि स्पश इति प्रतिबन्धकवाचकं, पृषोदरादित्वाद् उपसर्गाकारलोपः। स्त्रीत्वं लोकात्।

द्वितीयं प्रत्याहाराह्निकम्

शिवसूत्रम्—

अइउण् ॥१॥

(अकारस्य विवृतत्वप्रतिज्ञाधि०)

*** अकारस्य विवृतोपदेश आकारग्रहणार्थः * १-१**

अकारस्य विवृतोपदेशः कर्त्तव्यः। किं प्रयोजनम् ?॥ आकारग्रहणार्थः। अकारः सवर्णग्रहणेनाऽऽकारमपि यथा गृह्णीयात् ॥ किं च कारणं न गृह्णीयात् ?॥ विवारभेदात् । किमुच्यते–विवारभेदादिति, न पुनः 'काल- प्रयत्न भेदादपि' । यथैव ह्ययं विवारभिन्नः, एवं कालभिन्नोऽपि ?॥ सत्यमेव तत् । वक्ष्यति "तुल्यास्य प्रयत्नं सवर्णम्"*इत्यात्रास्यग्रहणस्य प्रयोजनम्

(प्रत्यहाराह्निकम्)

अथ "किमर्थो वर्णानामुपदेश" इत्यादिना सर्ववर्णान् अविशेषेण पूर्वान्हिके विचार्य द्वितीयान्हिके विशेषेण विचारः क्रियते । ह्रस्वाकारस्य स्वभावतःसंवृतत्वाद् दीर्घाकारादीनां स्वभावतो विवृतत्वात् संवृतत्वेन विवृतत्वेन च प्रयत्नभेदात् "तुल्यास्यप्रयत्नम्" इत्यनेन सवर्णसंज्ञाभावे "अणुदित्सवर्णस्य चाप्रत्ययः" इति ग्रहणकशास्त्रेण अकारो दीर्घाकारादिकं न गृह्णीयात्, अत आह "अकारस्य विवृतोपदेश आकारग्रहणार्थः" अकारमुद्दिश्य विवृतगुणोपदेशः कर्तव्यः, तत्फलमाकारग्रहणार्थ इति ।

ननु विवृतप्रयत्नभेदाद्धेतोर्यथा अकारः आकारं न गृह्णीयात्, एवम् एकमात्रिकत्वद्विमात्रिकत्वरूपकालभेदादपि हेतोः अकार आकारं न ग्रहीष्यति, तथा च सोऽपि (कालभेदोऽपि) द्वितीयो हेतुर्वक्तव्यः, इति चेदुच्यते— "तुल्यास्यप्रयत्नमिति" सूत्रे स्पृष्टप्रयत्नसाम्यात् क-च-टादीनामपि सावर्ण्य-

---

* (१ । १ । ९)

'आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्ती'ति ॥ बाह्यश्च पुनरास्यात् कालः। तेन स्यादेव कालभिन्नस्य ग्रहणम्। न पुनर्विवार-भिन्नस्य ॥

किं पुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते, आहोस्वित् संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते ? ॥ विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते ॥ कथं ज्ञायते ? ॥ यदयं–'अ अ इति। *'इत्यकारस्य विवृतस्य संवृतताप्रत्यापत्तिं शास्ति ॥

नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ॥ किम् ? ॥ अतिखट्वः, अतिमाल इत्यत्रान्तर्यतो विवृतस्य विवृतः प्राप्नोति, संवृतः स्यादित्येवमर्था प्रत्यापत्तिः ॥ नैतदस्ति। नैव लोके न च वेदेऽकारो

माशङ्क्य "सिद्धन्तु आस्ये तुल्यदेशप्रयत्नम्" इति वार्तिके देशग्रहणेन समाधाय पुनरास्यग्रहणसामर्थ्येन आस्यान्तर्गतप्रयत्न एव गृह्यते, न तु आस्य वहिर्भूतः। आस्यशब्देन ओष्ठप्रभृति आकृकाटिकपर्यन्तं प्रदेशो विवक्ष्यते। कालस्तु एकद्वित्रिमात्रादिरूपो नाभिप्रदेशे एव विशिष्टप्रयत्नारम्भाज् जायमानो नाभेः आस्याद्बाह्यत्वात् बाह्य इत्युच्यते। प्रयत्नाभिनिर्वृत्तत्वात् काले प्रयत्नत्वमपि आरोपितमेव। अथ अकारो महेश्वरेण विवृत एव उपदिष्टः, वार्तिककृता तस्य फलमात्रमुच्यते, न तु अपूर्वो विवृतोपदेशः चोद्यते। इत्यत्र ज्ञापकमाह– "अ अ इति" अनेन हि सूत्रेण विवृतमुद्दिश्य संवृतो विधीयते आद्योऽकार उद्येश्यसमर्पको विवृतः, द्वितीयस्तु विधेयसमर्पकः संवृतः। अतएव तयोः सवर्णदीर्घो न सावर्ण्याभावात्। यदि तु ह्रस्वाकारे विवृतत्वमभिप्रेतं न स्यात् तर्हि तस्य संवृतोपदेशो व्यर्थ एव स्यात्, तत्सामर्थ्यात् विवृतत्वं पाणिनेरभिमतमेव। न च अतिखट्वः, अतिमालः इत्यादौ **"गोस्त्रियोरुपसर्जनस्य"** इत्यनेन आपः-स्थाने जायमानो ह्रस्व आन्तरतम्यात् विवृतः स्यात्, स्थानिनो दीर्घाकारस्य विवृतत्वात्। तथा च तस्यादिश्यमानह्रस्वाकारस्य विवृतत्वात् तस्य संवृतत्वविधानार्थमिदं सूत्रमावश्यकम्। तथा च उक्तार्थे ज्ञापकं न सम्भवति इति वाच्यम्। लोके वेदे वा ह्रस्वाकारस्य विवृतत्वाभावेन अतिखट्व

* (८। ४। ६८) ॥

विवृतोऽस्ति ॥ कस्तर्हि ?॥ संवृतः । योस्ति स भविष्यति ॥ तदेतत्प्रत्यापत्तिवचनं ज्ञापकमेव भविष्यति 'विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते' इति ॥ कः पुनरत्र विशेषः ?–विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायेत, संवृतस्योपदिश्यमानस्य वा विवृतोपदेशश्चोद्येतेति ?॥ न खलु कश्चिद्विशेषः । आहोपुरुषिकामात्रं तु भवानाह–संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते इति । वयं तु ब्रूमो–विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इति ॥

*तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः*१–२

तस्यैतस्याक्षरसमाम्नायिकस्य विवृतोपदेशाद् अन्यत्रापि विवृतोपदेशः कर्तव्यः ॥ क्वान्यत्र ? ॥ धातु–प्रातिपदिक–प्रत्यय–निपातस्थस्य ॥ किं प्रयोजनम् ?॥ 'सवर्णग्रहणार्थः' । आक्षरसमाम्नायिकेनास्य ग्रहणं यथा स्यात् ॥ किं च कारणं न स्यात् ?॥ विवारभेदादेव । आचार्यप्रवृत्तिर्ज्ञापयति—भवत्याक्षरसमाम्नायिकेन धात्वादिस्थस्य ग्रहणमिति । यदयम् 'अकः सवर्णे दीर्घः' इति प्रत्याहारेऽको ग्रहणं करोति । कथं कृत्वा ज्ञापकम् ? । नहि द्वयोराक्षरसमाम्नायिकयोर्युगपत्समवस्थानमस्ति । नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् ? । यस्याक्षरसमाम्नायिकेन ग्रहणमस्ति, तदर्थमेतत्स्यात्—खट्वाढकं माला-

---

इत्यादौ टापः स्थाने जायमानोऽपि ह्रस्वादेशः संवृत एव स्यात् । तथा च तस्य पुनः संवृतत्वविधानं व्यर्थमित्याशयात् ।

तस्य विवृतोपदेशादिति—अयं भावः चतुर्दशसूत्रीस्थस्याकारस्य विवृतत्वे प्रतिज्ञातेऽपि व्यक्तिपक्षे धात्वादिस्थाकारस्य तद्भिन्नत्वात् तस्य विवृतत्वमप्रतिज्ञातमेव । तथा च दण्ड-आढकमित्यादौ पूर्ववत् सावर्ण्याभावात् सवर्णदीर्घानापत्तिः । न च "अकः सवर्णे" इति सूत्रे द्वयोरकारयोः सवर्णयोरसम्भवाद् इकारमारभ्य प्रत्याहारे वक्तव्ये अकारमारभ्य प्रत्याहाराश्रयणबलाद् धात्वादिस्थोऽपि ह्रस्वाकारो विवृत एव इति ज्ञाप्यते इति वाच्यम् । व्यक्तिपक्षे द्वयोराक्षरसमाम्नायिकयोर्ह्रस्वाकारयोरसम्भवेऽपि आक्षरसमाम्नायिकेन

ढकमिति । सति प्रयोजने न ज्ञापकं भवति । तस्माद्विवृतोपदेशः कर्तव्यः। क एष यत्नश्चोद्यते, विवृतोपदेशो नाम, विवृतो वोपदिश्येत, संवृतो वा। को न्वत्र विशेषः ? । स एष सर्व एवमर्थो यत्नः क्रियते यान्येतानि प्रातिपदिकान्यग्रहणानि तेषामेतेनाभ्युपायेनोपदेशश्चोद्यते, तद् गुरु भवति। तस्माद्वक्तव्यम् 'धात्वादिस्थश्च विवृत' इति ।

* दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः * १—३

दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थो विवृतोपदेशः कर्त्तव्यः दीर्घप्लुतौ संवृतौ मा भूतामिति । वृक्षाभ्याम्, देवदत्त३ इति। नैव लोके न च वेदे दीर्घप्लुतौ संवृतौ स्तः। कौ तर्हि ? । विवृतौ । यौस्तस्तौ भविष्यतः ।

(एकदेशिभाष्य वा०)

'स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम्'। संवृतः स्थानी संवृतौ

एकेन ह्रस्वाकारेण "अणुदित्" सूत्रबलाद् गृहीतयो दीर्घाकारयोः खट्वा-आढकमित्यादौ सहावस्थानसम्भवात् तत्र सवर्ण दीर्घार्थ मकारमारभ्य "अकः सवर्णे" इति सूत्रे 'अक' इति प्रत्याहाराश्रयणावश्यकत्वेन उक्तज्ञापकासम्भवात्। तस्मात् **धात्वादिस्थश्च विवृत** इति वक्तव्यम् ।

ननु प्रातिपदिकधात्वादिस्थाः सूत्रे गणपाठे वा यावन्तो ह्रस्वाकाराः ते सर्वे पाणिनिना विवृता एव उच्चारणीयाः, तेषां संवृतत्वे विवृतत्वे वा लाघवगौरवा-भावात्। तथा च तदर्थं पृथक् विवृतोपदेशो नापेक्ष्यते इति चेत्-उच्यते— धात्वादिस्थाकाराणां विवृतोच्चारणे कृतेऽपि सूत्रे गणे वाऽनुच्चारितप्रातिपदिकानां शशमञ्चकादीनां स्वातन्त्र्येणैतदर्थं पृथगुपदेशे क्रियमाणे गुरुतरो यत्नः स्यात्। तदपेक्षया **धात्वादिस्थश्च विवृत** इति लघुभूतमेकं वक्तव्यम्। प्रकृतविवृतो-पदेशस्य "**आकारग्रहणार्थः**" इति एकं फलमुक्तं सिद्धान्तिना। सिद्धान्त्येकदेशी अपरमपि फलमाह "**दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थ**" इति। वृक्षाभ्यां इत्यादौ **'सुपि च'** इत्यनेन ह्रस्वस्य संवृतस्याकारस्य स्थाने जायमानो दीर्घाकार आन्तरतम्यात् संवृतो मा भूत् । तथा हे देवदत्त ३ इत्यादौ "दूराद्धूते च" इति प्लुतः पूर्ववत् संवृतो मा भूत्, तदर्थं विवृतोपदेशः इति।

दीर्घप्लुतौ प्रकल्पयेत्। 'अनुस्वारो यथा यणम्'। तद्यथा—सँय्यन्ता, सँव्वत्सरः, यँल्लोकम्, तँल्लोकमिति—अनुस्वारः स्थानी (अनुनासिकः) यणमनुनासिकं प्रकल्पयति । विषम उपन्यासः । युक्तं यत्सतस्तत्र प्रक्लृप्तिर्भवति । सन्ति हि यणः सानुनासिका निरनुनासिकाश्च। दीर्घप्लुतौ पुनर्नैव लोके नैव च वेदे संवृतौ स्तः । कौ तर्हि ?। विवृतौ। यौस्तस्तौ भविष्यतः । एवमपि कुत एतत्—तुल्यस्थानौ प्रयत्नभिन्नौ भविष्यतः,न पुनस्तुल्यप्रयत्नौ स्थानभिन्नौ स्याताम् ईकार ऊकार वेति?। वक्ष्यति 'स्थानेन्तरतमः' इत्यत्र स्थान इत्यनुवर्तमाने पुनः स्थाने ग्रहणस्य प्रयोजनम् 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयो भवति' इति ॥

सिद्धान्ती खण्डयति–लोके वेदे वा दीर्घाकारस्य प्लुताकारस्य वा संवृतत्वाभावेन तेषां प्रसक्त्यभावात् तद्वारणरूपस्य फलस्यासंभवात्। नच सँय्यन्ता इत्यादौ यथा अनुस्वारस्य स्थाने " वा पदान्तस्य " इति जायमानः परसवर्ण आन्तरतम्याद् अनुनासिक यँकारो भवति तथा देवदत्ताभ्यामित्यादौ "स्थानेऽन्तरतम" परिभाषया संवृतो दीर्घः स्याद् इति वाच्यम्। "स्थानेऽन्तरतम" परि परिभाषया हि विद्यमानानामनेकेषां प्रसक्तानां मध्ये अन्तरतमो भवतीति नियम्यते। यथा 'सँय्यन्ता' इत्यादौ अनुनासिकस्य अननुनासिकस्य च यकारस्य प्रसङ्गे अनुनासिक एव भवतीति नियम्यते, न तु तथा देवदत्ताभ्यामित्यादौ संवृतस्य विवृतस्य च दीर्घाकारस्य प्रसक्तिरस्ति। संवृतस्य दीर्घाकारस्य असंभवात्। तेन प्रकृतेऽन्तरतमपरिभाषाविषयाभावात्।

न च एवमपि देवदत्ताभ्यामित्यादौ प्रयत्नभिन्नः कण्ठस्थानमात्रेण समानो दीर्घाकारो यथा क्रियते, तथा स्थानभिन्नः संवृतप्रयत्नवत्त्वेन समानो दीर्घेकारो दीर्घोकारो वा कुतो न स्यात्। दीर्घेकारोकारयोः ऋकारस्य च "ऋृतः संवृता अन्यत्राभवसाम्नः" इत्यादिना च्छन्दोगैः संवृतत्वविधानाद्, इति वाच्यम् "यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः" इति परिभाषया स्थानतोऽन्तरतमस्य दीर्घाकारस्यैव विधानात्। अस्यां परिभाषायां ज्ञापकं च

(वर्णसमाम्नाये जातिनिर्देशाधि०)

*** तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् * २-१**

तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति 'अस्य च्वौ' 'यस्येति च' किं कारणम् ?। अनण्त्वात्। नह्येतेऽणः येऽनुवृत्तौ। के तर्हि ?। येऽक्षरसमाम्नाये उपदिश्यन्ते।

*** एकत्वादकारस्य सिद्धम् * २-२**

एकोऽयमकारो यश्चाक्षरसमाम्नाये, यश्चानुवृत्तौ, यश्च धात्वादिस्थः।

"षष्ठी स्थाने योगा" इत्यतः स्थाने ग्रहणे अनुवर्तमाने पुनः 'स्थानेऽन्तरतम' इति सूत्रे स्थानेग्रहणमेव।

ननु व्यक्तिपक्षे "इकोयणऽचि" "अकः सवर्णे दीर्घः" इत्यादौ ककारादिचिह्नेन लिङ्गेन इगगादिप्रत्याहारस्थे इकारे अकारे च चतुर्दशसूत्रीस्थोऽयमिति प्रत्यभिज्ञासम्भवात् "अणुदित्" सूत्रप्रवृत्त्या अष्टादशानामिकाराकारादीनां ग्रहणेन "सुद्ध्युपास्यः" "खट्वाढ़कम्" इत्यादौ यण्-दीर्घादिकं सिध्यति। परन्तु "अस्य च्वौ" "एरच्" इत्यादौ चतुर्दशसूत्रीस्थोऽयमकारः इकारो वा इति प्रत्यभिज्ञापक ककाराद्यनुबन्धरूपलिङ्गाभावेन तस्य अण् प्रत्याहारान्तर्गतत्वाभावनिश्चये अणुदित्सूत्राप्रवृत्तौ दीर्घादीनामग्रहणाद् गङ्गीभवति, लवः पवः, इत्यादौ ईत्वम् अच्प्रत्ययश्च न सिध्येत्। इत्याह—**तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वादिति**। अनुवृत्तिनिर्देशे इत्यस्य प्रत्याहारादिकमनन्तर्भाव्य साक्षाल्लक्ष्यसंस्कारकबोधजनकनिर्देशे इत्यर्थः (वृत्तिः शास्त्रस्य साक्षाल्लक्ष्ये प्रवृत्तिः तदनुगतो निर्देशः अनुवृत्तिनिर्देशः)

व्यक्तिस्फोटवादी सिद्धान्त्येकदेशी आह–"**एकत्वादकारस्य सिद्ध**" मिति यः अक्षरसमाम्नाये,यश्च "अस्य च्वौ इत्याद्यनुवृत्तिनिर्देशे, यश्च धात्वादिस्थः स सर्वोऽप्येक एव अकारः उदात्तादिभेदप्रतिभासस्तूपाधिभूतव्यञ्जकध्वनिकृतः खड्गतैलादर्शाद्युपाधिभेदे प्रतिबिम्बप्रतिभासभेदवत्। तथा च सर्वेषामण्त्वात् सर्वत्र ग्रहणकशास्त्रप्रवृत्तिः।

* अनुबन्धसंकरस्तु * २–३

अनुबन्धसङ्करस्तु प्राप्नोति । 'कर्मण्यम्' 'आतोनुपसर्गे कः' इति केऽपि णित्कृतं प्राप्नोति ।

* एकाजनेकाज्ग्रहणेषु चानुपपत्तिः * २–४

एकाजनेकाज्ग्रहणेपु चानुपपत्तिर्भवति । तत्र को दोषः ? । किरिणा गिरिणेत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोति । इह च घटेन तरति घटिक इति द्व्यज्लक्षणः ष्ठन् प्राप्नोति ।

* द्रव्यवच्चोपचाराः * २–५

द्रव्यवच्चोपचाराः प्राप्नुवन्ति । तद्यथा द्रव्येषु नैकेन घटेनानेको युगपत् कार्यं करोति । एवमिममकारं नानेको युगपदुच्चारयेत् ।

* विषयेण तु नानालिङ्गकरणात्सिद्धम् * २–६

यदयं विषये विषये नानालिङ्गमकारं करोति—'कर्मण्यण्' 'आतो-नुपसर्गे क' इति तेन ज्ञायते–नानुबन्धसङ्करोऽस्तीति । यदि हि स्यात्, नानालिङ्गकरणमनर्थकं स्यात्, एकमेवायं सर्वगुणमुच्चारयेत् ।

एवं वर्णैकत्वपक्षमाश्रित्यैकदेशिना समाधाने उक्तेऽपि, अपरं दोषत्रयं तत्पक्षे-पूर्वपक्षी आह–**अनुबन्धसंकरस्तु** ॥ अकारस्यैकत्वपक्षे क, ट, ण, अच् इत्यादिप्रत्ययगत-कित्व-टित्व-णित्व-चित्त्वादिप्रयुक्तं कार्य्यं सर्वत्र प्राप्नुयात् इत्येको दोषः । "**एकाजनेकाजग्रहणेषु चानुपपत्तिः**" अनुपपत्तिरित्यस्य अव्याप्त्यतिव्याप्तिरूपदोषप्रसङ्गः इत्यर्थः ।

तथा हि किरिणा (सूकरेण) गिरिणा, इत्यादौ इकारस्यैकत्वात् "**सावेकाच-स्तृतीयादिर्विभक्तिः**" इत्यनेन तृतीयाविभक्तेरन्तोदातत्वमतिव्याप्नोति, घटेन तरति घटिकः इत्यत्र अकारस्यैकत्वात् "**नौद्व्यचःष्ठन्**" इति द्व्यच्त्वप्रयुक्तःष्ठन् न प्राप्नोति इति अव्याप्तिरिति द्वितीयो दोषः । "**द्रव्यवच्च उपचाराः**" यथा–एकेन घटेन युगपद् अनेके जलाहरणादिकं कर्तुं न शक्नुवन्ति, तथा–एकमकारं युगपद् अनेके नोच्चारयेयुः, इति तृतीयो दोषः ।

एकदेशी दोषत्रयमुद्धरति–"**विषयेण तु नाना लिङ्गकरणात् सिद्ध**"मिति

नैतदस्ति ज्ञापकम् । इत्संज्ञाप्रक्लृप्त्यर्थमेतत् स्यात् । न ह्ययमनुबन्धैः शल्यकवच्छक्य उपचेतुम्। इत्संज्ञायां हि दोषः स्यात्। आयस्य हि द्वयोरित्संज्ञा स्यात्। कयोः ? आद्यन्तयोः । एवं तर्हि–

*** विषयेण तु पुनर्लिङ्गकरणात्सिद्धम् * २-६**

यदयं विषये विषये पुनर्लिङ्गमकारं करोति 'प्राग्दीव्यतोऽण्, इति "शिवादिभ्योऽण्' इति तेन ज्ञायते नानुबन्धसङ्करोऽस्तीति । यदि हि स्यात् पुनर्लिङ्गकरणमनर्थकं स्यात् ; अथवा पुनरस्तु–

*** विषयेण तु नानालिङ्गकरणात्सिद्धम् * २-७**

इत्येव । ननु चोक्तं—इत्संज्ञाप्रक्लृप्त्यर्थमेतत्स्यात्–इति । नैष दोषः । लोकत एतत्सिद्धम् । तद्यथा लोके कश्चिदेवं देवदत्तमाह–'इह मुण्डो भव इह जटिलो भव, इह शिखी भवेति यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपतिष्ठते । एवमयमकारो यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपस्थास्यते । यदप्युच्यते–'एकाजनेकाज्ग्रहणेषु चानुपपत्तिः' इति ।

स्पष्टं । खण्डयति "नैतदस्ति ज्ञापकमिति" मध्यस्थानां हलामित्संज्ञाविधायकाभावात्सा न स्यात् । आद्यन्त्ययोस्तु 'चुटू, हलन्त्यम्' इत्यादिना संभवेदिति भावः । पुनः एकदेशी आह "विषयेण तु पुनर्लिङ्गकरणात् सिद्ध"मिति। एकदेशी पुनः पूर्वोक्तं ज्ञापकं द्रढयति । अथवा पुनरस्तु "विषयेण तु नाना लिङ्गकरणात् सिद्ध"मिति । नैष दोष इति–अयं भावः–एक एव देवदत्तो ब्रह्मचर्याश्रमे जटिलः, गृहस्थाश्रमे शिखी, (शिखावान्) संन्यासे मुण्डो भवतु, इति विधौ देवदत्तस्यैकत्वेऽपि आश्रमादिरूपोपाधिभेदात् जटिलत्व-शिखित्वादिकं परस्परासंकीर्णमेकस्मिन्देवदत्ते समाविशति। तथा–एकोऽप्यकारः प्रत्ययसंज्ञकः कर्मोपपदकाद्धातोः परस्ताद् विधीयमानो णित्वकार्यं लभेत, कुम्भकार इत्यादि । तथा स एव अकारः अनुपसृष्टकर्मोपपदकाऽऽदन्तधातो र्विधीयमानः कित्त्वकार्यं लभते, गोदः कम्बलदः इति । तथा कर्मोपपदकगापाधातोर्विधीयमानोऽकारः टित्व-कित्वोभयप्रयुक्तं कार्यं लभते सामगः सामगी सुरापी इत्यादि । तथा च न संकरः । इति

*** एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात् * २-८**

एकाजनेकाज्ग्रहणेषु चावृत्तेः संख्यानादनेकाच्त्वं भविष्यति। तद्यथा- "सप्तदश सामिधेन्यो भवन्ति" इति "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इत्यावृत्तितः सप्तदशत्वं भवति। एवमिहाप्यावृत्तितोऽनेकाच्त्वं भविष्यति॥ भवेदावृत्तितः कार्यं परिहृतम्। इह तु खलु—किरिणा गिरिणेत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोत्येव। एतदपि सिद्धम्॥ कथम्?॥

(भाष्यवा०) लोकतः*। तद्यथा-ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्त्वा तया सर्वे ते सहस्रदक्षिणाः सम्पन्नाः। एवमिहाप्यनेकाच्त्वं भविष्यति॥ यदप्युच्यते-द्रव्यवच्चोपचाराः प्राप्नुवन्तीति। भवेद् यदसंभवि

एकदेशी द्वितीयं दोषं परिहरति-"एकाजनेकाज् ग्रहणेषु चाऽऽवृत्ति संख्यानात्" चातुर्मास्य-वैमृध-निरूढपश्वादि विकृतियागे सप्तदश सामिधेन्यो भवन्तीत्युक्तम्। "प्रवोवाजा" इत्यादिमन्त्रेकरणको होमविशेषः सामिधेनीपदार्थः। तत्र त्रयोदशभिः साक्षात् पठितैः चोदकप्राप्तैश्च मन्त्रैः सप्तदशत्वसंख्यापूरणासम्भवात् प्रथममन्त्रस्यान्तिममन्त्रस्य च "त्रिः प्रथमामन्वाह-त्रिरुत्तमाम्" इत्यादिना वारत्रयमावृत्तिं विधाय यथा सप्तदशत्वं सम्पादितम्। तथा घटेन तरति घटिकः इत्यत्र एकस्याकारस्यावृत्त्या द्वित्वं सम्पाद्य द्व्यच्कत्वात् ष्ठन् भविष्यति। तथा च पूर्वोक्ता अव्याप्तिः परिहृता। ननु तथापि किरिणा, गिरिणा इत्यादौ आवृत्या द्व्यच्कत्वेऽपि स्वतः सिद्धमिकारस्यैकत्वमादाय "सावेकाच इति" विभक्त्यन्तोदात्तत्वं प्रसज्येत तथा च अतिव्याप्तिस्तदवस्था- इत्याशङ्क्य खण्डयति-"एतदपि सिद्धमिति"। तद्यथा-'ऋषिसहस्रमिति" अयं भावः—सहस्रमृषय एकां गां दानप्रतिग्रहमालापरम्परारूपेण सहस्रवारं दत्त्वा सर्वेषां सहस्रदक्षिणत्वं संपादितवन्त इति स्मर्यते। न तु तत्रैकगोदानफलमपि वर्ण्यते, सहस्रगोदानफलेन एकगोदानफलस्य बाधात्। तथा च "गौणी मुख्या वा उत्तरा संख्या पूर्वां सख्यां बाधते" इति निष्पन्ननियमेन किरिणा, इत्यादौ गौणमपि द्व्यच्त्वं स्वतः सिद्धमेकाच्त्वं बाधते, तथा च नातिव्याप्तिः। तृतीयं दोषं परिहरति-"यदप्युच्यते" इति। एकघटेन

कार्यम्, तन्नानेको युगपत्कुर्यात् । यत्तु खलु संभवि कार्यमनेकोऽपि तद्-युगपत्करोति । तद्यथा—घटस्य दर्शनं स्पर्शनं वा । संभवि चेदं कार्यमकारस्य उच्चारणं नाम, अनेकोऽपि तद्युगपत्करिष्यति ॥

* आन्यभाव्यं तु कालशब्दव्यवायात् * २–९

आन्यभाव्यं त्वकारस्य ॥ कुतः ! 'कालशब्दव्यवायात् ।' कालव्यवाया-च्छब्दव्यवायाच्च । कालव्यवायात्–दण्ड+अग्रम् । शब्दव्यवायाद्–दण्ड । न चैकस्यात्मनो व्यवायेन भवितव्यम् । भवति चेद्भवत्यान्यभाव्यमकारस्य

* युगपच्च देशपृथक्त्वदर्शनात् * २–१०

युगपच्च देशपृथक्त्वदर्शनान्मन्यामहे-'आन्यभाव्यमकारस्येति । यदयं युगपद्देशपृथक्त्वेषूपलभ्यते—अश्वः, अर्कः, अर्थ इति । न ह्येको देवदत्तो युगपत्स्रुघ्ने च भवति मथुरायां च ॥

यदि पुनरिमे वर्णाः—

* शकुनिवत्स्युः * २–११

जलानयनादिकस्य युगपदनेकैरकरणेऽपि घटस्य दर्शनस्पर्शनादिकं युगपद् अनेकैः कर्तुं शक्यते । तथा अकारोच्चारणमपि शक्यं कर्तुं युगपदनेकैरित्यर्थः ।

पूर्वपक्षी एकदेशिना व्यक्तिस्फोटवादिनोक्तं वर्णैकत्वविभुत्वनित्यत्वपक्षं युक्त्या खण्डयति—"आन्यभाव्यन्तु कालशब्दव्यवायात्" अन्यस्य भावः अन्यभावः ततः स्वार्थे ष्यञ्, अन्यत्वमित्यर्थः । तत्र हेतुद्वयम्—कालव्यवायात्, कालविशिष्टशब्दव्यवायादिति च । यथा—दण्ड—अग्र-मित्यत्र पदद्वयाकारयोरर्धमात्राधिककालव्यवायः । दण्ड इत्यत्रार्धमात्रा-न्यूनकालविशिष्टणकार-डकाररूपशब्दव्यवायो द्वयोरकारयोरन्यत्वसाधकः । पूर्वपक्षी—वर्णनानात्वे साधिते विभुत्वाभावेऽपि हेतुमाह " युगपच्च देशपृथ-क्त्वदर्शनादिति " । देशपृथक्त्वेषु देशभेदेषु सत्स्वपि युगपत् वर्णानां दर्शनात् नानात्वमित्यर्थः । तथाच नानात्वाद् विभुत्वं नास्ति एकदेशी आह—"शकुनिवत् स्युरिति" कालशब्दाभ्यां व्यञ्जकानामेव ध्वनीनां व्यवायो न व्यङ्ग्यस्येति व्यक्तिस्फोटवाद्येकदेशिन आशयः=तेन नानात्वं न संभवतीति भावः । 'शकुनिवदि'ति यथा शकुनिः स्वयूथ्यपङ्क्तेरादौ स्थित

तद्यथा-शकुनय आशुगामित्वात्पुरस्तादुत्पतिताः पश्चाद् दृश्यन्ते । एव मयमकारो 'द' इत्यत्र दृष्टो 'एड' इत्यत्र दृश्यते॥ नैवं शक्यम् । अनित्यत्वमेवं स्यात् । नित्याश्च शब्दाः । नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः । यदि चायं 'द' इत्यत्र दृष्टो 'एड' इत्यत्र दृश्येत, नायं कूटस्थः स्यात् ॥ यदि पुनरिमे वर्णाः—

❀ आदित्यवत्स्युः* २-१२ ❀

तद्यथा एक आदित्योऽनेकाधिकरणस्थो युगपद्देशपृथक्त्वेषूपलभ्यते †(एवमयमकारोऽपि युगपद् देशपृथक्त्वेषूपलभ्यते) । विषम उपन्यासः-नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युगपद्देशपृथक्त्वेषूपलभते । अकारं पुनरुपलभते । अकारमपि नोपलभते । किं कारणम् ? श्रोत्रोपलब्धिर्बुद्धि-

---

आशुसंचारात्तदन्ते भवति। एवं व्यञ्जकध्वनिसंनिधानासंनिधानाभ्यामकारस्योपलम्भानुपलम्भावित्यर्थः। तथा च विभुत्वं सुस्थम् । पूर्वपक्षी कूटस्थत्वभङ्गहेतुना खण्डयति-नैव शक्यमिति । अयं भावः-वर्णैकत्वनित्यत्ववादिना मीमांसकवत् वर्णजातिर्नाङ्गीक्रियते । तथा च तन्मते दण्ड इत्यादावेकस्यैवाकारस्योदात्तत्वानुदात्तत्वादिकं न संभवति । यदि तु एक एवाकार उदात्तत्वं परित्यज्यानुदात्तो भवतीत्युच्यते, तदा कूटस्थत्वभङ्गेनानित्यताऽऽपत्तिरिति ।

पुनः एकदेशी आह-आदित्यवत्स्यु" रिति । यथा-एकः आदित्यः उदयादिकाले अनेकैः भिन्नेषु स्थानेषु दृश्यते,तथा वर्णाः एकरूपा नित्याश्च सन्तोऽपि युगपदनेकैर्नानारूपा गृह्यन्ते । खण्डयति-"विषम उपन्यास इति"एको द्रष्टाऽदित्यमुदयादिकालेऽनेकाधिकरणस्थं न पश्यति। इति वैषम्यम् । पुनः एकदेशी व्यक्तिस्फोटवादी आह-"अकारमपि नोपलभते" इति । आकाशदेशत्वं स्फोटशब्दस्य साधयति 'श्रोत्रोपलब्धि'रिति । अयं भावः-आकाशप्रदेशस्य कर्णशष्कुल्यवच्छिन्नस्य श्रोत्रत्वात्, इन्द्रियाणां चासंनिकृष्टविषयाग्राहकत्वात् श्रोत्रस्य च निष्क्रिय-

---

* मीमांसा सूत्रे तु 'आदित्यवद्यौगपद्यम् १ । १ । १५ ॥इतिपाठः

† अयं भाष्यपाठः भाष्यशैलीसिद्धोऽस्यावश्यकोपि प्राचीनतरलेखकप्रमादेन नष्टो भवेत् ॥

निर्ग्राह्यः प्रयोगेणाभिज्वलितः आकाशदेशः शब्दः। एकं च पुनराकाशम्। आकाशदेशा अपि बहवः। यावता बहवः, तस्मादान्यभाव्यमकारस्य।

त्वात् चक्षुर्वद्गमनासंभवात्संनिकर्षोपपत्तये आकाशदेशत्वं शब्दस्यावश्यमङ्गीकार्यम्, इति। श्रोत्रेणोपलभ्यत इति कर्मणि क्विन्, कत्वादिना श्रोत्रजन्योपलब्धिविषयः। बुद्धिनिर्ग्राह्य इति–यथासंभवं पूर्वपूर्वध्वन्युत्पादितमन्दतम—मन्दतर-मन्द-स्पष्ट-स्पष्टतर-स्पष्टतमाभिव्यक्तिजनितसंस्कारपरम्पराप्राप्तपरिपाकान्त्यबुद्धि-निर्ग्राह्य इत्यर्थः, वर्णानां पदस्फोटोपकारकत्वसंभवप्रदर्शनार्थमिदं विशेषणम्। वर्णमात्रे एतावत्संस्कारपरम्पराऽनुपयोगात्। प्रयोगेणाभिज्वलित इति, प्रयोगेण वैखरीध्वानिना अभिज्वलितः=स्वरूपरूषितः कृतः इत्यर्थः। इति वर्णस्फोटः।

अथ पदस्फोटनिरूपणम्–

ननु कोऽयं स्फोटः-उच्यते-चतुर्विधा हि वागस्ति परा-पश्यन्ती-मध्यमा वैखरी च। तत्र मूलाधारचक्रस्था शब्दब्रह्मरूपा परा वाक् विवक्षोत्पन्नप्रयत्नसहकृतेन पवनेनाभिव्यज्यते। ततस्तेनैव पवनेन नाभिपर्यन्तमागच्छताऽभिव्यक्ता तत्तदर्थतादात्म्यापन्नतत्तच्छब्दविशेषविवक्षाशालिन्या बुद्धिवृत्त्याऽवच्छिन्ना पश्यन्ती वागुच्यते। इदं च वाग्द्वयं सूक्ष्ममीश्वराधिदैवत्यं केवलं योगिनां समाधौ क्रमेण निर्विकल्पकसविकल्पकज्ञानविषयो भवति। ततो हृदयपर्यन्तमागच्छता तेन पवनेनाऽभिव्याञ्जिता हृद्देशस्थप्राणवृत्त्यनुगतत्वेन तत्तद्वर्णविशेषरूषिता तत्तदर्थवाचकपदस्फोटव्यञ्जिका परश्रोत्रग्रहणाऽयोग्या जपादौ बुद्धिमात्रग्राह्या हिरण्यगर्भदैवत्या मध्यमा वागुच्यते। तत आस्यपर्यन्तमागच्छता तेन पवनेन ऊर्ध्वमाक्रामता मूर्धानमाहत्य परावृत्त्य च ताल्वादिस्थानेष्वभिव्याञ्जिता परश्रोत्रेणापि ग्राह्या विराडधिदैवत्या वैखरी वागुच्यते। तदुक्तम्

परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥१॥
वैखर्या हि कृतो नादः परश्रवणगोचरः।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ॥ २ ॥

तथाच मध्यमानादव्यङ्ग्यो नित्यो ब्रह्मरूपः स्फोटात्मकः शब्द इति सिद्धम्

तदुक्तम्–

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥

अत्र च स्फोटेऽखण्डे व्यापके एकरूपे तत्तद्वर्णानां प्रतिबिम्बरूपोऽनुरागो भवति । ननु नीरूपाणां वर्णानां कथं प्रतिबिम्बनम्, रूपवतामेव मुखादीनां दर्पणकृपाणादौ प्रतिबिम्बदर्शनात्, तदुक्तमभियुक्तैः—

शब्दगन्धरसानां च कीदृशी प्रतिबिम्बता । इति चेदुच्यते—'माया-प्रतिबिम्बितं चैतन्य मीश्वरः, अविद्याप्रतिबिम्बितं चैतन्यं जीवः । इति प्रतिबिम्बेश्वर—जीववादे नीरूपस्यापि चैतन्यस्य मायास्थे प्रतिफलनेऽनुराग-विशेषरूपे यथा प्रतिबिम्बव्यवहारः शास्त्रीयो दृश्यते, तद्वदत्रापि स्फोटस्थे वर्णानुरागविशेषे प्रतिबिम्बव्यवहारो न विरुध्यते । तथा च तादृशे स्फोटे ध्वनिधर्मास्तारत्वमन्दत्वादयः, वर्णधर्माः कण्ठ्यत्वौष्ठ्यत्वादयः-उदात्तत्वानुदात्तत्वादयोऽनुनासिकत्वादयश्चानुरक्ता भासन्ते । तथा च तैस्तैरुपाधिभिर्विशिष्टः स्फोटो भिद्यते । उपाधिविशिष्टस्य च तत्तदर्थतादात्म्या-पन्नत्वमूलकं तत्तदर्थनिरूपितशक्तिमत्त्वं वाचकत्वं च सम्भवति, न च शब्दार्थ-योस्तादात्म्ये वह्नि-खड्ग-मोदकादि शब्दोच्चारणे मुखस्य दाह-पाटन-पूरणादिप्रसङ्ग इति वाच्यम् । स्फोटात्मकशब्दस्य बौद्धार्थेन वासनात्मकेन सह तादात्म्येऽपि भौतिकेन स्थूलेन सह तादात्म्याभावात् । बौद्धे च वह्नि-खड्गाद्यर्थे दाहादिशक्तेरनुद्भूतत्वेन, अनुद्भूतशक्तेश्च दाहादिकार्याजनकत्वेन दोषावसराभावात् । इति पदस्फोटः । अथ वाक्य स्फोटः–सिद्धान्ते हि 'गामा-नय' इत्यादि वाक्यस्यैव प्रवृत्तिपर्यन्तबोधजनकत्वेन, मनोहारिणी स्त्री, मनोहारिणी नेत्रे, शस्त्रं वक्ष्यति, शास्त्रं वक्ष्यति, इत्यादौ च पदसमुदायेनैव विलक्षणार्थावगतेश्च वाक्यस्फोटो मुख्यः ।

तदुक्तं हरिणा—वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः ।

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा (यथा) न च ।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन । इति

*** आकृतिग्रहणात्सिद्धम् * २-१३**

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति, तथेवर्णाकृतिः, तथोवर्णाकृतिः ॥

*** तद्वच्च तपरकरणम् * २-१४**

एवं च कृत्वा तपराः क्रियन्ते-आकृतिग्रहणेनातिप्रसक्तमिति ॥ ननु च सवर्णग्रहणेनातिप्रसक्तमिति कृत्वा तपराः क्रियेरन् ॥

शास्त्रप्रक्रियानिर्वाहार्थं तु केवलं पदस्फोटस्य वर्णस्फोटस्य (प्रकृतिप्रत्ययविभागात्मकस्य) च कल्पना—तदुक्तम्—

उपायाः शिक्ष्यमाणानां बालनामुपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥ इति

एवमभ्युपेत्यापि पूर्वपक्षी आन्यभाव्यं (वर्णनानात्वं) साधयति **'आकाशदेशा अपि बहवः, तस्मादान्यभाव्यमकारस्ये'**ति । सिद्धान्ती वर्णजातिस्फोटपक्षमादाय **'अस्यच्वौ'** इत्याद्यनुवृत्तिनिर्देशे प्राप्तदोषं परिहरति—**'आकृतिग्रहणात्सिद्ध'**मिति । अयं भावः—अत्वादिजातिः सर्वत्र निर्दिश्यते नान्तरीयकतया (ऽविनाभावितया) तु व्यक्तिनिर्देशः । तथा च प्रत्याहारेऽत्वादि जातिनिर्देशात् **'अस्य च्वौ'** इत्यादौ च तस्याः सत्त्वात् सकलह्रस्वदीर्घाद्यकारग्रहणसिद्धिरिति । **'अष्टन आ विभक्तौ'** इत्यादौ तु सत्यपि जातिनिर्देशे दीर्घनिर्देशसामर्थ्याद् ह्रस्वस्य ग्रहणं न भवति । सिद्धान्ती जातिपक्षाश्रयणे हेतुमाह—**'तद्वच्च तपरकरण'** मिति । तेन-**'अस्य च्वौ'** इत्यादिना तुल्यं तद्वत् । **'अस्य च्वौ'** इत्यादौ यथा जातिपक्षः आश्रितः, तथा **'अतो गुणे' 'अतो भिस ऐस्'** ।इत्यादौ जातिपक्ष इत्यर्थः । तथा च जातिनिर्देशादष्टादशानामकाराणां ग्रहणप्राप्तौ ह्रस्वातपरकरणात् **'तपरस्तत्कालस्य'** इत्यनेन एकमात्रिका एव षड् अकारा गृह्यन्ते इति नियम्यते । तथा च **'तपरस्तत्कालस्य'** इति नियामकसूत्रबलाज्जातिपक्षः पाणिनेरभिप्रेत इत्यर्थः ।

ननु **'अणुदित्सूत्रेण'** अष्टादशादीनां ग्रहणप्रसक्तौ तपरत्वं नियामकं सम्भवति, तथा च कथं तदन्यथाऽनुपपत्त्या जातिपक्षः कल्प्यते इति चेन्न

प्रत्याख्यायते तत्-सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वाच्च, इति ॥

* हल्ग्रहणेषु च * २-१५

[हल्ग्रहणेषु च] 'आकृतिग्रहणात्सिद्धम्' इत्येव । 'झलोझलि' अवात्ताम् अवात्तम् अवात्त । यत्रैतन्नास्ति—'अण् सवर्णान्गृह्णाति' इति ।

अणुदित्सूत्रेऽण्ग्रहणस्य प्रत्याख्यायमानत्वात् । 'अस्यच्वौ' इत्याद्यर्थं जातिपक्षेऽवश्याश्रयणीये तेनैव 'अकः सवर्णे' इत्यादावपि सकलाकारादि ग्रहणसिद्धौ अण्ग्रहणोपायो व्यर्थ इत्याह-ननु चेत्यादिना। जातिपक्षेऽपि विवृतत्वातिदेशप्रतिज्ञा दण्डाढकमिति सवर्णदीर्घार्थमावश्यिकैव। 'अ अ इति'-इति संवृतता प्रत्यापत्ति वचनमप्यपेक्ष्यत एव। विधेये त्यदादीनामः—इत्यादौ जातिपक्षप्राप्त-गुणभेदकत्वपक्षप्राप्त दीर्घादि ग्रहणवारणाय 'अणुदित्सूत्रे अविधीयमानार्थकमप्रत्यय-ग्रहणमावश्यकम् । केवलमण्-ग्रहणं जातिपक्षे मास्तु, उदित्ग्रहणमिष्टमेव । अण् ग्रहणप्रत्याख्यानेऽपि 'ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्' इति वार्तिकेन समान जातित्वातिदेशात्प्रालृकारीयतीत्यादिसिद्धिः ।

किञ्च अणुदित्सूत्रेऽण्ग्रहणेन 'अचां हयवरलानां च सवर्णग्राहकत्वे उक्तेऽपि तदन्येषां हलां व्यक्तिपक्षे एकव्यक्तिग्रहणेऽपर व्यक्तेर्ग्रहणं दुरुपपादं। तथा च वस् धातो लुङि 'अवात्ता'मित्यादौ 'सस्यार्धधातुके' इति सस्य तादेशे 'अवात् स् ता'मिति स्थिते झल् प्रत्याहारेण एकतकारव्यक्तेर्बोधेऽपरतकारव्यक्ति ग्रहणासंभवात् पञ्चम्यन्त-झल्-पदेन तकारग्रहणे सप्तम्यन्त झल्पदेन तद्ग्रहणा-संभवः । सप्तम्यन्तेन तकारग्रहणे च पञ्चम्यन्तेन तद्ग्रहणासंभवः । तथा च प्रतिलक्ष्यं लक्षणोपप्लवपक्षेऽपि अवात्स्तामित्यादौ 'झलो झलि' त्यस्याप्रवृत्त्या अवात्ता मित्यस्याऽसिद्धिः । सूत्रं तु अबान्धामित्यादौ चरितार्थं । तत्र अबान्ध् स् तामिति स्थिते पञ्चम्यन्त-सप्तम्यन्त-झल्पदाभ्यामुपादीयमानव्यक्त्योर्भेदात् । तस्मात्तत्रापि जातिपक्षेणैवेष्टसिद्धिरित्याह 'हल्ग्रहणेषु च' इति ।

इदानीं हल्ग्रहणेषु जातिपक्षानाश्रयणेऽपि व्यक्तिपक्षेणेष्टसिद्धिर्भवतीत्याह

* रूपसामान्याद्वा २-१६ *

रूपसामान्याद्वा सिद्धमेतत् । तद्यथा 'तानेव शाटकानाच्छादयामः, ये मथुरायाम्' 'तानेव शालीन् भुञ्ज्महे, ये मगधेषु' 'तदेवेदं भवतः कार्षापणं यन्मथुरायां गृहीतम्'। अन्यस्मिंश्चान्यस्मिन् रूपसामान्यात् 'तदेवेदम्' इति भवति । एवमिहापि रूपसामान्यात्सिद्धम्२ ॥

(लृकारोपदेशफलाचिन्ताधि०)

ऋलृक् ॥२॥

अथ लृकारोपदेशः किमर्थः ! किं विशेषेण लृकारोपदेशश्चोद्यते, न पुनरन्येषामपि वर्णानामुपदेशश्चोद्यते। यदि किंचिदन्येषामपि वर्णानामुपदेशे

'रूपसामान्याद्वा' इति। अयं भावः—व्यक्तिपक्षे अचा मुदात्तानुदात्तत्वादिधर्मैः, ह्रस्वत्वदीर्घत्वादिभिः, आनुनासिक्याननुनासिकत्वाभ्यां च भेदात् तेषां सर्वेषां रूपसामान्याभावाद् 'अणुदित्सूत्रे' अणग्रहणेन सवर्णानां ग्रहणं क्रियते न च व्यक्तिपक्षे 'अस्य च्वौ' इत्यादौ अकारस्याणत्वाभावात् कथं तेन दीर्घादिग्रहणं ? रूपसामान्यपक्षश्च तत्र ह्रस्वत्वदीर्घत्वादिधर्मभेदेन न संभवतीति वाच्यम् । उच्चारित एव शब्दः प्रत्यायको नानुच्चारित इत्यणुदित्सूत्रभाष्योक्त्या दीर्घादीनामगादि-पदवृत्त्याऽनुपस्थितत्वेन तेषा मनन्वयापत्तिपरिहाराय व्यक्तिपक्षेऽगादिप्रत्याहारेऽपि तद्वाच्यवाच्ये निरूढ लक्षणाङ्गीकारावश्यकत्ववत् 'अस्यच्वौ' इत्यादावपि अकारादिपदस्य स्वसदृशवाच्ये लक्षणायाः संभवात् । अणुदित्सूत्रं तु सवर्णत्वरूपलक्ष्यतावच्छेदकज्ञानोपयोगि । तथा च न कश्चिद्दोष इति दीक्षितानुयायिनः । तथा यवलानामपि अनुनासिकत्वाननुनासिकत्वाभ्यां भेदसत्त्वात् तेषामप्यणप्रत्याहारेऽन्तर्भावावश्यकता । अन्येषां हलां तु तादृशधर्मभेदाभावेन परस्परं रूपसामान्यसत्त्वात् सामान्यमूलकाभेदारोपेणैवेष्टसिद्धिः । तानेव शाटकानाच्छादयाम इति लौकिक व्यवहारवत् । तथा च व्यक्तिपक्षे ऽचां यवलानां च विषयेऽणुदित्सूत्रेऽणग्रहणरूपः शास्त्रीयः उपायः । अन्यवर्णेषु तु रूपसामान्यं लौकिक उपायः । जातिपक्षे तु आकृतिग्रहणात्सिद्धमित्याकृतिग्रहणम् अज्झल् साधारणः एक एवोपाय इति विवेकः ।

प्रयोजनमस्ति, ऌकारोपदेशस्यापि तद् भवितुमर्हति। को वा विशेषः ?॥ अयमस्ति विशेषः। अस्य हि ऌकारस्याल्पीयांश्चैव प्रयोगविषयः, यश्चापि प्रयोगविषयः सोऽपि क्लृप्तिस्थस्यैव। कृपेश्च लत्वमसिद्धम्। तस्यासिद्धत्वादृकारस्यैवाच्कार्याणि भविष्यन्ति। नार्थ ऌकारोपदेशेन॥ अत उत्तरं पठति—

* ऌकारोपदेशो यदृच्छाऽशक्तिजानुकरणप्लुत्याद्यर्थः * ३-१

ऌकारोपदेशः क्रियते यदृच्छाशब्दार्थोऽशक्तिजानुकरणार्थः प्लुत्याद्यर्थश्च॥ यदृच्छाशब्दार्थस्तावत्-यदृच्छया कश्चिद् ऌतको नाम। तस्मिन्नच्कार्याणि यथा स्युः—दध्य्‌ऌतकाय देहि, मध्व्‌ऌतकाय देहि, उदङ्ङ्‌ऌतको ऽगमत् प्रत्यङ्ङ्‌ऌतकोऽगमत्। चतुष्टयी शब्दानां प्रवृत्तिः-जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चतुर्थाः॥

अकारस्य विवृतत्वं प्रक्रियादशायां प्रतिज्ञाय अकारादीनामत्वादि जातिवाचकत्वं च प्रसाद्ध्य ऌकारोपदेशफलं पाणिन्युद्देशेनास्ति नवेति चिन्त्यते। "ऌकारोपदेशो यदृच्छाऽशक्तिजानुकरणप्लुत्याद्यर्थः" यदृच्छाशब्दः-संज्ञाशब्दः। ऌतको नाम कश्चित् तस्मै ऌतकाय,दध्य्‌ऌतकाय देहि इत्यादौ ऌकारोपदेशाभावे तस्याच्त्वाभावात् यणादिकं न स्यात्।

"**चतुष्टयी शब्दानां प्रवृत्ति**"रिति, अयं भावः—घटादयः शब्दाः व्यवहारकाले व्यक्तिबोधार्थं प्रयुक्ता अपि व्यक्तीना मानन्त्यात्, तथा एकव्यक्तौ शक्तिस्वीकारे अपरव्यक्तौ लक्षणायां विनिगमनाविरहात्। सर्वासु व्यक्तिषु शक्तिस्वीकारे एकव्यक्ति बोधाभिप्रायेण शब्दप्रयोगे तस्मिन्नेव शब्दे अपरव्यक्तिनिरूपितशक्तिसत्वेन शक्तिमत्त्वरूप कारण सत्वेऽपि अपर व्यक्तिबोधरूपकार्यानुत्पत्त्या अन्वयव्यभिचारः, इत्यादिदोषप्रसङ्गः। तस्मात् तत्तद्व्यक्तिविशेषणीभूते एकरूपे अव्यभिचारिणि उपाधौ शक्तिः स्वीकरणीया। तस्य चोपाधेः चतुर्विधत्वात् शब्दानां चतुर्विधं प्रवृत्तिनिमित्तमिति गीयते। तच्च जाति–गुण–क्रिया–यदृच्छा–शब्दरूपम्। तत्र घटत्वादिजातिप्रवृत्ति निमित्तकाः घटादिशब्दाः जातिशब्दाः इत्युच्यन्ते। शुक्लादिगुणप्रवृत्ति

अशक्तिजानुकरणार्थः—अशक्त्या कयाचित् ब्राह्मण्या 'ऋतक' इति प्रयोक्तव्ये 'ऌतक' इति प्रयुक्तम्। तस्यानुकरणं 'ब्राह्मण्यॢतक इत्याह' 'कुमार्यॢतक' इत्याहेति ॥

प्लुत्याद्यर्थश्च (ऌकारोपदेशः कर्तव्यः) के पुनः प्लुत्यादयः ॥ प्लुतिद्विर्वचनस्वरिताः। क्लृ३प्तशिख* । क्लृप्प्तः। प्रक्लृप्तः। प्लुत्यादिषु कार्येषु कृपे लत्वं सिद्धम्। तस्य सिद्धत्वादच्कार्याणि न सिध्यन्ति। तस्माद् ऌकारोपदेशः क्रियते॥ नैतानि सन्ति प्रयोजनानि।

* न्याय्यभावात्कल्पनं संज्ञादिषु * ३-२

निमित्तकाः शुक्लादयः शब्दाः गुणशब्दाः इत्युच्यन्ते। पाक—लवनादि क्रिया प्रवृत्ति निमित्तकाः पाचक–पक्व–लावक–लूनादिशब्दाः क्रियाप्रवृत्तिनिमितकाः–इत्युच्यन्ते। देवदत्त-सूर्य-चन्द्रादिशब्दाः शब्दप्रवृत्तिनिमित्तका उच्यन्ते। इति

"अशक्तिजानुकरणार्थ इति' अशक्तिजस्य (अनुकार्यस्य अपभ्रष्टत्वात् असाधुरूपस्य) अनुकरणं साधुभूतं, तदर्थः उपदेश इत्यर्थः। ब्राह्मण्यॢतक इत्याह। अत्र इतिशब्दपरकत्वेन ऌतकशब्दोऽनुकरणभूत इति बोध्यते।

"प्लुत्याद्यर्थ इति" क्लृ३प्तशिख इत्यत्र "गुरो रनृत" इति प्लुतः। क्लृप्तः, अत्र अचः परत्वात् पकारस्य "अनचि च" इति द्विर्वचनम्। प्रक्लृप्तः-प्रपूर्वात् कृपेः अन्तर्भावितण्यर्थात् कर्मणि क्ते, गतिरनन्तर इति पूर्वपदप्रकृति स्वरे अनुदात्तं पदमेकवर्जम्" इत्यनेन शिष्टस्य अनुदात्तत्वे "उदात्तादनुदात्तस्य-स्वरितः" इति ऌकारस्य स्वरितत्वम्।

पूर्वपक्षी उक्तप्रयोजनानि खण्डयति—'न्याय्यभावात् कल्पनं संज्ञादिषु" ऋतधातोः सौत्रात् "क्वुन् शिल्पिसंज्ञयोः" इति क्वुन् प्रत्यये

---

* गुरोरनृतो ८। २। ८६॥ इति प्लुते कर्तव्ये ऌकारे 'ऋऌ वर्णयोर्मिथः सावर्ण्य'मिति सवर्ण संज्ञामाश्रित्य 'अनृतः' इति प्रतिषेधस्तु न प्रवर्त्तते। भाष्यकृता ऋकारऌकारयोः सवर्णसंज्ञाप्रयोजनस्य 'वासुप्यापिशलेः ६।१।९२, ऋत्यकः ६। १। १२८' इति सूत्रविषयत्वेनैव दर्शितत्वात्। अत एव भिन्न-भिन्नकार्यार्थं धातुषु ऋतऌतोः पृथगनुबन्धत्वेन करणं चरितार्थम्।

न्याय्यस्य ऋतकशब्दस्य भावात् कल्पनं संज्ञादिषु साधु मन्यन्ते—ऋतक एवासौ न लृतक इति ॥ अपर आह—न्याय्य ऋतकशब्दः शास्त्रान्वितोऽस्ति । स कल्पयितव्यः साधुः संज्ञादिषु, ऋतक एवासौ, न लृतक इति ॥ अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः—लृफिडः लृफिड्डश्चेति॥ एषोऽपि ऋफिडः, ऋफिड्डश्च। कथम्?॥ अर्तिप्रवृत्तिश्चैव हि लोकेलक्ष्यते फिडफिड्डावौणादिकौ प्रत्ययौ ॥ त्रयी च शब्दानां प्रवृत्तिः-जातिशब्दा गुणशब्दाः क्रियाशब्दा इति । न सन्ति यदृच्छाशब्दाः ॥

"ऋतक" इति निष्पद्यते, स च शब्दः कृदन्तं नाम कुर्यात् इति स्मृत्या संज्ञात्वेन कल्पने न्याय्यः, लृतकशब्दस्तु अधातुनिष्पन्नत्वात् न न्याय्यः। तथा च सर्वेषां संज्ञाशब्दानां धातुनिष्पन्नत्वेन क्रियाशब्दत्वमेव, न तु संज्ञाशब्दाः क्रियाशब्देभ्यः पृथक् सन्तीति भावः ।

"अपर आहे"ति। पूर्वमुक्तम्-ऋतक शब्द एव न्याय्यत्वात् प्रयोक्तव्यो, न तु लृतकशब्द इति। इदानीं तु ऋतकशब्दस्यैवायमपभ्रंशोऽशक्तिजत्वात् लृतक इत्युच्यते, स्वतन्त्र लृतकशब्दो नास्तीति भावः । एवं लृफिडादिशब्दानामपि ऋफिडादिशब्दप्रकृतिकत्वमेव । तथा च त्रयी शब्दानां प्रवृत्तिरिति सिद्धम् । क्रियाशब्दातिरिक्तयदृच्छाशब्दरूपचतुर्थप्रकाराभावात् । एवं जातिशब्दा गुणशब्दा अपि यथासम्भवं धातुनिष्पन्ना एव बोध्याः । ननु सर्वेषां शब्दानां धातुनिष्पन्नत्वे सर्वेषां कृदन्तत्वात् 'कृत्तद्धित समासाश्च' इति अनेन प्रातिपदिकत्वे सिद्धे 'अर्थवत्' सूत्रं व्यर्थं। तत्सामर्थ्याद् अधातुनिष्पन्ना यदृच्छाशब्दा अपि कल्प्यन्ते इति चेन्न । परमगार्ग्यायणः देवीभागवतः इत्याद्यर्थम् अर्थवत्सूत्रस्यावश्यकत्वेन तद्वैयर्थ्यमूलकज्ञापनासम्भवात् । ननु "चतुष्टयी शब्दानां प्रवृत्ति"रिति पक्षमाश्रित्य यदृच्छाशब्दार्थो लृकारोपदेशः इति फलमुक्तम्। यदृच्छाशब्दानां क्रियाशब्देऽन्तर्भावं कृत्वा त्रयी शब्दानां प्रवृत्तिरिति पक्षमाश्रित्य फलं खण्डितम्। तथा च प्रत्याख्यानासङ्गतिः, लृकारोपदेशकल्पे लृतकशब्दस्य शब्दप्रकारको व्यक्तिविशेष्यको बोधः, प्रत्याख्यान कल्पे तु लृतकशब्दस्य क्रियाप्रकारको व्यक्तिविशेष्यको बोधः, इति वैषम्यम् ।

अन्यथा कृत्वा प्रयोजनमुक्तम् अन्यथा कृत्वा परिहारः । सन्ति यदृच्छाशब्दा इति कृत्वा प्रयोजनमुक्तम्, न सन्तीति परिहारः । समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्तको भवति। तद्यथा देवदत्तशब्दो देवदिण्णशब्दं निवर्तयति, न गाव्यादीन् ॥ नैष दोषः । पक्षान्तरैरपि परिहारा भवन्ति ।

*अनुकरणं शिष्टाऽशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु *३-३

अनुकरणं हि शिष्टस्य वा साधु भवति अशिष्टाप्रतिषिद्धस्य वा; नैव तद्दोषाय भवति, नाभ्युदयाय ॥ 'यथा लौकिक वैदिकेषु' । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु । लोके तावत्-य एवमसौ ददाति, य एवमसौ यजते, य एवमसावधीते इति । तस्यानुकुर्वन् दद्याच्च यजेत चाधीयीत च । सोप्यभ्युदयेन युज्यते। वेदेऽपि—"य एवं विश्वसृजः सत्त्राण्यध्यासते' इति । तेषामनुकुर्वन् तद्वत्सत्त्राण्यध्यासीत । सोऽप्यभ्युदयेन युज्यते । अशिष्टाप्रतिषिद्धं यथा-य एवमसौ हिक्कति य एवमसौ हसति, य एवमसौ कण्डूयतीति तस्यानुकुर्वन् हिक्केच्च, हसेच्च, कण्डूयेच्च, नैव तद्दोषाय स्यान्नाभ्युदयाय। यस्तु खल्वसौ ब्राह्मणं हन्ति, एवमसौ सुरां पिबतीति तस्यानुकुर्वन् ब्राह्मणं हन्यात् सुरां वा पिबेत्, सोऽपि मन्ये पतितः स्यात् ।

तदाह—"समाने चार्थे शास्त्रान्वितो अशास्त्रान्वितस्य निवर्तको भवति"। खण्डयति—नैष दोष इति । "पक्षान्तरैरपि परिहारा भवन्ति इति" । यथा-द्रव्यपक्षे सरूपसूत्रारम्भो जातिपक्षे प्रत्याख्यानम् । अशक्तिजानुकरणार्थत्वरूपं द्वितीयफलं वार्तिककारः खण्डयति 'अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेष्वि' ति । अनुकरणमनुकार्यत्रैविध्यात्त्रिविधं भवति, तत्रानुकार्यं विहितम्, अविहिताप्रतिषिद्धम्, प्रतिषिद्धं चेति त्रिविधम् । तत्राद्यस्यानुकरणे पुण्यफलोत्पत्तिः, द्वितीये न पुण्यं नापि पापम्, तृतीये तु पापमेव,तदाह-यस्तुखल्वेवमसौ ब्राह्मणं हन्ति सुरां पिबतीत्यादि । एवं च प्रकृतेऽनुकार्यस्य लृतकशब्दस्याऽपभ्रष्टत्वेन दुष्टत्वादनुकरणम्लृतकशब्दोऽप्यसाधुः ।

विषम उपन्यासः । यश्चैवं हन्ति, यश्चानुहन्ति, उभौ तौ हतः । यश्चापि पिबति, यश्चानुपिबति, उभौ तौ पिबतः । यस्तु खल्वेवमसौ ब्राह्मणं हन्ति, एवमसौ सुरां वा पिबतीति तस्यानुकुर्वन् स्नातानुलिप्तो माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात् पयो वा पिबेत्, न स मन्ये पतितः स्यात् । एवमिहापि य एवमसावपशब्दं प्रयुङ्क्ते इति तस्यानुकुर्वन्नपशब्दं प्रयुञ्जीत, सोऽप्यपशब्दभाक् स्यात् ।

अयं त्वन्योऽपशब्दपदार्थकः शब्दो, यदर्थ उपदेशः कर्तव्यः । न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति । अवश्यं चैतदेवं विज्ञेयम् । यो हि मन्यतेऽपशब्दपदार्थकः शब्दोऽपशब्दो भवतीति, अपशब्द इत्येव तस्यापशब्दः स्यात् । न चैषोऽपशब्दः ।

अयं खल्वपि भूयोऽनुकरणशब्दोऽपरिहार्यः यदर्थ उपदेशः कर्तव्यः—

भाष्यकृत् वार्तिककृन्मतं खण्डयति 'विषम उपन्यास'। इति ब्राह्मणहननसुरापानादौ तस्या एव एकजातीयक्रियायाः परेणानुष्ठाने सादृश्याभावान्नास्त्यनुकरणत्वम् । अनुकरणत्वं तु विजातीयक्रियायां सादृश्ये सति सम्भवतीत्याह—'यस्तु खल्वेव'मिति । 'स्नातानुलिप्त' इति स्वस्थचित्तत्वं दर्शयति । 'माल्यगुणकण्ठ' इति सर्वैर्दृश्यमानत्वं प्रकाश्यमानत्वं चोच्यते । अकार्यं तु अस्वस्थचित्तेन, अप्रकटतया च क्रियते इति भावः। एवं च साक्षाद्यदि ऋतकार्थे लृतकशब्दः प्रयुज्यते तदाऽपशब्दः । यदा तु लृतक इत्यानुपूर्वीमात्रं बोधयति, न तु ऋतकशब्दस्यार्थेन सह लृतकशब्दस्य कश्चित्सम्बन्धः, तदातु विषयभेदात् लृतकशब्दः साधुरेव । यथा तुरङ्गमरूपार्थे अश्वशब्दस्थानेऽस्वशब्दः प्रयुज्येत तदाऽसाधुः। दरिद्ररूपार्थे तु साधुरेव। यथा वा–गोरूपार्थे गोणी शब्दोऽसाधुः, आवपनरूपार्थे तु साधुरेवेति । यो हि मन्यते अपशब्दवाचकः शब्दोऽपशब्दः स्यादिति–तन्मते अपशब्द–असाधु–अपभ्रष्ट–दुष्टादयः शब्दाः सर्वेऽपशब्दा भवेयुः, न च तथेष्यते । तस्माद् लृतकाद्यपभ्रंशाना मनुकार्याणां वाचकोऽनुकरणशब्द लृतकादिः साधुरेव तदर्थं चोपदेश आवश्यकः ।

यत्र अनुकार्यस्य दुष्टत्वं नास्ति, तदनुकरणार्थं चोपदेशफलमित्याह–'अयं खल्वपी'ति । साध्व्लृकारमधीते इति । खण्डयिता–ननु इदं यदि

साध्व्लृकारमधीते, मध्व्लृकारमधीते इति ॥ कस्थस्य पुनरेतदनुकरणम्?॥ क्लृपिस्थस्य। यदि क्लृपिस्थस्य, क्लृपेश्च लत्वमसिद्धम्, तस्यासिद्धत्वादृकार एवाच्कार्याणि भविष्यन्ति। भवेत्तदर्थेन नार्थः स्यात्। अयं त्वन्यः क्लृपिस्थपदार्थकः शब्दः, यदर्थ उपदेशः कर्तव्यः। न कर्तव्यः। इदमवश्यं कर्तव्यम् 'प्रकृतिवदनुकरणं भवति' इति ॥ किं प्रयोजनम्?। 'द्विः पचन्त्वित्याह' 'तिङ्ङतिङ' इति निघातो यथा स्यात्। 'अग्नी इत्याह' 'इदूदेद्द्विवचनं प्रगृह्यम्' इति प्रगृह्यसंज्ञा यथा स्यात्। यदि-प्रकृतिवदनुकरणं भवतीत्युच्यते, अपशब्द एवासौ भवति—कुमार्य्लृतक इत्याह, ब्राह्मण्य्लृतक इत्याह, अपशब्दो ह्यस्य प्रकृतिः। न चापशब्दः प्रकृतिः। न ह्यपशब्दा उपदिश्यन्ते। न चानुपदिष्टा प्रकृतिरस्ति।

क्लृपिस्थस्य लृकारस्यानुकरणं तदा 'प्रकृतिवदनुकरणं भवति' इति परिभाषया प्रकृतौ (अनुकार्ये) यथा लत्वस्यासिद्धत्वादृकारबुध्यैवाच्कार्याणि भवन्ति, तथाऽनुकरणेऽपि स्युः। इयं च परिभाषा 'द्विः पचन्तु' इत्याह अग्नी इति, इत्याद्यर्थमावश्यिका—तथा हि प्रकृते 'पचन्तु' शब्दस्य इतिपरत्वेन शब्दपरत्वाद् क्रियावाचकत्वाभावेन धातुत्वतिङन्तत्वादिव्यवहारस्य तत्र साक्षादसम्भवात् 'प्रकृतिवदनुकरण' मित्यतिदेशेनैव तिङन्तत्वमादाय 'तिङ्ङतिङ' इति निघातः (सर्वानुदात्तत्वं) सम्पद्यते। तथा 'अग्नी' इत्यस्यापि पूर्ववच्छब्दपरत्वेन द्वित्वबोधकत्व द्विवचनान्तत्वाभावात् 'ईदूदेदिवचनं प्रगृह्यम्' इत्यस्याप्राप्तौ पूर्वोक्तातिदेशेनैव प्रगृह्यसंज्ञा—प्रकृतिभावौ भवतः-इत्याशयेनाह **'नकर्तव्य'** इति। उक्तोऽर्थः। किं चानेनैवातिदेशेन ब्राह्मण्य्लृतक इत्याहेत्यादौ लृतकशब्देऽनुकार्यवृत्त्य साधुत्वातिदेशे सति असाधौ च शास्त्रप्रवृत्त्यभावान्नास्ति अशक्तिजानुकरणार्थत्वमपि लृकारोपदेशफलम्-इत्याह 'यदि' इति। प्रकृतिवदनुकरणमिति परिभाषास्वीकारे दोष एवेत्यर्थः।

सिद्धान्ती आह-**'न चापशब्दः प्रकृतिः'** इति। अयं भावः-साधुत्वं द्विविधं प्रयोगप्रवृत्तिप्रयोजकं-शास्त्रप्रवृत्तिप्रयोजकं च तत्राद्यं येन शास्त्रेण शब्दस्य परिनिष्ठिता ज्ञाप्यते तच्छास्त्रगम्यं। द्वितीयं तु सामान्यशास्त्रगम्यं—यथा

* एकदेशविकृतस्यानन्यत्वात् प्लुत्यादयः * ३-४

'एकदेशविकृतमनन्यवद्भवति' इति प्लुत्यादयोऽपि भविष्यन्ति। यदि 'एकदेशविकृतमनन्यवद्भवति' इत्युच्येत 'राज्ञः क च' राजकीयम् 'अल्लोपोऽन' इति लोपः प्राप्नोति॥ एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्य।

'भूवादयो धातवः' इत्यनेन भूप्रभृतीनां धातुत्वं साधुत्वे च बोधिते तदुद्देशेन 'वर्तमाने लट्' 'तिप्तस्झी'त्यादीनि प्रवर्तन्ते। आणवयति, वट्टयतीत्यादि-प्राकृतभाषास्थेषु तु शास्त्रप्रवृतिप्रयोजकसाधुत्वस्य 'भूवादय' इत्यनेनाऽबोधनात् तेषु 'तिप्तस्झी' त्यादीनां प्रवृत्त्यभावात्—परिनिष्ठिततासंपादकशास्त्रबोध्य-प्रयोगप्रवृतिप्रयोजकसाधुत्वाभावाद्—आणवयतीत्यादीनां याज्ञे कर्मणि प्रयोगे प्रत्यवायोत्पत्तिर्भवति। तथा 'गगरी' इत्यादि लौकिकशब्दानाम् 'अर्थवत्सूत्रेण प्रातिपदिकत्व-साधुत्वयोरबोधनान्न नदीसंज्ञादिकम्। तथा 'लृतक' इत्यपभ्रष्टशब्दे केनापि शास्त्रेण शास्त्रप्रवृत्तिप्रयोजकसाधुत्वबोधनाभावात् तत्र च यत्किंचिच्छास्त्री-योद्देश्यत्वाभावात् प्रकृतित्वं नास्ति। अत्र परिभाषायां च प्रत्यासत्त्या शास्त्रीय-प्रकृतिगृह्यते 'तत्वं च यत्किंचिच्छास्त्रीयोद्देश्यताश्रयत्वरूपमेवेति'। तथा च लृतकशब्दानुकरणेऽनेनातिदेशेनऽसाधुत्वाप्राप्त्या तदर्थं लृकारोपदेश आवश्यक इति सिद्धम्।

इदानीं प्लुत्याद्यर्थत्वरूपं फलं खण्डयति एकदेशी **'एकदेशवि-कृतस्यानन्यत्वात्प्लृत्यादयः'** इति। एकदेशेन (अवयवावच्छेदेन) विकृतं विकारविशिष्टं अन्यवन्न भवति, किं तु तदेवेति प्रत्यभिज्ञायते यथा च्छिन्नपुच्छः श्वा शुनोऽन्यो न भवति, किं तु श्वा इत्येव व्यवह्रियते तद्वादित्यर्थः। तथा चानया परिभाषया क्लृ३प्तशिख, क्लृप्तः, प्रक्लृप्तः इत्यादौ ऋकारावयवरेफे यो लादेशरूपो विकारः, तद्वैशिष्ट्येऽपि ऋकारबुद्धिर्न विहन्यते, तयैव च प्लृत्यादि सिद्धिरिति भावः।

शङ्कते—ननु यदि एकदेशविकृतमनन्यवद्भवति तर्हि राजकीयमित्यत्र नकारस्य ककारादेशेऽपि 'अल्लोपोऽन' इति प्रवर्तेत। उत्तरम् **'षष्ठीनिर्दिष्टस्येति** उक्तोऽतिदेशः विकारविधौ षष्ठीनिर्दिष्टस्यानन्यताबोधक इत्यर्थः। तथा च राजक्–शब्दे राजन्शब्दत्वारोपो भविष्यति 'राज्ञः क च' इति विकारविधौ

यदि—षष्ठीनिर्दिष्टस्येत्युच्यते 'क्लृ३प्तशिख इतिप्लुतो न प्राप्नोति । न ह्यत्र ऋकारः षष्ठीनिर्दिष्टः । कस्तर्हि । रेफः । ऋकारोऽप्यत्र षष्ठीनिर्दिष्टः । कथम् ? । अविभक्तिको निर्देशः–कृप उः रः लः 'कृपो रो ल' इति ।

अथवा पुनरस्तु अविशेषेण ॥ ननु चोक्तं 'राज्ञः क च' राजकीयम् 'अल्लोपोऽनः' इति प्राप्नोति, इति । नैष दोषः । वक्ष्यत्येतत्—''श्वादीनां संप्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम्'' इति । तत्प्रकृत-मुत्तरत्रानुवर्तिष्यते–'अल्लोपोऽनः' नकारान्तस्येति ॥ इह तर्हि क्लृ३प्तशिख 'अनृतः' इति प्रतिषेधः प्राप्नोति ॥

❀ रवत्प्रतिषेधाच्च ❀ ३–५

राजन् इत्यस्य षष्ठीनिर्दिष्टत्वात्, तद्घटके अन्शब्दे तु अन्रूपता नारोपयितुं शक्या अन्रूपस्य 'राज्ञः क च' इत्यत्र षष्ठीनिर्दिष्टत्वाभावात् । प्रत्यासत्त्या च यद्विकारविशिष्टेऽनन्यत्वमानेयं तद्विकारविधायकशास्त्रे षष्ठीनिर्दिष्टत्वं गृह्यते तेन 'अल्लोपोऽन' इत्यत्रानः षष्ठीनिर्दिष्टत्वेऽपि न दोषः । 'कृपो रोलः' इत्यत्र ऋकारस्यापि षष्ठीनिर्दिष्टत्वं साधयति 'कृप, उः, रः, लः इति ।

छिन्नपुच्छशुनो दृष्टान्तेन सिद्धे लौकिके न्याये षष्ठीनिर्दिष्टस्येति पूरणासम्भवं मत्वाह—अथ वेति । शास्त्रीये तु स्थानिवत्त्वातिदेशे षष्ठीनिर्दिष्टत्वं सम्भवेत्, न तु लौकिके, एष च लौकिकन्यायः सूत्रकृता 'प्राग् दीव्यतोऽण्' इत्यादौ सूत्रे आश्रित इति भावः । राजकीय इत्यत्रोक्तदोषं परिहरति नैषदोष इति—'श्वयुवमघोनामतद्धिते' इति सूत्रेण विहितं सम्प्रसारणं मघवन्-शब्दे 'मघवा बहुलम्' इति त्रादेशकल्पे मघवतः इत्यादौ माभूत्, तदर्थं तत्र सूत्रे नकारान्तग्रहणं कृत्वा श्रूयमाणनकारान्तानां सम्प्रसारणं भवति । त्रादेशकल्पे तु श्रूयमाणनकारान्तत्वं नास्तीति न दोषः । तदेव च नकारान्तग्रहणम् 'अलोपोऽनः इत्यत्रानुवर्तते, तथा च राजकीय इत्यादौ कादेशे कृते श्रूयमाण-नकारान्तत्वं नास्ति इति न दोषः, इत्यर्थः ।

प्रयोजनवादी 'एकदेशविकृतमनन्यव' दिति लोकन्यायस्वीकारे दोषमाह—

रवत्प्रतिषेधाच्चैतत्सिध्यति । 'गुरोररवतः' इति वक्ष्यामि ॥ यदि 'अरवतः' इत्युच्यते होतृ+ऋकार 'होतृ३कार' अत्र न प्राप्नोति ॥ 'गुरोररवतो ह्रस्वस्य' इति वक्ष्यामि ॥ स एष सूत्रभेदेन लृकारोपदेशः प्लुत्याद्यर्थः सन् प्रत्याख्यायते, सैषा महतो वंशस्तम्बाल्लट्वानुकृष्यते ।

ए ओङ् ॥ ३ ॥ ऐ औच् ॥ ४ ॥

(सन्ध्यक्षरेषु तपरत्वफलाभावचिन्ताधि०)

इदं विचार्यते-इमानि संध्यक्षराणि तपराणि वोपदिश्येरन् 'एत् ओत् ङ्' 'ऐत् औत्, च्' इति, अतपराणि वा यथान्यासम् इति ॥ कश्चात्र विशेषः ? ॥

॥ संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम् ॥ ४-१

संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं कर्तव्यम् ।

क्लृ३प्त शिख इत्यत्र 'गुरोरनृत' इति निषेधात्प्लुतो न प्राप्नोतीति । प्रयोजन-खण्डयिता 'गुरोररवत' इति न्यासं कृत्वा समाधत्ते 'रवत्प्रतिषेधाच्च' इति । एवं कृते हे होतृ३कार अत्र प्राप्तप्लुतनिषेधं वारयति 'ह्रस्वस्य' इत्यधिक विशेषणदानेन ।

तत्र सिद्धान्ती आह—सैषा महतो वंशस्तम्बादिति । सूत्रभेदादिरूपं महान्तं वंशस्तम्बमादाय (ल्यब्लोपे पञ्चमी) लट्वानामकफलविशेषाकर्षण-तुल्यं लृकारोपदेशस्य प्लुत्याद्यर्थत्वरूपफलखण्डनमित्यर्थः । तथा च अशक्ति-जानुकरणार्थत्वं प्लुत्याद्यर्थत्वं च लृकारोपदेशस्य सिद्धम् ।

"ए ओङ्" "ऐ औच्" ।

अत्र तपरत्वातपरत्वयो र्विचारः—तत्र तपरत्वपक्षे दूषणत्रयमाह—"**सन्ध्यक्षरेषु तपरोपदेशश्चेत् तपरोच्चारणम्**" इति । सन्ध्यक्षर इति ए, ओ, ऐ, औ, इति चतुर्णां पूर्वाचार्यसंज्ञा । तपराः उपदिश्यन्ते अस्मै इति तपरोपदेशः 'बाहुलकात् संप्रदाने घञ्' तेन तपरोपदेशफलमिति तदर्थः पर्यवसन्नः, (तथा च तपरोपदेशफलं चेदस्ति तदा तपरोच्चारणं कर्तव्यम् ।

❀ प्लुत्यादिष्वज्विधिः ❀ ४-२

प्लुत्यादिष्वजाश्रयो विधिर्न सिध्यति। गो३त्रात नौ३त्रात इत्यत्र 'अनचि च' इत्यच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं न प्राप्नोति॥ इह च प्रत्यङ्ङै३तिकायन, उदङ्ङौ३पगव इति 'अचि' इति ङमुडागमो न प्राप्नोति।

❀ प्लुतसंज्ञा च ❀ ४-३

प्लुतसंज्ञा च न सिध्यति॥ ऐ३तिकायन, औ३पगव 'ऊकालोज्ह्रस्वदीर्घप्लुतः' इति प्लुतसंज्ञा न प्राप्नोति॥ सन्तु तर्ह्यतपराणि॥

❀ अतपर एच इग्घ्रस्वादेशे ❀ ४-४

यद्यतपराणि, 'एच इग्घ्रस्वादेशे' इति वक्तव्यम्॥ किं प्रयोजनम्?॥

फलाभावान्न क्रियते इत्यर्थः। द्वितीयं दूषणमाह-"प्लुत्यादिष्वज्विधिः" अयं भावः-तपरत्वपक्षे द्विमात्रिकस्यैव सन्ध्यक्षरस्य तपरसूत्रसहकारेण अच्त्वनियमात् गो३त्रात इत्यादौ त्रिमात्रिकस्याच्त्वाभावात् ततः परस्य यरः द्वित्वादिकं न स्यात्। तथा "प्रत्यङ् ऐ३तिकायन"इत्यादौ ऐकारस्य त्रिमात्रिकत्वेनाच्त्वाभावात् तन्निमित्तको ङमुट् न स्यात्। इदं च दूषणं प्लुतसंज्ञामभ्युपेत्योक्तम्। इदानीं प्लुतसंज्ञैव न भविष्यति-इति तृतीयं दूषणमाह-"**प्लुतसंज्ञा च**" अयं भावः "गोत्रात" इत्यत्र द्विमात्रिकस्य ओकारस्य 'गुरोरनृत' इति प्लुते कर्तव्ये त्रिमात्रिकः उ३कार एव प्लुतः प्राप्नोति, उ३कारस्य त्रिमात्रिकत्वात् अच्त्वाद् ओष्ठस्थानजन्यत्वेन साम्याच्च। त्रिमात्रिकस्य ओकारस्य तु तपरत्वपक्षे अच्त्वमेव नास्ति। 'ऊकालोज्झ्रस्वदीर्घप्लुतः" इत्यनेन च अच एव त्रिमात्रिकस्य प्लुतसंज्ञा विधीयते, न तु अज्भिन्नस्य। ऐ३तिकायन इत्यत्र पूर्वोक्तरीत्या इ३कार एव प्लुतः स्यान्न तु ऐकारः। तपरत्वाभावे दूषणमाह "**अतपर एच इग्घ्रस्वादेशे**" इति तपरत्वाभावपक्षे एकमात्रिकस्य एकारस्य ओकारस्य च अच्त्वसम्भवात् "सुनौ प्रै" इत्यादि नपुंसकप्रातिपदिके-"ह्रस्वो नपुंसक" इत्यनेन जायमानो ह्रस्वः एकमात्रिकः एकार ओकारो वा स्याद् आन्तरतम्यात्। तद्वारणाय "एच इग्घ्रस्वादेशे" इति सूत्रं कर्तव्यम्।

एचो (ङो) ह्रस्वादेशशासनेष्वर्ध एकारोऽर्ध ओकारो वा मा भूदिति॥ ननु च यस्यापि तपराणि, तेनाप्येतद्वक्तव्यम्। इमावैचौ समाहारवर्णौ— मात्रावर्णस्य, मात्रेवर्णोवर्णयो स्तयो र्ह्रस्वादेशशासनेषु कदाचिदवर्णः स्यात, कदाचिदिवर्णोवर्णौ मा कदाचिदवर्णो भूदिति। प्रत्याख्यायत एतत्—'ऐचोश्चोत्तरभूयस्त्वात्' इति। यदि प्रत्याख्यानपक्षः, इदमपि प्रत्याख्यायते—'सिद्धमेङः संस्थानत्वात्' इति। ननु चैङःसंस्थानतरावर्ध एकारोऽर्ध ओकारः। न तौ स्तः। यदि हि तौ स्यातां तावेवायमुपदिशेत्। ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते–सुजाते एश्वसूनृते, अध्वर्यो ओद्रिभिः सुतम्, शुक्रं ते एन्यद्, यजतं ते एन्यत् इति। पारिषदकृतिरेषा तत्रभवताम्। नैव हि लोके नान्यस्मिन्वेदेऽर्ध एकारोऽर्ध ओकारो वास्ति।

न च तपरत्ववादिनापि सुनौ इत्यादौ कण्ठस्थानजन्यत्वसाम्येन अकारो ह्रस्वः प्राप्नोति, ओष्ठस्थानजन्यत्वेन उकारः, तत्र अकारवारणाय "एच् इग्घ्रस्वादेशे" इति नियमः कर्तव्य एव, इति वाच्यम् "ऐचोश्च उत्तरभूयस्त्वात्" ऐकार ओकारे च अर्धमात्रा अवर्णस्य, सार्धमात्रा इवर्णोवर्णयोः इति पक्षाङ्गीकाराद् भूयसा च व्यपदेशो भवति मल्लग्रामादिवत् इति न्यायेन सार्धमात्रात्मकस्य इकारस्य उकारस्यैव वा न्यायेन प्राप्तत्वात्। नन्वेवम् ऐज्विषये समाहितेऽपि एङ् विषये एकारे ओकारे च सार्धमात्रात्मके-कारोकाराभावात् "सुगो" इत्यादि क्लीबशब्दे अकारो ह्रस्वः प्राप्नुयात, तद्वारणाय "एच इक्" इति-आवश्यकम्, इत्याशङ्क्य अतपरवादी सिद्धान्ती समाधत्ते-"इदमपि प्रत्याख्यायते" एङ्विषयकमपि प्रत्याख्यायते इत्यर्थः। "सिद्धमेङः सस्थानात्वादिति" अर्ध एकारः, अर्ध ओकारश्च नास्त्येव तथा च एकारस्य केवलतालव्यत्वेन इकारो भवति। एवम् ओकारस्य केवलौष्ठ्यत्वेन तत्र उकार एव भविष्यति। एकारस्य कण्ठतालुजन्यत्वं ओकारस्य कण्ठोष्ठ-जन्यत्वमिति तु मतान्तरं। तन्मते तु "एच इक्" इति प्रणीतमेव। "पारिषदकृतिरेषा" इति छन्दोगसभ्यविशेषाणां कृतिरित्यर्थः।

※ एकादेशे दीर्घग्रहणम् ※ ४-५

एकादेशे दीर्घग्रहणं कर्तव्यम्-'आद्गुणो दीर्घः' 'वृद्धिरेचि दीर्घः' इति । किं प्रयोजनम्? । आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति खट्वा+इन्द्रः=खट्वेन्द्रः, खट्वा+उदकम्=खट्वोदकम्, खट्वा+ईषा=खट्वेषा, खट्वा+ऊढा=खट्वोढा, खट्वा+एलका=खट्वैलका, खट्वा+ओदनः=खट्वौदनः, खट्वा+ऐतिकायनः=खट्वैतिकायनः, खट्वा+औपगवः=खट्वौपगवः इति । तत्तर्हि दीर्घग्रहणं कर्तव्यम्? । न कर्तव्यम् । उपरिष्टाद्योगविभागः करिष्यते—'अकः सवर्णे' एको भवति । ततो 'दीर्घः' दीर्घश्च स भवति । यः स 'एकः पूर्वपरयोः' इत्येवं निर्दिष्ट इति । इहापि तर्हि प्राप्नोति—पशुम्, विद्धम्, पचन्तीति । नैष दोषः । इह तावत्पशुमिति "अम्येकः" इतीयता सिद्धम् । सोऽयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनं—यथाजातीयकः पूर्वस्तथाजातीयक उभयोर्यथा स्यादिति । विद्धमिति । पूर्व इत्येवानुवर्तते ।

अतपरत्वपक्षे दूषणान्तरमाह "एकादेशे दीर्घग्रहणमिति" "आद्गुणः" "वृद्धिरेचि" इत्यादौ दीर्घग्रहणं कर्तव्यमित्यर्थः । सिद्धान्त्येकदेशी आह "न कर्तव्यमिति" "उपरिष्टात् योगविभागः करिष्यते" इति एकः पूर्वपरयोः इत्यधिकारपठिते "अकः सवर्णे दीर्घः" इति सूत्रे 'दीर्घ' इति योगं विभज्य, पूर्वपरयोः स्थाने तत्तच्छास्त्रेण यो विहितः स दीर्घो (द्विमात्रिको) भवतीत्यर्थः । तेन त्रिमात्रचतुर्मात्राणां व्यावृत्तिः । नन्वेवं पशुं हरिम् इत्यत्र "अमि पूर्वः" इत्यनेन दीर्घपूर्वरूपापत्तिः । तथा विद्धम् इत्यादौ "सम्प्रसारणाच्च" इत्यनेन दीर्घपूर्वरूपापत्तिः । पचन्तीत्यादौ च "अतो गुणे" इत्यनेन दीर्घपररूपापत्तिः-इत्याशङ्क्य खण्डयति । "नैष दोष इति" "प्रथमयोः पूर्वसवर्णः" इति अनेन सिद्धेऽपि वाच्छन्दसीत्यस्याऽत्र अनुवृतये 'अम्येकः' इत्येवं वक्तव्ये पूर्वग्रहणसामर्थ्यात् पूर्वस्य यादृशं रूपं ह्रस्वादिकं तथैव भवतीत्यर्थः, तेन "वातप्रमीम्" "रमाम्" इत्यादौ दीर्घः, पशुं हरिमित्यादौ ह्रस्व इत्यर्थः । तथा सम्प्रसारणाच्च

अथवाचार्यप्रवृत्तिर्ज्ञापयति—'नानेन संप्रसारणस्य दीर्घो भवति' इति यदयम् हलः उत्तरस्य संप्रसारणस्य दीर्घत्वं शास्ति। पचन्तीति। 'अतो गुणे परः' इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यद्रूपग्रहणं करोति तस्यैतत्प्रयोजनम्—यथा जातीयकं परस्य रूपं तथा जातीयकमुभयोर्यथा स्यादिति। इह तर्हि खट्वश्यौं मालश्यं इति दीर्घवचनाद् अकारो न, अनान्तर्यादेकारौकारौ न। तत्र को दोषः?। विगृहीतस्य श्रवणं प्रसज्येत। न ब्रूमो यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति। किं तर्हि?। यत्र क्रियमाणे न दोषस्तत्र कर्तव्यमिति॥ क्व च क्रियमाणे न दोषः?॥ संज्ञाविधौ—वृद्धिरादैच् दीर्घः। अदेङ् गुणो दीर्घः इति॥ तत्तर्हि दीर्घग्रहणं कर्तव्यम्। न कर्तव्यम्॥ कस्मादेवान्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति?। तपरे गुणवृद्धी। ननु च तः

इत्यत्र पूर्वग्रहणानुवृत्त्या पूर्ववद्व्याख्यानेन विद्धमित्यादौ न दीर्घः। अथवा "जीन" इत्यादौ दीर्घार्थमारब्धेन "हल" इति सूत्रेण सामर्थ्यात् 'सम्प्रसारणाच्च' इत्यनेन दीर्घो न भवतीति ज्ञाप्यते। वस्तुतस्तु एवं व्याख्याने 'विश्वौहः" इत्यादौ "वाह ऊठ्" इति विहितस्य दर्घस्य सम्प्रसारणस्य "सम्प्रसारणाच्च" इत्यनेन पूर्वरूपं दीर्घमेव भवति इत्याद्यर्थं व्याख्यानविशेष आश्रयणीयः। तदपेक्षया प्रथमं समाधानमेव श्रेयः। पचन्तीति–'अतो गुणे' इति सूत्रे "एङि पररूपम्" इत्यतः पररूपग्रहणानुवृत्त्या तत्र च 'पर' इत्येतावता सिद्धे "परस्य यादृशं रूपं ह्रस्वं दीर्घं वा तादृशं भवति" इति व्याख्यानात् पचन्तीत्यादौ ह्रस्वः, एधे इत्यादौ दीर्घश्च सिद्धः।

ननु एवमपि खट्वा ऋश्यः, माला ऋश्यः इत्यादौ 'आद्गुण' इत्यनेन जायमानो गुणो न सिद्ध्यति। दीर्घवचनात् अकारो न प्राप्नोति, एकारौकारौ च गुणसंज्ञावपि आन्तरतम्याभावान्न प्राप्नुतः। तथा च विश्लिष्टस्य श्रवणं प्राप्नोति। तस्मात् 'अकः सवर्णे दीर्घ' इत्यत्र योगविभागेन उक्तं समाधानं दुष्टम्। अतः गुणवृद्धिसंज्ञासूत्रे दीर्घग्रहणं कर्तव्यम् इत्याह–"वृद्धिरादैच्" दीर्घ इत्यादि। तदपि खण्डयति न कर्तव्यमिति—तपरकरणादेव त्रिमात्रचतुर्मात्रकाणां गुणवृद्धिसंज्ञा नास्तीत्याह 'तपरे गुणवृद्धी' इति। तपरसूत्रे

परो यस्मात्सोऽयं तपरः ॥ नेत्याह, तादपि परस्तपरः । यदि तादपि परस्तपरः "ऋदोरप्" इतीहैव स्यात्-यवः स्तवः, लवः पव इत्यत्र न स्यात्, नैष तकारः । कस्तर्हि ? । दकारः ॥ किं दकारे प्रयोजनम् ? ॥ अथ किं तकारे ? यद्यसंदेहार्थस्तकारः, दकारोऽपि ॥ अथ मुखसुखार्थ-स्तकारः, दकारोऽपीति ॥

(वर्णैकदेशे वर्णकार्यविचाराधि०)

इदं विचार्यते—य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतय एतेषामवयवग्रहणेन ग्रहणं स्याद्वा न वेति ॥ कुतः पुनरियं विचारणा ? ॥ इह हि समुदाया अप्युपदिश्यन्ते, अवयवा अपि ।

तन्त्रादिना तपरपदं पञ्चमीतत्पुरुष—पञ्चमीबहुव्रीह्युभयार्थ—बोधक-मित्यर्थः । तत्र पञ्चमीतत्पुरुषेण ऐचः तत्कालस्य ग्रहणम् । बहुव्रीहिणा च आकारस्य तत्कालस्य ग्रहणम् । एवं गुणसंज्ञासूत्रेऽपि बोध्यम् । पञ्चमी समासपक्षे 'ऋदोरप्' इत्यादौ अतिव्याप्तिं शङ्कते 'यदीति' तत्र स्वतः सिद्ध दकारमाश्रित्य समाधत्ते 'नैष तकार' इति । स्वतः सिद्धतकारस्य स्थाने जश्त्वेन दकारो न इत्यर्थः । दकारे किं प्रयोजनमिति प्रश्नस्य प्रतिबन्द्या उत्तरमाह-"अथ किं तकारे" इति । केवलबहुव्रीहिवादिनो मते ऋकारस्य अनण्त्वात् भिन्नकालानां ग्रहणाप्रसङ्गात् तपरत्वं निष्प्रयोजनमेव । तथा च तस्य तकारस्य असन्देहार्थत्वे मुखसुखार्थत्वे वा वक्तव्ये दकारस्यापि तद्वक्तुं शक्यम् ।

'इदं विचार्यते' इति वर्णैकदेशाः वर्णान्तरसमानाकृतयो—यथा आकारादिषु अकारादिसदृशाः, ऋकारऌकारयोः रेफलकारसदृशौ, सन्ध्यक्षरेषु अकार-इकार-उकार सदृशाः । तत्र स्वतन्त्रवर्णकार्यम् एषु वर्णैकदेशेषु भवति न वा इति विचार्यते । "समुदाया अप्युपदिश्यन्ते" इति ऋ, ऌ, ए ओ, ऐ, औ इति समुदायोपदेशः । अइउण् इत्यादिः अवयवोपदेशः । तत्र समुदायपरे 'ए ओङ्' इत्यादिनिर्देशेऽविनाभावान्निर्दिष्टा अप्यवयवाः एजादि संज्ञां न लभन्ते । तथाऽवयवप्रधाननिर्देशे समुदायो न संज्ञाभाक् । यथा हयवरेत्यादौ उच्चारणसौकर्याय निर्दिष्टोऽप्यकारो यण् हलिति संज्ञां न प्रतिपद्यते

अभ्यन्तरश्च समुदायेऽवयवः । तद्यथा वृक्षः प्रचलन् सहावयवैः प्रचलति। तत्र समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा ॥ कश्चात्र विशेषः ? ॥

* वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षरविधिप्रतिषेधः *५-१

वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति। स प्रतिषेध्यः। अग्ने इन्द्र, वायो उदकम्, 'अकः सवर्णे दीर्घः' इति दीर्घत्वं प्राप्नोति ॥

तेन दध्यत्रेत्यादौ अकाररहित एव यण् भवति। एवं च अग्ने इन्द्र इत्यादौ अवयवकार्यं—सवर्णदीर्घः, समुदायकार्यम्—अयादेशादिः, इत्युभयं प्राप्नोति तत्र अन्तरङ्गत्व-साक्षाच्चोदितत्व-परत्व-हेतुभिरवयवकार्यसवर्णदीर्घादिप्रसङ्गः। समुदायकार्यमयादेशादिस्तु समुदायावगमस्य अवयवज्ञानपूर्वकत्वाद् अवयवकार्यापेक्षया बहिरङ्गः। तथा च यथा दधीन्द्र इत्यादौ इकारः सवर्णदीर्घत्वं प्राप्नोति, तथा अग्ने इन्द्र इत्यत्राग्निशब्दैकारैकदेशभूत इकारोऽपि सवर्णदीर्घं प्राप्नुयात्। तथा च 'ए ओङ्' इत्यादौ अवयवानां प्राधान्येन निर्देशाभावादेजादिसंज्ञाभावेऽपि स्वतन्त्रावयवकार्यं न्यायतः प्राप्नोतीति ग्रहणपक्षाशङ्काबीजम्। अग्रहणपक्षाशङ्काबीजमाह—'अभ्यन्तरश्च' इति । समुदायोपदेशे अवयवानां तिरोहितत्वात् समुदायपरतन्त्रतया स्वकार्याप्रयोजकत्वमिति। अयं भावः-यथा नरसिंहावयवे नरत्वसिंहत्वाद्यभावः, तथा एकाराद्यवयवेकारादौ वर्णान्तरसारूप्यमात्रं वर्तते, न तु साक्षादित्वादिजात्यवच्छिन्नत्वमस्ति। तथा च न तत्तत्कार्यप्रयोजकत्वमिति।

वर्णैकदेशाः वर्णग्रहणेन (गृह्यन्ते) चेत् "सन्ध्यक्षरे समानाक्षरविधिः प्रतिषेध." सन्ध्यक्षर इति ए, ओ, ऐ, औ, एषां संज्ञा, समानाक्षर इति अकां संज्ञा, "दश समाना" इति पूर्वाचार्यसूत्रात्—अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, इति दश समानाक्षराणि इत्यर्थः। तेषां विधिः 'अकः सवर्णे दीर्घ' इत्यादिः। स प्राप्नोति, तस्य प्रतिषेधः कर्तव्यः, यथा—अग्ने-

* दीर्घे ह्रस्वविधिप्रतिषेधः * ५-२

दीर्घे ह्रस्वाश्रयो विधिःप्राप्नोति, स प्रतिषेध्यः आलूय, प्रलूय 'ह्रस्वस्य पिति कृति तुग्' इति तुक् प्राप्नोति । नैष दोषः-आचार्यप्रवृत्तिर्ज्ञापयति न दीर्घे ह्रस्वाश्रयो विधि भवति-इति । यदयं दीर्घाच्छे तुकं शास्ति ॥ नैतदस्ति ज्ञापकम्, अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् किम् ? । पदान्ताद्वा' इति विभाषां वक्ष्यामीति । यत्तर्हि योगविभागं करोति । इतरथा हि ' दीर्घात्पदान्ताद्वा ' इत्येव ब्रूयात् । इह तर्हि--खट्वाभिः' 'अतो भिस ऐस्' इत्यैस्भावः प्राप्नोति । तपरकरणसामर्थ्यान्न भविष्यति। इह तर्हि याता वाता " अतो लोप, आर्धधातुके " इत्यकारलोपः प्राप्नोति । ननु चात्रापि तपरकरणसामर्थ्यादेव न भविष्यति । अस्ति ह्यन्यत्तपरकरणे प्रयोजनम् । किम् ? ।

सर्वस्य लोपो माभूदिति । अथ क्रियमाणेऽपि तपरे परस्य लोपे कृते

इन्द्र. वायो-उदकम् इत्यादौ एकार-ओकारघटकाभ्यां इकारोकाराभ्यां इन्द्रोदक-शब्दसम्बन्धिनि इकारे उकारे च परे सवर्णदीर्घः प्राप्नोति स प्रतिषेध्यः ।

"दीर्घे ह्रस्वविधिप्रतिषेधः" इति-आलूय प्रलूय इत्यादौ वर्णैकदेशं ह्रस्वोकारमादाय "ह्रस्वस्य पिति कृति तुक" इति तुक् प्राप्नोति । न च "छे च" इत्यनेन सिद्धे "दीर्घात्" इत्यनेन दीर्घस्य तुग्विधानसामर्थ्यात् दीर्घे ह्रस्वाश्रयो विधिर्न भवति इति ज्ञाप्यते इति वाच्यम् । "पदान्ताद्वा" इत्यत्र अनुवृत्यर्थं "दीर्घात्" इत्यस्यावश्यकत्वात् । नन्वेवमपि "दीर्घात् पदान्ताद्वा" इत्येकयोगे कर्तव्ये 'दीर्घात्' इति योगविभागसामर्थ्याद् उक्तज्ञापक-सम्भवः । तथा च आलूय इत्यादौ न दोषः इत्याशयेनाह—**इह तर्हि खट्वाभिरित्यादौ ऐस् प्राप्नोति** इति । "अतो भिस ऐस्" इत्यत्र अत इति तपरकरणाद् दोषवारणे तु याता वातेत्यत्र अतो लोपापत्तिः । "अतोलोप" इत्यत्र तपरकरणस्य फलमाह–'**सर्वस्य लोपो माभूदिति**' अयं भावः--याता इत्यादौ तृच्प्रत्ययनिमित्तके ह्रस्वाकारमात्रस्य तपरकरणाल्लोपे कृते य तृ इति स्थिते पुनः अवशिष्टस्य अकारस्यापि प्राप्तो लोपः पूर्वलोपस्य स्थानि-

पूर्वस्य कस्मान्न भवति ? । परलोपस्य स्थानिवद्भावादसिद्धत्वाच्च । एवं तर्ह्याचार्यप्रवृत्ति र्ज्ञापयति—' नाऽऽकारस्थस्याऽकारस्य लोपो भवती ' ति । यदयम् ' आतोऽनुपसर्गे कः ' इति ककारमनुबन्धं करोति । कथं कृत्वा ज्ञापकम् ? । कित्करणे एतत्प्रयोजनम्—'किती' त्याकारलोपो यथा स्यादिति । यद्याकारस्थस्याकारस्य लोपः स्यात्, कित्करणमनर्थकं स्यात् । परस्याकारस्य लोपे कृते द्वयोरकारयोः पररूपे हि सिद्धं रूपं स्याद्–गोदः कम्बलद इति । पश्यति त्वाचार्यो–नाऽऽकारस्थस्याऽकारस्य लोपः स्यादिति, अतः ककारमनुबन्धं करोति । नैतदस्ति ज्ञापकम् । उत्तरार्थमेतत्स्यात् ' तुन्दशोकयोः परिमृजापनुदोः ' इति । यत्तर्हि ' गापोष्टक् ' इत्यनन्यार्थं ककारमनुबन्धं करोति ।

* एकवर्णवच्च * ५-३

एकवर्णवच्च दीर्घो भवतीति वक्तव्यम् । किं प्रयोजनम् ? । वाचा तरतीति द्व्यज्लक्षणः ठन्माभूदिति । इह च वाचो निमित्तम्, 'तस्य निमित्तं संयोगोत्पातौ' इत्यनुवर्तमाने 'गोद्व्यचः' इति द्व्यज्लक्षणो यन्मा भूदिति । अत्रापि गोनौग्रहणं ज्ञापकम्–'दीर्घाद् द्व्यज्लक्षणो विधि र्न भवति'– इति । अयं तु सर्वेषामेव परिहारः—

वद्भावाद् वार्यते' तपरकरणाभावे तु प्रथमप्रवृत्त्यैव आ इति संपूर्णस्य लोपे अनिष्टापत्तिः, इति । "आतोऽनुपसर्गे क" इति—ज्ञापकमिति—अयं भावः–गो-शब्दोपपदकाद् दा–धातोः कप्रत्यये "आतो लोप इटि च" इत्यनेन आलोपे गोदः" इति सिद्ध्यति । अत्र च कित्वाभावेऽपि प्रत्ययस्य आर्धधातुकत्वाद् अवयवाकारस्य लोपे गो द् अ इति स्थिते अतो गुणे इति पररूपे इष्टसिद्धिः, तथा च कित्करणं व्यर्थं सत् उक्तार्थे ज्ञापकमिति । खण्डयति "नैतदस्ति ज्ञापकमिति"। ज्ञापकान्तरम्–"गापोष्टक्" इति-अत्रापि पूर्वरीत्या ककारानुबन्धकरणं व्यर्थं सत् ज्ञापकमित्यर्थः । "एकवर्णवच्चेति" वागादि शब्दे आकारघटकं ह्रस्वाकारद्वयमादाय "नोद्व्यचः ठन्" इति ठन् प्राप्तः । "गोद्व्यचः" इत्यत्र तुल्यन्यायाद् गोशब्दस्यापि द्व्यच्कत्वेन यति सिद्धे पुनर्गोग्रहण-सामर्थ्याद् दीर्घे द्व्यज्लक्षणकार्यं न भवतीति ज्ञाप्यते ।

* नाव्यपवृक्तस्यावयवे तद्विधिर्यथा द्रव्येषु * १-४

नाव्यपवृक्तस्यावयवस्यावयवाश्रयो विधि र्भवति यथा द्रव्येषु। तद्यथा द्रव्येषु 'सप्तदश सामिधेन्यो भवन्ति' इति न सप्तदशारत्निमात्रं काष्ठमग्नावभ्याधीयते ॥ विषम उपन्यासः । प्रत्यृचं चैव हि तत्कर्म चोद्यते। असंभवश्चाग्नौ वेद्यां च। यथा तर्हि 'सप्तदश प्रादेशमात्रीराश्वत्थीः समिधो अभ्यादधीत' इति न सप्तदशप्रादेशमात्रं काष्ठमग्नावभ्याधीयते। अत्रापि प्रतिप्रणवं चैतत्कर्म चोद्यते । तुल्यश्चासंभवोऽग्नौ वेद्यां च। यथा तर्हि 'तैलं न विक्रेतव्यम्' 'मांसं न विक्रेतव्यम्' इति व्यपवृक्तं च न विक्रीयते, अव्यपवृक्तं–गावः सर्षपाश्च विक्रीयन्ते । तथा 'लोमनखं स्पृष्ट्वा शौचं कर्तव्यम्' इति व्यपवृक्तं स्पृष्ट्वा नियोगतः कर्तव्यम् । अव्यपवृक्ते कामचारः।। यत्र तर्हि व्यपवर्गोऽस्ति ?॥ क्व च व्यपवर्गोऽस्ति ?॥ संध्यक्षरेषु।

* सध्यक्षरेषु विवृतत्वात् * १-५

"नाव्यपवृक्तस्यावयवे इति" व्यपवृक्तो–भिन्नः, अव्यवपृक्तः–अभिन्नत्वेन भासमानः पदार्थः,तस्य अवयवे-एकदेशे, तद्विधिः वस्तुतो भिन्नावयवप्रयुक्तो विधिः न भवति। उदाहरणम्—"सप्तदशारत्निपरिमितं काष्ठम्" (हस्तो मुष्ट्या तु बद्धया, स रत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना। इति अमरः) प्रत्यृचमिति । अग्नौ आहितद्रव्यस्य पुनर्ग्रहणनिषेधात् एकस्याहितकाष्ठस्य प्रत्यृचं पुनराधानासम्भवः। "सप्तदशप्रादेश मात्रीरिति" अल्पप्रमाणत्वात् काष्ठस्य अग्नौ आधानसंभवः, इति पूर्वोदाहरणाद् विशेषः। उत्तरं पूर्ववदेव "तैलं न विक्रेतव्यमिति" स्पष्टम्—एवमेव शरीरस्थमलानां व्यानेनोपष्टम्भे तत्स्पर्शप्रयुक्तो दोषो नास्ति अव्यपवृक्तत्वात् । यदा तु स एव मलः प्राणापानगत्या व्यपवृक्तो भवति तदा तु शौचं कर्तव्यमेव । अत एव सर्वकर्मारम्भेऽङ्गतया आचमनविधानं संगच्छते । एवमपि सन्ध्यक्षरेषु एकदेशानां व्यपवृक्तत्वमास्ति तत्र च तत्तदवयवकार्यप्राप्तिः—इत्याशङ्क्य समाधत्ते—"सन्धक्षरेषु विवृतत्वादिति" तथा च विवृतत्व—विवृततरत्व–धर्मभेदेन

यदत्रावर्णम्, विवृततरं तदन्यस्मादवर्णाद् । ये अपीवर्णोवर्णो, विवृत्ततरे ते अन्याभ्यामिवर्णोवर्णाभ्याम् । अथवा पुन र्न गृह्यन्ते ।

* अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणम् * ४–६

अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणं कर्तव्यम् । 'तस्मान्नुड् द्विहलः' ऋकारे चेति वक्तव्यम् । इहापि यथा स्यात्-आनृधतुः, आनृधुरिति । यस्य पुनर्गृह्यन्ते 'द्विहल' इत्येव तस्य सिद्धम् । यस्यापि न गृह्यन्ते, तस्याप्येष न दोषः । द्विहल्ग्रहणं न करिष्यते तस्मान्नुड् भवतीत्येव । यदि न क्रियते, आटतुः, आटुरित्यत्रापि प्राप्नोति । अश्नोतिग्रहणं नियमार्थं भविष्यति-अश्नोतेरेवावर्णोपधस्य, नान्यस्यावर्णोपधस्येति (नुड्विधिः)

लादेशे च ऋकारग्रहणं कर्तव्यम् । 'कृपो रो लः' ऋकारस्य चेति वक्तव्यम् । इहापि यथा स्यात्–क्लृप्तः क्लृप्तवानिति । यस्य पुन गृह्यन्ते र इत्येव तस्य सिद्धम् । यस्यापि न गृह्यन्ते तस्याप्येष न दोषः, ऋका-

---

सावर्ण्याभावाद् अकारादिना सन्ध्यक्षरावयवस्य अकारादे र्ग्रहणं नास्ति ।

इदानीम् अग्रहणपक्षे दूषणत्रयमाह—'अग्रहणं चेत्' इति आनृधतुरित्यादौ द्विहल्त्वाभावात् 'तस्मान्नुड् द्विहलः' इत्यस्याप्राप्तिरित्यर्थः । ग्रहणपक्षमादाय तु 'नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते' इति कौमुद्यादावुक्तम् उक्तं फलं खण्डयति-'नैष दोषः, द्विहल्ग्रहणं न करिष्यते' इति । अयं भावः- 'तस्मान्नुट्' इत्यत्र तस्मात्पदेन 'अतः आदेः' इत्यनेन कृतदीर्घोऽभ्यासाकारः परामृश्यते । स च लिटि त्रिविधेषु धातुषु सम्भवति, अर्च, अर्ह, अर्द, अङ्क, अञ्च, अभ्र इत्यादिषु अकारादिषु द्विहल्षु, अट, अश्, अल्, अम् इत्यादिषु अकारादिषु एकहल्षु, ऋध, ऋज्, ऋच्छ इत्यादिषु ऋकारादिषु एकद्विहल्षु (उरत्) इत्यत्वे कृते चेति । तत्र प्रथमतृतीयानां नुडिष्टः । मध्यमानाम् अट्, अम् इत्याद्यकारोपधानां तु 'तस्मान्नुट्' इत्यनेन सिद्धे नुटि पुनः 'अश्नोतेश्च' इत्यारम्भसामर्थ्याद् अकारोपधस्य चेदश्नोतेरेवेति नियमान्न भवतीति ।

रोऽप्यत्र निर्दिश्यते। कथम्?। अविभक्तिको निर्देशः, कृप उः रः लः= 'कृपो रो ल' इति। अथवा उभयतः स्फोटमात्रं निर्दिश्यते रश्रुतेर्लश्रुतिर्भवतीति। लादेशः)

विनामे ऋकारग्रहणं कर्तव्यम्। 'रषाभ्यां नो णः समानपदे' ऋकाराच्चेति वक्तव्यम्। इहापि यथा स्यात्—मातृणां पितृणामिति। यस्य पुनर्गृह्यन्ते रषाभ्यामित्येव तस्य सिद्धम्। न सिध्यति। यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोति। मा भूदेवम्। अड्व्यवाये इत्येव सिद्धम्। न सिध्यति। वर्णैकदेशाः के वर्णग्रहणे गृह्यन्ते, ये व्यपवृक्ता अपि वर्णा भवन्ति, यच्चापि रेफात्परं भक्तेः, न तत्क्वचिदपि व्यपवृक्तं दृश्यते। एवं

लादेशे दूषणमाह 'कृपो रो ल' इति। खण्डयति—'अविभक्तिको-निर्देशः—कृप उः रः ल' इति तत्र ऋकारनिर्देशसामर्थ्यात् अग्रहणपक्षेऽपि विभागं प्रकल्प्य ऋकारैकदेशरेफस्यादेशो विधीयते। 'अथवा स्फोटमात्र' मिति। उभयतः—स्थान्यादेशयोः र-ल-जातिस्फोटो निर्दिश्यते, तेन समुदायान्त-भूतानन्तर्भूत-रेफलकार-व्यङ्ग्यं स्फोटसामान्यं स्थान्यादेशभावेनाश्रीयते। विनामो—णत्वम्। अग्रहणपक्षे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति वक्तव्यमित्यर्थः ग्रहणपक्षेऽपि दूषणमाह—'न सिध्यति' यत्तद्रेफात्परं भक्तेः' इति। यत्तदिति समुदायो यच्छब्दार्थे। रेफाद्भक्तेः-रेफरूपभागात् (समानाधिकरणे पञ्चम्यौ) परं यत् अच्सदृशं तेन व्यवधानात् 'रषाभ्यां नो णः' इत्यत्र 'तस्मादित्युत्तरस्य' इत्यनेन अव्यवहितस्य कार्यबोधनान्न सिध्यतीत्यर्थः। ग्रहणवादी-अन्यथेष्टं साधयति 'अड्व्यवाय इत्येव सिद्धम्' इति। खण्डयति 'न सिध्यतीति—ये व्यपवृक्ता इति। अयं भावः—इकारोकारादिसदृशाः वर्णैकदेशा वर्णग्रहणेन ग्रहीतुं शक्यन्ते, तेषां स्वातन्त्र्येण श्रूयमाणत्वाद् उपदिष्टत्वाच्च। यथा हे अग्निभूते अग्निभूता३इ, हे पटो पटा३उ इत्यादौ यौ इकारोकारौ तयोः स्वतन्त्रेकारोकारवत्स्फोटव्यञ्जकत्वसंभवात्। मातृणामित्यादौ ऋकारे घटकरेफो वा। रेफोत्तरोऽज्भागस्तु न व्यपवृक्तः क्वचिदपि श्रूयते, तथा च तस्य स्फुटप्रतिभासाभावेन जातिस्फोटाभिव्यक्तिहेतुत्वासंभवान्न ग्रहणम्।

तर्हि योगविभागः करिष्यते, 'रषाभ्यां नो णः समानपदे' ततः-'व्यवाये' व्यवाये च रषाभ्यां नो णो भवतीति। ततः 'अट्कुप्वाङ्नुम्भिः' इति। इदमिदानीं किमर्थम्?। नियमार्थम्—'एतैरेवाक्षरसमाम्नायिकैर्व्यवाये,

---

ग्रहणवादी योगविभागेन समाधत्ते–एवं तर्हीति। एतैरेवाक्षरसमाम्नायिकैरिति। अयं भावः-सर्वत्र नियमविधौ विधिमुखेन प्रवृत्तिकल्पे नियामकशास्त्रीयोद्देश्यतावच्छेदकव्यापकं नियम्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यं च यद्रूपं, तद्रूपावच्छिन्नातिरिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने संकोचः। यथा–प्रातिपदिकसंज्ञायां नियामकशास्त्रं समासग्रहणं, नियम्यशास्त्रम् अर्थवत्सूत्रं, तयोः क्रमेणोद्देश्यतावच्छेदकस्य व्यापकं व्याप्यं च रूपं पदसंज्ञकपूर्वभागकसमुदायत्वं (प्रकृतिप्रत्ययभावानापन्नसमुदायत्वं वा) तदवच्छिन्नातिरिक्तत्वेन नियम्यशास्त्रीयार्थवत्त्वरूपोद्देश्यतावच्छेदकावच्छिन्नेऽर्थवति संकोचः। तथा च पदसंज्ञकपूर्वभागकसमुदायातिरिक्तस्यार्थवतः प्रातिपदिकसंज्ञाविधानात् समासस्य वाक्यस्य च अर्थवत्सूत्रेण संज्ञा न प्राप्नोति, समासग्रहणेन च समासमात्रस्य संज्ञा विहिता, तेन वाक्यस्य प्रातिपदिकसंज्ञा न प्राप्ता नापि निषिद्धा। प्राप्तिपूर्वकनिषेधाङ्गीकारे तु शास्त्रस्या (अननुष्ठापकत्वलक्षणा) प्रामाण्यापत्तिः। तथा प्रकृते नियम्यशास्त्रं 'व्यवाये' इति, नियामकशास्त्रं 'अट्कुप्वाङ्' इति, तयोः क्रमेणोद्देश्यतावच्छेदके आक्षरसमाम्नायिकाऽनाक्षरसमाम्नायिक—वर्णकर्तृकव्यवायशालिरेफोत्तर न–त्वम्, अडादिमात्रकर्तृकव्यवायशालि–रेफोत्तरन–त्वं च तयोः क्रमेण व्याप्यं व्यापकं च रूपम्-आक्षरसमाम्नायिकवर्णकर्तृकव्यवधानशालिरेफोत्तरन–त्वं, तदवच्छिन्नातिरिक्तत्वेन 'व्यवाये' इत्यत्र संकोचे 'व्यवाये' इत्यनेन केवल मनाक्षरसमाम्नायिकवर्णव्यवधाने णत्वं विधीयते। तेन मातॄणां पितॄणामित्यादौ अनाक्षरसमाम्नायिकेन रेफोत्तराजूभागेन व्यवधानेऽनेन सिद्धम्। आक्षरसमाम्नायिकानां चु टु तु ल शराम्, अट्कुप्वाङ्नुमां वा व्यवधाने अनेन णत्वं न प्राप्नोति, ततो 'अट्कुप्वाङ्' इत्यनेन केवलमाक्षरसमाम्नायिकानामट्क-पवर्गादीनां व्यवाये णत्वमुक्तम्। आकारादयोऽपि ग्राहकशास्त्रबलादाक्षर समाम्नायिका एव। अजूभक्तिस्तु न सवर्णा नाप्युपदिष्टेति विशेषः। चुटतु

नान्यैः, इति। यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति–भवति ऋकारान्नो णत्वम् इति, यदयं क्षुभ्नादिषु नृनमनशब्दं पठति। नैतदस्ति ज्ञापकम्। वृद्ध्यर्थमेतत्स्यात् नार्नमनिः। यत्तर्हि तृप्नोति शब्दं पठति। यच्चापि नृनमनशब्दं पठति। ननु चोक्तम्—वृद्ध्यर्थमेतत् स्यात्। बहिरङ्गा वृद्धिरन्तरङ्गं णत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे। अथवा उपरिष्टाद्योगविभागः करिष्यते 'ऋतः' नो णो भवति। ततः— 'छन्दस्यवग्रहात्' ऋत इत्येव।

* लुप्तावैच इदुतौ ५—६ *

लशरां व्यवाये तु णत्वं न प्राप्तं नापि निषिद्धम्। तेन कृत्स्नं कात्स्न्र्यमित्यादौ न प्राप्तिनिषेधौ। न चैवमपि आदर्शेनेत्यादौ अड्रूपैकारेण व्यवायसत्वात् णत्वं स्यादेव, नियमफलं तु आर्ध्नोत् कात्स्न्र्यमित्यादि संभवतीति वाच्यम्, आर्ध्नोत्, कात्स्न्र्यम्, इत्यादेरेव व्यावर्त्यत्वे 'तु–शर्व्यवाये न' इति निषेधेन सिद्धौ 'अट्कुप्वाङ्नुभिः' इति गुरुतरन्यासकरणसामार्थ्यात् अडादिभिरेव व्यवाये इत्यवधारणलाभेन आदर्शेनेत्यादौ अडाद्यतिरिक्तशकारव्यवधानसत्वेन णत्वप्राप्त्यभावात्।

अग्रहणवादी—स्वमते णत्वं साधयति 'आचार्यप्रवृत्तिर्ज्ञापयती'ति। 'नार्नमनि'रिति नृनमनशब्दात्संज्ञाभूतात् 'अत इञि' आदिवृद्धिः। **'बाहिरङ्गा वृद्धि'**रिति–बहिर्भूततद्धितप्रत्ययनिमित्तकत्वेन वृद्धेर्बहिरङ्गत्वम्। **'योगविभाग'** इति 'च्छन्दस्यृदवग्रहात्' इति सूत्रे 'ऋत्' इति योगो विभज्यते, तच्च लुप्तपञ्चमीकं तदाह—ऋत इति, ऋवर्णान्तस्य णत्वमित्यर्थः। न च ऋदिति तपरकरणात् तिसृणां नृणामित्यादौ णत्वे सिद्धेऽपि मातॄणामित्यादौ दीर्घाद् ॠकाराण्णत्वं न स्यादिति वाच्यम्। दीर्घस्य बहिरङ्गासिद्धत्वात्। 'प्रशास्तॄणा'मिति निर्देशेन 'ऋत्' इति तपरकरणस्य मुखसुखार्थत्वेनातत्कालव्यावर्तकत्वाभावाच्च।

ग्रहणवादी—दोषान्तरमाह 'प्लुतावैच इदुतौ' ऐतिकायन, औपगव इत्यादौ ऐकारौकारघटकयोरिकारोकारयोः प्लुतोऽनेन विधीयते, तेन चतुर्मात्रो

एतच्च वक्तव्यम् । यस्य पुनर्गृह्यन्ते गुरोष्टेरित्येव प्लुत्या तस्य सिद्धम् । यस्यापि न गृह्यन्ते तस्याप्येष न दोषः । क्रियते एतन्न्यासे एव ।

*** तुल्यरूपे संयोगे द्विव्यञ्जनविधिः ५-७ ***

तुल्यरूपे संयोगे द्विव्यञ्जनाश्रयो विधिर्न सिध्यति–कु३क्कुटः, पि३-प्पली, पि३त्तमिति । यस्य पुनर्गृह्यन्ते तस्य द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ । यस्यापि न गृह्यन्ते, तस्यापि द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ। कथम् ? । मात्राकालोऽत्र गम्यते । न च मात्रिकं व्यञ्जनमस्ति। अनुपदिष्टं सत्कथं शक्यं विज्ञातुम् । असच्च कथं शक्यं प्रतिपत्तुम् । यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रैतन्नास्ति 'अण् सवर्णान् गृह्णाती'ति । इह तु कथम्—सय्ँयन्ता, सव्ँवत्सरः । यल्ँलोकम्, तल्ँलोकमिति ।

ऐचौ संपद्येते ऐ४तिकायन, औ४पगव इति । अग्रहणवादी–अत्र व्यपवृक्तत्वेऽपि भागयो विवृततरत्वात् प्रयत्नभेदादिकारोकाराभ्यामग्रहणादच्त्वाभावादस्य वचनस्यावश्यकर्तव्यतां दर्शयति—'क्रियते एतन्न्यासे एव' सूत्रपाठे क्रियते एवेत्यन्वयः ।

अग्रहणवादी दूषणान्तरमाह 'तुल्यरूपे संयोगे द्विव्यञ्जनविधिः' इति । तुल्यरूपावयवके संयोगे-संयोगसंज्ञार्हे वर्णे द्विव्यञ्जनविधिः–हल्द्वयाश्रयो विधिः संयोगसंज्ञारूपो वक्तव्य इत्यर्थः । अत्र पूर्वपक्षी भ्रान्त्या कक्कारद्वयस्यै-कवर्णत्वं मन्यते । सिद्धान्ते तु सन्ध्यक्षरवत्समुदायोपदेशाभावात्, स्वातन्त्र्येणो-पदेशाच्च वर्णद्वयमेवेति समाधते—'यस्यापि न गृह्यन्ते' इति । पूर्वपक्षी प्रकारान्तरेण दोषमाह—'यद्यपि' इति—यद्यपि 'यत्र' येषु अणभिन्नवर्णेषु क्क, प्प, त्त, इत्यादिषु 'अण्सवर्णान् गृह्णाति' इति ग्रहणकशास्त्रं नास्ति तत्र 'एतत्' अनुपदिष्टत्वासत्त्वादिकं वक्तुं शक्यते, तथापि 'यत्र' येषु अण्वर्णेषु 'अण्सवर्णान् गृह्णाति, इति ग्राहकशास्त्रं प्रवर्तते तत्र दीर्घाकारादि-वत्साक्षादुपदेशाभावेऽपि ग्राहकशास्त्रबलात्सत्वमुपदिष्टत्वं च स्यादित्यर्थः । तथा च संय्यन्तेत्यादौ 'हलोऽनन्तराः संयोग' इति संयोगसंज्ञायां कर्तव्यायां, हलन्तर्गतेषु अण्सु ग्राहकशास्त्रोपस्थित्या यकारादिभिः यकारद्वयादेरेकवर्णत्वेन

यत्रैतदस्त्यण् सवर्णान् गृह्णातीति। अत्रापि मात्राकालो गृह्यते। न च मात्रिकं व्यञ्जनमस्ति। अनुपदिष्टं सत्कथं शक्यं विज्ञातुम्। असच्च कथं शक्यं प्रतिपत्तुम् ॥४॥

(हकारस्य द्विरुपदेशफलाधि०)

हयवरट् ॥ ५ ॥

सर्वे वर्णाः सकृदुपदिष्टाः, अयं हकारो द्विरुपादिश्यते-पूर्वश्चैव परश्च। यदि पुनः पूर्व एवोपदिश्येत, पर एव वा। कश्चात्र विशेषः ? ॥

*** हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणम् ६-१ ***

हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणं कर्तव्यम् 'आतोऽटि नित्यम्' 'शश्छोऽटि' 'दीर्घादटि समानपादे' हकारे चेति वक्तव्यम्। इहापि यथा स्यात्। महाँ हि सः ॥

उत्वे च ६-२

उत्वे च हकारग्रहणं कर्तव्यम् 'अतो रोरप्लुतादप्लुते' 'हशि च' हकारे चेति वक्तव्यम्। इहापि यथा स्यात्-पुरुषो हसति, ब्राह्मणो हसतीति। अस्तु तर्हि पूर्वोपदेशः।

ग्रहणे हल्द्वयाभावात् संयोगसंज्ञाऽप्राप्तिः। अत्रापि अनुपदिष्टत्वादसत्वाच्च दोषं परिहरति सिद्धान्ती-'अत्रापि' इति। ग्राहकशास्त्रेण हि विद्यमानानामेव भिन्नकालानां सवर्णानां ग्रहणं बोध्यते न तु अविद्यमानानां, व्यञ्जनस्य सर्वत्र अर्धमात्रिकत्वेन मात्रिकव्यञ्जनस्याविद्यमानत्वेन यकारादेः अण्त्वेऽपि न द्वियकारादिग्राहकतेति न क—पाद्यपेक्षया वैलक्षण्यमिति भावः।

सर्वेषां वर्णानां साधुत्वार्थमिष्टस्वरूपज्ञानार्थं च यद्युपदेशः, तर्हि हकारस्यैकत्रोपदेशेनैव साधुत्वादौ सिद्धे द्विरुपदेशः किमर्थं इति पूर्वपक्ष्याशयः। सिद्धान्ती तु 'वृत्तिसमवायार्थो वर्णानामुपदेशः'. न केवल 'मिष्टबुद्ध्यर्थः' इत्यभिप्रयन् अन्यतरोपदेशाभावे पृथक् २ दूषणमाह 'हकारस्य परोपदेश' इत्यादि। महाँ हि स इति 'दीर्घादटि समानपदे' इति नस्य रुत्वे 'आतोऽटि नित्यम्' इति पूर्वस्यानुनासिकत्वे 'भोभगो' इति यत्वे 'हलि सर्वेषा'मिति

*** पूर्वोपदेशे कित्त्वक्सेड्विधयो झल्ग्रहणानि च ६-३***

यदि पूर्वोपदेशः कित्त्वं विधेयम्–स्निहित्वा स्नेहित्वा सिस्निहिषति। सिस्नेहिषति 'रलो व्युपधाद्धलादेः' इति कित्त्वं न प्राप्नोति । क्सविधिः–क्सश्च विधेयः-अधुक्षत् अलिक्षत् 'शल इगुपधादनिटः क्सः' इति क्सो न प्राप्नोति। इड् विधिः–इट् च विधेयः–रुदिहि वलादिलक्षण इण् न प्राप्नोति । झल् ग्रहणानि च । किम् ? । अहकाराणि स्युः । तत्र को दोषः ? 'झलो झलि' इतीह न स्यात्–अदाग्धाम् अदाग्धम् । तस्मात्पूर्वश्चैवोपदेष्टव्यः परश्च । यदि च किंचिदन्यत्राप्युपदेशे प्रयोजनमस्ति तत्राप्युपदेशः कर्तव्यः ।

(रेफोपदेशस्थानपरीक्षाधि०)

इदं विचार्यते-अयं रेफो यकारवकाराभ्यां पूर्व एवोपदिश्येत–हरयवट्' इति, पर एव वा यथान्यासम् इति । कश्चात्र विशेषः ? ।

रेफस्य परोपदेशेऽननुनासिकद्विर्वचनपरसवर्णप्रतिषेधः ७-१

रेफस्य परोपदेशेऽननुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः ।

यलोपः । 'यदि च किंचिदन्यत्राप्युपदेशे प्रयोजनमस्ति' इति । अनेन कार्यार्थं वर्णानामुपदेशो न केवलं साधुस्वरूपज्ञानार्थ इति फलितम् । तथा च हकारस्य पूर्वोपदेशो अट्-अश्-हश्-इण्-ग्रहणेषु विधिषु हकारग्रहणार्थः . अटि-महाँ हि सः 'दीर्घादटी'ति रुः । अर्हेण अट्कुप्विति णत्वम् । अशि–देवा हसन्ति 'भोभगो' इति रोर्यत्वम् । हशि–देवो हसति, हशि चेत्युत्वम् । इणि लिलिहिढ्वे लिलिहिध्वे 'विभाषेटः' इति वा ढः । परोपदेशः वल्-रल्-झल्-शल्षु हकारग्रहणार्थः–रुदिहि, स्वपिहि, 'रुदादिभ्यः सार्वधातुके' इति वलादि लक्षण इट् । स्निहित्वा, स्नेहित्वा 'रलो व्युपधात्' इति वा कित्वम् । अदाग्धाम्, 'झलो झलि' इति सलोपः । अलिक्षत् अधुक्षत् 'शल इगुपधाद' इति क्सः । इति चतुर्षु चतुर्षु प्रत्याहारेषु हकारग्रहणं पूर्व-परोपदेशफलमिति भावः ।

हयवरट् सूत्रे रेफो यकारवकाराभ्यां पूर्वं परं वोपदेष्टव्य इति विचारे द्वितीयकल्पे दूषणमाह 'रेफस्य परोपदेशे' इत्यादि । आद्यकल्पे दूषणमाह–

अनुनासिकस्य—स्वर्नयति प्रातर्नयति । 'यरोऽनुनासिकेऽनुनासिको वा' इत्यनुनासिकः प्राप्नोति। द्विर्वचनस्य—मद्रह्रदः भद्रह्रदः 'यरः' इति द्विर्वचनं प्राप्नोति। परसवर्णस्य–कुण्डं रथेन। वनं रथेन 'अनुस्वारस्य ययि' इति परसवर्णः प्राप्नोति॥ अस्तु तर्हि पूर्वोपदेशः।

* पूर्वोपदेशे कित्त्वप्रतिषेधो व्यलोपवचनं च ७-२ *

यदि पूर्वोपदेशः कित्त्वं प्रतिषेध्यम्। देवित्वा दिदेविषति 'रलो व्युपधा' दिति कित्त्वं प्राप्नोति। नैष दोषः, नैवं विज्ञायते–रलः व्युपधाद्' इति। किं तर्हि ?। "रलः अव् व्युपधाद्" इति। किमिदम् अव् व्युपधाद् इति अवकारान्ताद् व्युपधाद्–अव्व्युपधादिति। व्यलोपवचनं च–व्योश्च लोपो वक्तव्यः। गौधेरः, पचेरन् यजेरन्, 'जीवे रदानुः–जीरदानुः। वलीति लोपो न प्राप्नोति। नैष दोषः, रेफोऽप्यत्र निर्दिश्यते–लोपो व्योर्वलि' इति, रेफे च वलि चेति।

अथवा पुनरस्तु परोपदेशः। ननु चोक्तम् 'रेफस्य परोपदेशेऽनुनासिक-

---

'पूर्वोपदेशे' इति कित्त्वप्रतिषेधरूपं दूषणं खण्डयति–'नैष दोष' इति। रलः अव् व्युपधात्। इति अव् इति लुप्तपञ्चमीकम्, रलः अवः इत्युभयत्रापि धातोर्विशेष्यत्वात् 'येन विधिः' इति तदन्तविधिना रलन्तात् अवकारान्तादित्यर्थः। व्युपधात्–उश्च इश्च वी ते उपधे यस्य तस्माद् व्युपधाद्–इकारोकारान्यतरोपधादित्यर्थः। व्यलोपवचनरूपं दूषणं खण्डयति 'नैष दोष' इति 'लोपो व्योर्वलि' इति रेफद्वयघटिते प्रयोगे 'रो रि' इति लोपः। र्च वल् च अनयोः समाहारो र्वल् तस्मिन् परे इत्यर्थः।

परोपदेशेऽपि दूषणाभावं साधयति 'अथवे'ति। 'रेफोष्मणां सवर्णा न सन्ती'ति अनुनासिकाः सवर्णा न सन्तीत्यर्थः। अयं भावः 'अनुस्वारस्य ययि' इति सूत्रात् 'यरोऽनुनासिक' इति सूत्रे स्वरितत्वविशेषेण सवर्णग्रहणापकर्षात् सवर्णोऽनुनासिको भवतीत्यर्थेन 'स्वर्नयति' इत्यादौ न दोषः। ऊष्मण उदाहरणं महिष्मान्, इति। तथा कुण्डं रथेन इत्यादौ अनुस्वारस्य पर सवर्णवारणाय 'अनुस्वारस्य ययि' इति सूत्रे 'यरोऽनुनासिक' इत्यतोऽनुनासिक ग्रहणमनुवर्त्य अनुनासिकः सवर्णो भवतीति व्याख्यानात् रेफस्य च

द्विर्वचनपरसवर्णप्रतिषेधः' इति । अनुनासिकपरसवर्णयोस्तावत्प्रतिषेधो न वक्तव्यः, रेफोष्मणां सवर्णा न सन्ति*। द्विर्वचनेऽपि। नेमौ रहौ कार्यिणौ द्विर्वचनस्य। किं तर्हि ?। निमित्तमिमौ रहौ द्विर्वचनस्य। तद्यथा—ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम्' इति। नेदानीं तौ भुञ्जाते।

अनुनासिकसवर्णाभावान्न दोषः। 'अमोऽनुनासिका न ह्रौ' इत्युक्ते न रेफः। अङ्कितोऽञ्चित इत्यादौ अनुनासिकपरसवर्णौ विधाय सूत्रस्य चारितार्थ्याद् एतादृशलक्ष्यविषयकलक्षणोपप्लवो व्यक्तिपक्षे न भवतीत्यर्थः।

द्विर्वचने दोषं परिहरति 'नेमौ रहौ कार्यिणौ' इति अत्र हकारस्य यरन्तःपातित्वाभावेन द्वित्वकार्यित्वाप्राप्त्या केवलं दृष्टान्तार्थमेव तद्ग्रहणं, यथा हकारस्य कार्यित्वं स्वत एव नास्ति, तथा रेफस्य यरन्तः पातित्वात् प्राप्तमपि कार्यित्वं प्रत्यक्षश्रुतेन 'रहाभ्या' मिति निमित्तत्वेन माठरपरिवेषण न्यायाद्बाध्यते, न तु तक्रन्यायेनेति। अयं भावः—द्वित्व प्रतिषेधारम्भपक्षे मद्रह्रदः इत्यत्र हकारोत्तररेफस्य 'अचो रहाभ्या' मिति प्राप्तं, दकारोत्तररेफस्य 'मयो यणो द्वे वाच्ये' इति वार्तिकप्राप्तं, हर्य्यनुभव इत्यादौ रेफस्य 'अनची'ति प्राप्तं सर्वं द्वित्वं निषिध्यते, प्रत्याख्याने तु हर्यनुभव इत्यादौ यत्र रेफस्य 'अचो रहे'त्येतच्छास्त्रीयं निमित्तत्वं 'अनचीति' कार्यित्वं च प्राप्तं तत्रैव तक्रन्याय-बलेन निरवकाशं निमित्तत्वं सावकाशं कार्यित्वं बाधेत, तक्रन्यायस्य प्रवृत्तये तदप्राप्तियोग्येऽचारितार्थ्यरूपनिरवकाशत्वस्य निमित्तत्वेनापेक्षणात्। तक्र-न्यायेन च व्याप्यविषयतावच्छेदकावच्छिन्नातिरिक्तत्वेन व्यापकविषयतावच्छेद-कावच्छिन्ने संकोचाद् यत्र यत्र यरव्यवहितपूर्व-अजव्यवहितोत्तर-रेफ-त्वावच्छिन्ना 'अचो रहाभ्या' मिति शास्त्रीया निमित्तताख्या विषयता (व्याप्यभूता) तत्र तत्र 'अनची'ति शास्त्रीया अजव्यवहितोत्तरयत्वावच्छिन्ना कार्यिताख्या विषयता

---

* अनुनासिकवारणाय यथा सवर्णपदस्यापकर्षमाश्रित्य विधेयविशेषणता अङ्गी-कृता, एवं 'स्पर्शोऽपञ्चमः' इति प्रातिशाख्यसंवादेन 'झयो ह' इत्यतो 'झय्' पदस्या-पकर्षमाश्रित्य स्थानिविशेषणत्वेनापि अनुनासिकवारणं संभवति तथापि प्रथमोप-स्थितत्वात्स एवोपाय उक्तः।

इदं विचार्यते–इमेऽयोगवाहा न क्वचिदुपदिश्यन्ते, श्रूयन्ते च तेषां

(व्यापकीभूता) इति विषयतयोर्व्याप्यव्यापकभावे व्यापकविषयतावच्छेदकावच्छिन्ने अजव्यवहितोत्तरयर्त्वावच्छिन्ने रेफे यरव्यवहितपूर्व-अजव्यवहितोत्तर-रेफ-त्वरूपं यद्व्याप्य-निमित्तताख्यविषयतावच्छेदकं-तदवच्छिन्नातिरिक्तत्वेन संकोचे हर्यनुभव इत्यादौ तादृशसंकुचितविषयताश्रयरेफाभावात् द्वित्वं न प्राप्नुयात् । परन्तु मद्रहद इत्यादौ तु तादृशसंकुचितविषयताश्रय–(अजव्यवहितोत्तर-यरव्यवहित पूर्व-रेफ-त्वावच्छिन्नातिरिक्तरूप) रेफ सत्त्वात् रेफद्वये क्रमेण 'मयो यण' इति 'अचो रहाभ्या' मिति च द्वित्वं प्राप्नुयादेव, तथा च आरम्भप्रत्याख्यानयोः फलभेदे प्रत्याख्यानासङ्गतिः । तस्मात् पक्षद्वये फलैक्याय तक्रन्यायातिरिक्तमाठरपरिवेषणन्यायेन व्यवस्था ।

अयं च न्यायः एकविधेयतानिरूपित—उद्देश्य-निमित्तादि-दल-प्रविष्ट धर्मयोर्यत्र व्याप्यव्यापकभावः तत्र प्रवर्तते । अनेन च व्याप्यधर्मावच्छिन्नातिरिक्तत्वेन व्यापकधर्मावच्छिन्ने संकोचः । नत्वनेन व्याप्यविषयताश्रयातिरिक्तत्वेन तक्रन्यायेनेव संकोचः । तक्रन्यायविषये तदभावे तु आट, आटतुः इत्यादौ 'अजादेर्द्वितीयस्ये'त्यनेन बाधात् 'लिटिधातो'रिति द्वित्वानापत्तिः । तथा च माठरपरिवेषणन्यायेन अचोरहाभ्यामिति सूत्रे व्याप्यरेफत्वधर्मावच्छिन्नातिरिक्तत्वेन व्यापकयर्त्वावच्छिन्ने संकोचे रेफातिरिक्तस्य यरो द्वित्वं भवतीत्यर्थेन जलह्रदो मद्रह्रद इत्यादौ ह्रदादिघटकरेफेऽ'चोरहे'ति न द्वित्वम् । रेफातिरिक्तयर एव अनचीति सूत्रेऽनुवृत्त्या हर्यनुभव इत्यादि रेफे 'अनची'-त्यस्य न प्राप्तिः । 'मयो यण' इति वार्तिकेऽपि तत्संबन्धाच्च रेफातिरिक्तयरन्तःपातियणो मयः परत्वे द्वित्वं भवतीत्यर्थात् मद्रादिशब्दे रेफस्य न द्वित्वमिति नारम्भप्रत्याख्यानयोः फलभेद इति नव्यानामाधुनिकानां कैयटमतोपष्टम्भिकासरणिः । नागेशमतं त्वत्र न सम्यगिति सुधियो विभावयन्तु ।

शास्त्रप्रवृत्तिप्रयोजकसाधुत्वं विना उद्देश्यत्वं विधेयत्वं वा न सिध्यति इति पूर्वमुक्तमेव । तथा च अयोगवाहानां तादृशसाधुत्वं विना विधेयत्वादिकं न स्यात्, इत्यर्थं तेषामुपदेशः कर्तव्यः । स च कार्यवशात् क्व कर्तव्यः-इत्यादिकं चिन्त्यते 'इदं विचार्यते' इति-अयोगवाहा इति । वहन्ति शास्त्रे लोके च श्रूयन्ते इति वाहाः,

कार्यार्थं उपदेशः कर्तव्यः । के पुनरयोगवाहाः ? । विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारनासिक्ययमाः। कथं* पुनरयोगवाहाः ? । यदयुक्ता वहन्ति-अनुपदिष्टाश्च श्रूयन्ते । क्व पुनरेषामुपदेशः कर्तव्यः ? ।

*** अयोगवाहानामट्सु णत्वम् ८-१ ***

अयोगवाहानामट्सूपदेशः कर्तव्यः । किम् प्रयोजनम् ? । णत्वम् । उरःकेण, उरᳲकेण, उरःपेण, उरᳲपेण 'अड्व्यवाये' । इति णत्वं सिद्धं भवति ।

*** शर्षु जश्भावषत्वे ८-२ ***

शर्षूपदेशः कर्तव्यः । किं प्रयोजनम् ? । जश्भावषत्वे । अयमुब्जिरुपध्मानीयोपधः पठ्यते, तस्य जश्त्वे कृते उब्जिता उब्जितुमित्येतद्रूपं यथा स्यात् । यद्युब्जिरुपध्मानीयोपधः पठ्यते उब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति । दकारोपधे पुनर् 'न न्द्राः संयोगादयः' इति प्रतिषेधः सिद्धो भवति ॥ यदि दकारोपधः पठ्यते, का रूपसिद्धिः, उब्जिता उब्जितुमिति ? ।

नास्ति योगः-उपदेशो येषां ते अयोगाः, अयोगाश्च ते वाहाश्च इति कर्मधारयेणानुपदिष्टाः लोके व्यवह्रियमाणाश्च वर्णा इति फलितम् । अयुक्ता वहन्ति इत्यस्य व्याख्या अनुपदिष्टाः श्रूयन्ते इति ।

कार्यविशेषार्थं प्रत्याहारविशेषे उपदेश उच्यते-अयोग वाहानाम् "अट्सु णत्व"मिति "उरः केण" इति-उरः कायतीति विग्रहे "आतोऽनुपसर्गः" इति कः । प्रत्याहारान्तरे विशिष्टफलाय उपदेशमाह-शर्षु जश्भावषत्वे । शर्प्रत्याहारे अयोगवाहपाठस्य जश्त्वषत्वे फले इत्यर्थः । तत्र जश्त्वफलं उब्ज आर्जवे इति धातोर्लुटि उपध्मानीयोपधत्वपक्षे "झलां जश् झशि" इत्यनेन उपध्मानीयस्य जश्त्वेन आन्तरतम्याद् बकारे उब्जिता इति रूपासिद्धिः । उब्जिजिषति इत्यादि रूपसिद्धये दकारोपधत्वं 'नन्द्रा' इति निषेधप्रवृत्तिं च साधयति । "यदीत्यादि" दकारोपधत्वपक्षे उब्जितु मित्यादिरूपासिद्धये, दकारोपधत्वप्रयुक्त-

---

* तथा च शुक्लयजुः प्रातिशाख्ये-अथायोगवाहाः; ᳲक इति जिह्वामूलीयः; ᳲप इत्युपद्ध्मानीयः; अं इत्यनुस्वारः; अः इति विसर्जनीयः; हुँ इति नासिक्यः, कुँ खुँ गुँ घुँ इति यमाः (अ ८ सू० ८-१४) ।

*** असिद्धे भ उद्जेः ८-३ ***

इदमास्ति-'स्तोः श्चुना श्चुः' इति ततो वक्ष्यामि 'भ उद्जेः' उद्जेः-श्चुना सन्निपाते भो भवतीति। तत् तर्हि वक्तव्यम्?। न वक्तव्यम्। निपातनादेव सिद्धम्। किं निपातनम्? 'भुजन्युब्जौ पाण्युपतापयोः' इति। इहापि तर्हि प्राप्नोति—अभ्युद्गः समुद्गः इति। अकुत्वविषये तन्निपातनम्। अथवा नैतदुब्जे रूपम्। गमेरेतद् द्व्युपसर्गाड्डो विधीयते। अभ्युद्गतोऽभ्युद्गः, समुद्गतः समुद्गः इति॥ षत्वं च प्रयोजनम्। सर्पिःषु धनुःषु। 'शर्व्यवाये' इति षत्वं सिद्धं भवतीति 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति विसर्जनीयग्रहणं न कर्तव्यं भवति। नुमश्चापि तर्हि ग्रहणं शक्यमकर्तुम्। कथं सर्पींषि धनूंषि?। अनुस्वारे कृते 'शर्व्यवाये' इत्येव सिद्धम्। अवश्यं नुमो ग्रहणं कर्तव्यम्। अनुस्वारविशेषणं नुम्ग्रहणम्, नुमो योऽनुस्वारस्तत्र यथा स्यात्, इह मा भूत्-पुंस्विति॥

'नन्द्रा' इतिनिषेधप्रवृत्तये च असिद्धकाण्डे (त्रिपाद्यां) "भ उब्जेः" इति पठनीयम्। "स्तो श्चुना" इत्यतः "श्चुना" इत्यनुवर्तते तथा च उब्जधातुसम्बन्धिशकारचवर्गयोगे भादेशो भवतीति। स च अव्यवधानाद्, दकारस्यैव—इत्याह "असिद्धे भ उब्जेः"।

अपूर्ववचनाङ्गीकारापेक्षया "भुजन्युब्जौ" इति निपातनात् भत्वम् इति प्रकारान्तरमाह-न वक्तव्यमिति। अनेन च निपातनेन जायमानं भत्वमपि दकारोपधपाठसामर्थ्यात् नन्द्रा इति निषेधे कृते प्रवर्तते, तेन उब्जिजिषति इत्यादि सिद्धिः। अभ्युद्ग इति अभिपूर्वाद् उब्जधातोर्घञि 'च जोः कुघिण्यतोः' इति कुत्वे रूपमिदम्। तत्र निपातनात् प्राप्तं भत्वं वारयति-अकुत्वविषये इति" च-जोरिति कुत्वाऽविषये इत्यर्थः। अथवा-अभि उत् इति उपसर्गद्वयपूर्वाद्गमधातोर्डप्रत्यये डित्वसामर्थ्याट्टिलोपे अभ्युद्ग इत्यादिसिद्धिः इत्याह-अथवेति।

षत्वं प्रयोजनमिति स्पष्टम्-सर्पींषि इत्यादौ "नुमः" 'नश्चापदान्तस्ये'त्यनुस्वारे तस्य अयोगवाहत्वात् 'नुम् विसर्जनीये'ति सूत्रे शर्ग्रहणेनैव गतार्थत्वात् नुम् ग्रहणं व्यर्थम्, इत्याशङ्क्य नुम्स्थानिकानुस्वारोपलक्षणार्थं नुम् ग्रहण आवश्यकमित्याह-अवश्यमिति"

अथवाऽविशेषणोपदेशः कर्तव्यः । किं प्रयोजनम् ? ।

* अविशेषेण संयोगोपधासंज्ञाऽलोन्त्यद्विर्वचनस्थानि
वद्भावप्रतिषेधाः * ८—४

अविशेषेण संयोगसंज्ञा प्रयोजनम्, उ३ञ्जक, 'हलोऽनन्तराः संयोगः' इति संयोगसंज्ञा । 'संयोगे गुर्वि' ति गुरुसंज्ञा 'गुरोरिति' प्लुतो भवति । उपधासंज्ञा च प्रयोजनम्—दुष्कृतं, निष्कृतम्, दुष्पीतं, निष्पीतम् 'इदुदुपधस्य चाप्रत्ययस्ये'ति षत्वं सिद्धं भवति ॥ नैतदस्ति प्रयोजनम् । न 'इदुदुपध' ग्रहणेन विसर्जनीयो विशेष्यते ॥ किं तर्हि ? ॥ सकारो विशेष्यते–' इदुदुपधस्य सकारस्य यो विसर्जनीयः' इति । अथवोपधाग्रहणं न करिष्यते, इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः—इदुद्भ्यामुत्तरस्य विसर्जनीयस्येति ॥ अलोऽन्त्यविधिश्च प्रयोजनम्—वृक्षस्तरति प्लक्षस्तरति 'अलोऽन्त्यस्य' विधयो भवन्तीत्यलोऽन्त्यस्य सत्वं सिद्धं भवति॥ एतदपि नास्ति प्रयोजनम्

इदानीं प्रत्याहारविशेषे अयोगवाहपाठस्य फल मुक्त्वाऽलादिप्रत्याहारसामान्ये ग्रहणार्थ मुपदेशावश्यकत्वं तत्फलं चाह "अथवेति" । "अविशेषेणेति" सामान्यतः इत्यर्थः । संयोगसंज्ञा, उपधा संज्ञा, अलोऽन्यसूत्रप्रवृत्तिः, द्विर्वचनम् स्थानिवत्वप्रतिषेधश्च इति सामान्योपदेशस्य पञ्च फलानि । संयोगसंज्ञायाः ऊ३ञ्जक इति प्लुतासिद्धिः । उपधासंज्ञायां फलं दुष्कृतमिति, दुःकृतमिति स्थिते विसर्गस्य अल्त्वेन "अलोऽन्त्यात्पूर्व उपधा" इति उकारस्य उपधात्वे "इदुदुपधस्य" इति षत्वसिद्धिः । सामान्यत उपदेशाभावे तु विसर्गस्य अल्त्वा भावात् उकारस्य उपधात्वाभावे षत्वाप्राप्तिः । खण्डयति–न एतदिति । विसर्जनीयात्प्राग् दुस् इति सान्तावस्थायामेव उपधासंज्ञां कृत्वा षत्वसिद्धिरिति भावः । उपधाग्रहणाभावेऽपि इदुद्भ्यां परस्य–अप्रत्यस्य विसर्गस्य–षः कुप्वोः इत्यर्थेन इष्टसिद्धिरित्याह–"अथवेति" तथा च नैतत् फलम् । एवं वृक्षस्तरति इत्यादावर्थ अलोऽन्त्यविधिरपि न प्रयोजनम् मूलोक्तहेतोः । उरः कः इत्यादौ जिह्वामूलीयादेः द्विर्वचनं तु प्रयोजनमस्त्येव ।

"निर्दिश्यमानस्यादेशा भवन्ति" इति विसर्जनीयस्यैव भविष्यति । द्विर्वचनं च प्रयोजनम् १=(उर ⨯⨯ कः: । उर ⨯⨯ पः:) 'अनचि च' अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं सिद्धं भवति । स्थानिवद्भाव-प्रतिषेधश्च प्रयोजनम्— यथेह भवति–उरःकेण, उरःपेणेति 'अड् व्यवाय' इति णत्वम्, एवमिहापि नि॰ स्थानिवद्भावात्प्राप्नोति—व्यूढोरस्केन महोरस्केनेति । तत्र 'अनल्विधौ' इति प्रतिषेधःसिद्धो भवति ।

(वर्णानामर्थवत्ताविचाराधि॰)

किं पुनरिमे वर्णा अर्थवन्तः, आहोस्विदनर्थकाः ? ।

स्थानिवद्भावप्रतिषेध इति-व्यूढोरस्केनेति । व्यूढम् उरो यस्य इति बहुव्रीहौ 'उरः प्रभृतिभ्यः कप्' इति कपि, 'सोपदादौ' इति विसर्गस्य सत्वे तस्य स्थानिवद्भावेन विसर्गवृत्ति अट्त्वमाश्रित्य, उरः केण इतिवत् अड्व्यवाये इति णत्वं प्राप्तम् । तच्च अनल्विधौ इति स्थानिवद्भावनिषेधेन अट्व्यवधानाभावात् वार्यते । विसर्गस्य अल्त्वाभावे तु अनल्विधाविति निषेधो न प्रवर्तेतेति भावः । तथा च पञ्चानां फलानां फलत्रयं स्वीकृतम् फलद्वयं चान्यथासिद्धम् ।

इदानीं सर्वेषां वर्णानाम् अर्थवत्वविषये विचारः—किं सर्वे वर्णाः पर्याप्तिसंबन्धेन अर्थवन्तः, उत न, इति सन्देहे अनुमानेन पर्याप्त्या अर्थवत्वं

---

१ अयं च भाष्यग्रन्थः केनचित् विकारितो भवेत् 'न विसर्जनीयः' (२ २६) इति अथर्वप्रातिशाख्ये 'अ॰ न' (१४ । १४) 'अवसाने रविसर्जनीयजिह्वामूलीयोपध्मानीयाः' (१४ । १५) इति सूत्रेण तैत्तिरीयप्रातिशाख्ये च द्वित्वनिषेधस्य स्पष्टमभिधानात् । किन्तु जिह्वामूलीयोपध्मानीयाभ्यां च ' (४ । १०३) इति वाजसनेयिप्रातिशाख्यानुसारेण ' मयि व⨯कामधरणम्' (वा. सं. ३ । २७) ' तत⨯खनेम' (वा. सं. ११ । २२) इत्यादौ ताभ्यां परस्यैव द्वित्वविधानं वार्तिककाराभिप्रेतं मन्तव्यम् । एवं च अट्सु पाठस्यैव द्वित्वं प्रयोजनम् शर्षु पाठस्य तु जश्भावप्रयोजनप्रत्याख्यानवत् द्वित्वप्रयोजनप्रत्याख्यान' मपि भाष्यकृता लिखितं त्रुटितं भवेत् । इति कश्चित् । तन्न । शाखाभेदेन तद्व्यवस्थोपपत्तौ तथा कल्पनाऽनुपपत्तेः ।

* अर्थवन्तो वर्णा धातुप्रतिपदिकप्रत्ययनिपातानामेक-
वर्णानामर्थदर्शनात् * ७—१

अर्थवन्तो वर्णाः। कुतः ? । धातुप्रातिपदिकप्रत्ययानिपातानामेक-वर्णानामर्थदर्शनात् । धातव एकवर्णा अर्थवन्तो दृश्यन्ते—एति, अध्येति, अधीते इति । प्रातिपदिकान्येकवर्णान्यर्थवन्ति—आभ्याम्, एभिः, एषु । प्रत्यया एकवर्णा अर्थवन्तः—औपगवः, कापटवः। निपाता एकवर्णा अर्थवन्तः—अ अपेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, अ अपक्राम । धातुप्रातिपादिकप्रत्ययनिपातानामेकववर्णानामर्थदशनान्मन्यामहे--अर्थवन्तो वर्णा इति।

* वर्णव्यत्यये चार्थान्तरगमनात् * ७-२

वर्णव्यत्यये चार्थान्तरगमनान्मन्यामहेऽर्थवन्तो वर्णा इति । कूपः सूपो यूपः इति। कूप इति सककारेण कश्चिदर्थो गम्यते। सूप इति ककारापाये सकारोपजने चार्थान्तरं गम्यते । यूप इति ककारसकारापाये यकारोपजने चार्थान्तरं गम्यते । तेन मन्यामहे—यःकूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति।

पूर्वपक्षी साधयति "अर्थवन्तो वर्णा इति॥ वर्णा इति पक्षनिर्देशः, हेतोः अनिर्देशात् पक्षतावच्छेदकमेव हेतुरिति पूर्वपक्षी अभिप्रैति। अर्थवन्त इति साध्य निर्देशः–अत्र अर्थ–शब्दात् प्राशस्त्ये मतुप्, तेन च पर्याप्तिसम्बन्धेनार्थवत्वं साध्यमिति फलितम्। धातुप्रातिपदिकादीनि एकवर्णात्मकानि दृष्टान्तः। तथा च—वर्णाः पर्याप्त्या अर्थवन्तः वर्णत्वात् इङादिधातुवत् इत्यनुमानं फालितम् । अत्र 'प्रकृतिप्रत्ययाः तत्तदर्थबोधकाः' इति वर्णस्फोटपक्षमादाय इङादिधातूनां दृष्टान्तत्व-व्यवहारः।

द्वितीयमनुमानमाह–"वर्णव्यत्यये चार्थान्तरगमनात्" अत्र व्यत्यय-शब्देन–एकवर्णस्याभ्युपगमे अपरवर्णस्य यो अपगमः–स उच्यते। अत्रेद-मनुमानम्—कूपादिरूपार्थः कूपादिशब्दघटकककारादिबोध्यः। ककारान्वय-व्यतिरेकानुविधायिबोधविषयत्वात्, यो यदन्वयव्यतिरेकानुविधायी स तत्सम्बन्धी इति व्याप्तेः। दृष्टान्तस्तु—यन्नैवं तन्नैवं, यथा सूपयूपादिरूपो अर्थः न ककारा-

* वर्णानुपलब्धौ चानर्थगतेः * ७-३

वर्णानुपलब्धौ चानर्थगते र्मन्यामहेऽर्थवन्तो वर्णा इति। वृक्ष ऋक्षः, काण्डीर आण्डीरः। वृक्ष इति सवकारेण कश्चिदर्थो गम्यते, ऋक्ष इति वकारापाये सोऽर्थो न गम्यते, काण्डीर इति सककारेण कश्चिदर्थो गम्यते, आण्डीर इति ककारापाये सोऽर्थो न गम्यते, किं तर्ह्युच्यते—'अनर्थगतेः' इति? न साधीयो ह्यत्रार्थस्य गति र्भवति॥ एवं तर्हीदं पठितव्यं स्यात् 'वर्णानुपलब्धौ चातदर्थगतेः' इति॥ किमिदम्—अतदर्थगतेरिति? तस्यार्थस्तदर्थः, तदर्थस्य गतिस्तदर्थगतिः। न तदर्थगतिरतदर्थगतिरतदर्थगतेरिति। अथवा सोऽर्थस्तदर्थस्तदर्थस्य गतिस्तदर्थगति र्न तदर्थगतिरतदर्थगतिरतदर्थगतेरिति। स तर्हि तथा निर्देशः कर्तव्यः?॥ न कर्तव्य उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा—उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः। एवमतदर्थगतेरनर्थगतेरिति।

* संघातार्थवत्त्वाच्च * ७-४

संघातार्थवत्त्वाच्च मन्यामहे 'अर्थवन्तो वर्णा' इति येषां संघाता अर्थवन्तः, अवयवा अपि तेषामर्थवन्तः। (येषां पुनरवयवा अनर्थकाः समुदाया

न्वयव्यतिरेकानुविधायिबोधविषयः, इति न ककारबोद्धय इति। एवं यूपादि शब्देऽपि अनुमानं बोद्धयम्। अत्र मते कूपादिशब्दघटकः ऊपशब्दः ककारादि-निष्ठशक्त्युद्बोधकत्वेन द्योतकः। अत्रानुमानेऽर्थस्य पक्षत्वेन ककारादिवाच्यत्वे सिद्धे तुल्यवित्तिवेद्यन्यायात् ककारादेर्वाचकत्वं सिद्धयति। अत्र च कूपादिशब्द-श्रवणोत्तरकालिकस्मृतिविषयत्वादिरूपं यथायथं पक्षविशेषणं बोध्यम्।

तृतीयमनुमानमाह—"**वर्णानुपलब्धौ चानर्थगतेरिति**–अत्रेदमनु-मानम्-वर्णा अर्थवन्तः, स्वसत्ताकालिकबोधविषयार्थ–भिन्नार्थ-बोधकारणी भूताभावप्रतियोगित्वात्। वृक्षशब्दे वकारवत्। तथाहि—वृक्षशब्दे वकारसत्ता-समकालिकबोधविषयोऽर्थः–द्रुमरूपः, तद्भिन्नो अर्थो भल्लूकरूपः, तद्बोधकारणी-भूतोऽभावः-वकाराभावः, तत्प्रतियोगी वकार इति।

चतुर्थमनुमानमाह—"**संघातार्थवत्त्वाच्च**" इति। अनुमानप्रयोगश्चे-

अपि तेषामनर्थकाः) तद्यथा—एकश्चक्षुष्मान्दर्शने समर्थः तत्समुदायश्च शतमपि समर्थम्, एकश्च तिलस्तैलदाने समर्थः तत्समुदायश्च खार्यपि तैलदाने समर्था। येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः। तद्यथा—एकोऽन्धो दर्शनेऽसमर्थस्तत्समुदायश्च शतमप्यसमर्थम्। एका च सिकता तैलदानेऽसमर्था तत्समुदायश्च खारीशतमप्यसमर्थम्।

यदि तर्हीमे वर्णा अर्थवन्तः। अर्थवत्कृतानि प्राप्नुवन्ति। कानि? 'अर्थवत्प्रातिपदिकम्' इति प्रातिपदिकसंज्ञा' 'प्रातिपदिकात्' इति स्वाद्युत्पत्तिः' 'सुबन्तं पदम्' इति पदसंज्ञा। तत्र को दोषः?। 'पदस्य' इति नलोपादीनि प्राप्नुवन्ति धनं वनमिति।

॥ संघातस्यैकार्थ्यात्सुबभावो वर्णात् ॥ ६–५

संघातस्यैकत्वमर्थः। तेन वर्णात्सुबुत्पत्ति र्न भविष्यति।

त्थम्—घटादिशब्दघटका वर्णा अर्थवन्तः अर्थवत्समुदायारम्भकत्वात्। यो यद्गुणकसमुदायारम्भकः स तद्गुणक इति व्याप्तेः। दृष्टान्तः—तैलादिदानसमर्थसमुदायारम्भकतिलादिवत्।

एवमर्थवत्वे साधिते प्रत्येकं वर्णेभ्यः प्रातिपदिकत्वप्रयुक्तसुबुत्पत्तिं, तत्प्रयुक्तपदसंज्ञां, तत्प्रयुक्तं धनादिशब्दे धकारनकारयोर्जश्त्व-नलोपादिकमापाद्य खण्डयति—"संघातस्यैकार्थ्यात्" इति। अयं भावः "द्व्येकयोर्द्विवचनैकवचने" "स्वौजसमौट्" "प्रातिपदिकार्थलिङ्ग" इत्यादीनाम् एकवाक्यतया एकत्वविशिष्ट प्रातिपदिकार्थमात्रविवक्षायां प्रातिपादिकात् प्रथमैकवचनं सुप्रत्ययः परो भवति। इति शाब्दबोधे सति एकत्वमेकवचनोत्पत्तौ निमित्तं लभ्यते, तच्चैकत्वं यथा प्रत्येकवर्णार्थे वर्तते,तथा समुदायार्थेऽपि वर्तते, तथा च एकत्वेन निमित्तेनोत्पद्यमानमेकवचनं समुदायादेव सर्वानुग्राहकं भविष्यति, प्रत्येकं वर्णात् उत्पन्नेन तु न समुदायानुग्रहः सम्भवति, समुदायादुत्पत्तौ तु सर्वानुग्रहः संपद्यते इति विशेषः। तथा च समुदायादेवैकवचनं भविष्यति न्यायबलात्, न तु प्रत्येकं वर्णात्। 'सुप्तिङन्तं पदम्' इति सूत्रे च 'यस्मात्प्रत्ययविधिः—इत्यस्यानुवृत्तेः समुदायस्यैव पदसंज्ञा। तथा च प्रत्येकं वर्णानां पदत्वाभावाज् जश्त्व-नलोपादिकं न। पर्याप्त्याऽर्थवत्वं तु अङ्गीक्रियते। इति पूर्वपक्षः।

* अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः *१-६

अनर्थकास्तु वर्णाः । कुतः ? प्रतिवर्णमर्थानुपलब्धेः । नहि प्रतिवर्ण-मर्था उपलभ्यन्ते। किमिदं प्रतिवर्णमिति ?। वर्णं वर्णं प्रति प्रतिवर्णम्।

* वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात् * १-७

वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनान्मन्यामहे-अनर्थका वर्णा इति वर्णव्यत्यये-कृतेस्तर्कः, कसेः सिकताः, हिंसेः सिंहः। वर्णव्यत्ययो नार्थ-व्यत्ययः। अपायो लोपः-हतः, घ्नन्ति, घ्नन्तु, अघ्नन् वर्णापायो नार्थापायः। उपजन आगमः- लविता, लवितुम्। वर्णोपजनो नार्थोपजनः। विकार आदेशः-घातयति घातकः। वर्णविकारो नार्थविकारः। यथैव वर्णव्यत्ययापायोपजनविकारा भवन्ति, तद्वदर्थव्यत्ययापायोपजनविकारैर्भवितव्यम्। न चेह तद्वद्। अतो मन्यामहे-'अनर्थका वर्णा' इति।

सिद्धान्तमाह—"अनर्थकास्तु" इत्यादि। अत्रानुमानप्रयोगः-असति विशेषानुशासने प्रत्येकं वर्णाः पर्याप्त्याऽर्थवत्वाभाववन्तः पर्याप्त्यार्थबोधजनकत्वाभावात्। इङादिधातु-प्रातिपदिकादिव्यावृतये असति विशेषानुशासने इति पक्षविशेषणम्। तेन तेषां न पक्षता।

हेत्वन्तरमाह-'वर्ण-व्यत्ययापाय' इत्यादि। अत्र व्यत्ययपदेन पूर्वापरवर्णव्यत्यासो विवक्षितः। अनेन वार्तिकेन 'वर्णव्यत्यये चार्थान्तरगमनात्' वर्णानुपलब्धौ चानर्थगतेः' इति वार्तिकद्वयोक्तहेत्वोः व्यतिरेकव्यभिचारं प्रदर्श्यानैकान्तिकत्वं साधितम्। तथाहि—**वर्णव्यत्यये चार्थान्तरगमनात्**। इत्यनेन कूपादिशब्दे 'ककारापगमे सकाराद्यागमे च कूपाद्यर्थो न प्रतीयते, तत्सत्त्वे तु प्रतीयते, इत्यन्वयव्यतिरेकौ प्रदर्शितौ। परन्तु घ्नन्तीत्यादौ हन्ते हकारापगमे, घकारागमेऽपि मारणरूपार्थप्रतीतेः-तदभावे तत्सत्त्वरूपो व्यतिरेकव्यभिचारः। तथा **'वर्णानुपलब्धौ चानर्थगतेः'**। इत्यनेन वर्णस्य स्वसत्तासमकालिकबोधविषयाभिन्नार्थ बोधकारणीभूताभावप्रतियोगित्वं हेतूकृत्य अर्थवत्त्वं साध्यते। तच्च न सम्भवति। घातयति, घातः इत्यादौ हकारनकारयोः सत्ताकाले बोधविषयो यो मारणरूपोऽर्थः, स एव हकार-नकारयोरभावकालेऽपि

उभयमिदं वर्णेषूक्तम्–अर्थवन्तोऽनर्थका इति च । किमत्र न्याय्यम् । उभयमित्याह । कुतः ? । स्वभावतः । तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थै र्युज्यन्ते, अपरे न । न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम् , कश्चिद्वाऽनर्थक इति कृत्वा सर्वैरनर्थकैः । तत्र किमस्माभिः शक्यं कर्तुम्––यद्धातुप्रातिपदिकप्रत्ययनिपाता एकवर्णा अर्थवन्तोऽतोऽन्येऽनर्थका इति । स्वाभाविकमेतत्॥ कथं य एष भवता वर्णानामर्थवत्तायां हेतुरुपदिष्टः–अर्थवन्तो वर्णा धातुप्रातिपदिक प्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेः संघातार्थवत्त्वाच्च इति ? संघातान्तराण्येवैतान्येवंजा-

---

बोधविषयः । तथा च प्रतियोग्यभावयो र्भिन्नाभिन्नार्थबोधकारणत्वं पूर्वपक्ष्यभिप्रेतं न सिद्धमिति व्यभिचारः ।

सिद्धान्तनिर्णयाय पृच्छति–'किमत्र न्याय्यम्' इति । सिद्धान्ती उत्तरमाह—'**उभय**' मिति । यत्र यत्र वर्णविशेषे इङ्–इक्, इत्यादिधातुप्रातिपदिक—निपातादिरूपे भाष्योक्तेऽन्वयव्यतिरेकाभ्यां वाचकता पर्याप्त्या सिद्ध्येत्, तत्राङ्गीक्रियताम् । नतु तद्दृष्टान्तेन सर्ववर्णेषु तथाङ्गीकारः सम्भवति व्यभिचारस्य दर्शितत्वाद् इत्यर्थः ।

'स्वभावत' इति । अयं भावः–ईश्वरेच्छा शक्तिरिति मते घटशब्दात्कम्बुग्रीवादिमानर्थो बोद्धव्यः' इतीश्वरेच्छायां कम्बुग्रीवादिमदर्थविषयकबोधनिष्ठजन्यतानिरूपिता घटशब्दनिष्ठा या जनकता, तादृशजनकतायां घकारोत्तरवर्त्यकारोत्तरवर्तिटकारोत्तरवर्त्यकारत्वरूपाऽऽनूपूर्वी अवच्छेदिका प्रतीयते । तथा च बोधजनकतावच्छेदकत्वेन यत्रैतादृशी आनुपूर्वी भगवदिच्छायां विषयभूता, तत्र प्रत्येकं वर्णानामर्थवत्वं नास्ति । इङादिधातुस्थले तु इ–शब्दोऽध्ययनक्रियाबोधको भवत्वितीश्वरेच्छायां बोधनिष्ठजन्यतानिरूपितजनकताश्रयत्वेन विवक्षितो य इशब्दः, तद्वृत्ति इत्वमेव (एकवर्णमात्रवृतिधर्मः) जनकतावच्छेदकत्वेन प्रविष्टं, न तु काचिदानुपूर्वी प्रविष्टेति महद्वैलक्षण्यम् । ईश्वरेच्छीयविषयतैव पदार्थानां स्वभावो नान्य इति ।

(संघातान्तराण्येवेति) अयं भावः-पूर्वोक्तरीत्या कूपादिशब्दे ककारोत्त-

तीयकानि अर्थान्तरेषु वर्तन्ते—कूपः सूपो यूप इति। यदि हि वर्णव्यत्यकृतमर्थान्तरगमनं स्यात्, भूयिष्ठः कूपार्थः सूपे स्यात्, सूपार्थश्च कूपे, कूपार्थश्च यूपे। यूपार्थश्च कूपे, सूपार्थश्च यूपे, यूपार्थश्च सूपे, यतस्तु खलु न किंचित्सूपस्य वा यूपे, यूपस्य वा कूपे, कूपस्य वा यूपे, सूपस्य वा कूपे, कूपस्य वा सूपे, यूपस्य वा सूपे। अतो मन्यामहे—संघातान्तराण्येतान्येवंजातीयकान्यर्थान्तरेषु वर्तन्त इति।

इदं खल्वपि—भवता वर्णानामर्थवत्तां ब्रुवता साधीयोऽनर्थकत्वं द्योतितम्। यो हि मन्यते—यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति। ऊपशब्दस्त्वस्यानर्थकः स्यात्। तत्रेदमपरिहृतम् 'संघातार्थवत्त्वाच्च' इति एतस्यापि प्रातिपदिकसंज्ञायां परिहारं वक्ष्यति।

रवर्त्यूकारोत्तरवर्तिपकारोत्तवर्त्यकारत्वरूपानुपूर्व्या बोधजनकतावच्छेदकत्वेन ईश्वरेच्छाविषयत्वे सिद्धे यूप-सूपादि-घटकोपशब्दे ककारोत्तरवर्तित्वरूपविशेषणाभावेन विशेषणाभावप्रयुक्तविशिष्टाभावसत्त्वात् सामान्य ऊपशब्दः सन्नपि कूपबोधजनकत्वावच्छेदकत्वेन विवक्षितविशिष्टरूपाभावात्कूपशब्दापेक्षया यूप-सूपादेः संघातान्तरत्वमावहतीति। तदुक्तम्

न कूप-सूप-यूपानामन्वयोऽर्थस्य दृश्यते।
अतोऽर्थान्तरवाचित्वं संघातस्यैव गम्यते ॥१॥ इति

'प्रातिपदिकसंज्ञायां परिहारं वक्ष्यति' इति, दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः" सुराङ्गवद्रथाङ्गवच्चेत्यादिनाऽर्थवत्सूत्रे वक्ष्यति। अयं भावः—एकं रथचक्रं रथस्यान्यत्र प्रापणेऽसमर्थमपि द्वितीयचक्रसाहाय्येन समर्थं भवति। तथा एकः सुराबिन्दुरुन्मादोत्पादनेऽसमर्थोऽपि अन्यैः पुष्कलैर्बिन्दुभिः सह संयुक्त उन्मादको भवति। एवं प्रत्येकं वर्णानामर्थबोधनेऽसामर्थ्येऽपि ईश्वरेच्छाविशेषानुसारेण तत्तद्वर्णसमन्वितास्ते तत्तदर्थबोधने पर्याप्तशक्तिमन्त इत्यर्थः।

(अनुबन्धानां प्रत्याहाराबोध्यत्वाधि०)

अइउण्, ऋऌक्, एओङ्, ऐऔच् ।

* प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न * १०-१

य एतेऽक्षु प्रत्याहारार्था अनुबन्धाः क्रियन्ते, एतेषामज्ग्रहणेन ग्रहणं कस्मान्न भवति ?। किं च स्यात? दधि णकारीयति, 'इको यणचि' इति यणादेशः प्रसज्येत ।

* आचारात् * १०—२

किमिदमाचारादिति ? आचार्याणामुपचारात् । नैतेष्वाचार्या अच्कार्याणि कृतवन्तः ।

* अप्रधानत्वात् * १०—३

अप्रधानत्वाच्च । न खल्वेतेषामक्षु प्राधान्येनोपदेशः क्रियते। क्व तर्हि? हल्षु। कुत एतत् ?। एषा ह्याचार्यस्य शैली लक्ष्यते—यत्तुल्यजातीयाँस्तुल्यजातीयेषूपदिशति-अचोऽक्षु हलो हल्षु ।

प्रत्याहारेषु अनुबन्धानां ग्रहणमाशङ्क्य सहेतुकं निरस्यति-श्लोकात्मकवार्तिकेन—

प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ।
आचारादप्रधानत्वात् लोपश्च बलवत्तरः ॥

तत्र पूर्वार्धेन शङ्का उक्ता । तस्यायमर्थः 'प्रत्याहारे-अक्षरसमाम्नाये' अज्ग्रहणेषु-अच् प्रत्याहारग्राहकेषु 'अइउण्' इत्यादिषु पठितानां, ण् च् क् ङ्-रूपानुबन्धानां प्रत्यासत्त्या अच्-प्रत्याहारे ग्रहणं कुतो न। ग्रहणे च दधि-णकारीयतीत्यादौ यणाद्यापत्तिः" इति।उत्तरार्धेन त्रयो हेतव उक्ताः। तत्र प्रथमो हेतुः आचारादिति—आचार्याणामाचारादित्यर्थः, यरोऽनुनासिक इत्यादौ अनुनासिकशब्दे ककारे परे इकारस्य यण् पाणिनिना न कृतः, इत्यादिरूप आचारः ।

अप्रधानत्वादिति—अच्प्रत्याहारे स्वराणां प्राधान्येनोपदेशात् णादीनां च प्रत्याहारस्वरूपसम्पादनायोपादानात् तेषामप्राधान्याद् न अच्प्रत्याहारबोध्यता। तथा हल्प्रत्याहारे व्यञ्जनानामेव प्राधान्येनोपदेशात् 'हयवर' इत्यादौ अकारस्य स्पष्टोच्चारणसम्पत्तये उपादानात् तस्याप्राधान्येन न हल्प्रत्याहारबोध्यता ।

* लोपश्च बलवत्तरः * १०-४

लोपः खल्वपि तावद्भवति ।

ऊकालोऽजिति वा योगस्तत्कालानां यथा भवेत् ।
अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति * १०-५

अथवा योगविभागः करिष्यते-'ऊकालोऽच्' उ ऊ उ३ इत्येवंकालोऽज्भवति। ततो 'ह्रस्वदीर्घप्लुतः' ह्रस्वदीर्घप्लुतसंज्ञश्च भवति-ऊकालोऽच्। एवमपि कुक्कुट इत्यत्रापि प्राप्नोति । तस्मात्पूर्वोक्त एव परिहारः ॥

तृतीयो हेतुः "लोपश्चबलवत्तरः" इति । तत्र अनुमानं यथा-अनुबन्धाः प्रत्याहारजन्यबोधविषयत्वाभाववन्तः, अनुनासिक इत्यादौ यण्प्रयोजकनिमित्तत्वाद्यनवगाहि-पाणिनीयाचारविषयत्वात्। तथा "अप्राधान्येन निर्देशविषयत्वात्। उद्देश्यत्वेन विधेयत्वेन वा पाणिनीयतात्पर्यविषयत्वाभावबोधकबलवत्तर-'तस्य लोप'-इति शास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात्"। इति पृथक्पृथक्हेतुत्रयं बोध्यम् तेन त्रीण्यनुमानानि सिद्धानि। पक्षसाध्ययोस्तु त्रिष्वप्यनुमानेषु ऐक्यमेव। तृतीयहेतोरयमाशयः-'तस्य लोप' इत्यनेन विद्यमानानामनुबन्धानामदर्शनसम्पादनमशक्यम्, इति मत्वा तत्रत्यलोपपदेन उद्देश्यत्वेन विधेयत्वेन वा पाणिनीयतात्पर्यविषयत्वाभाव उच्यते इति न वर्णनित्यत्वहानिः।

द्वितीयं श्लोकवार्तिकमाह-"**ऊकालोऽजिति वा योग**"इति-"ऊकालोऽज्ह्रस्व दीर्घप्लुत" इति सूत्रे 'ऊकालोऽच्' इति योगो विभज्यते, "उश्च ऊश्च उ३श्च वः" वः कालो यस्य इति बहुव्रीहिणा एकमात्राकालिक-द्विमात्राकालिक-त्रिमात्राकालिकाः ये, त एवाच्संज्ञकाः भवन्ति। अर्धमात्राकालिकानां ण्-क्-ङ्-च्-व्यञ्जनानां पूर्वोक्तनियमात् "अच्त्वं" न प्राप्नोति । इति तदर्थः।

शङ्कते-**एवमपि कुक्कुट इति** ककारद्वयसंयोगे मात्राकालिकत्वसत्त्वात् अच्त्वं प्राप्नोति, तेन च पूर्वस्मिन्नुकारे यणादिकमापद्यते इति, **तस्मात् पूर्वोक्त एव परिहार इति' आचारादप्रधानत्वाल्लोपश्च बलवत्तर"** इत्येवंरूप इत्यर्थः। वस्तुतस्तु-**नच मात्रिकं व्यञ्जनमस्ति, अनुपदिष्टं सत् कथं शक्यं विज्ञातुम्, असच्च कथं शक्यं प्रतिपत्तुं,** इत्यपि परिहारः संभवत्येव ।

एष एवार्थः । अपर आह—

* ह्रस्वादीनां वचनात् प्राग्यावत्तावदेव योगोऽस्तु ।
अच्कार्याणि यथा स्युस्तत्कालेष्वच्सु कार्याणि ॥ * १०-६

(अन्तस्थानामण्सूपदेशफलाधि०)

अथ किमर्थमन्तस्थानामण्सूपदेशः क्रियते ? । इह सय्ँय्ँयन्ता, सव्ँव्ँवत्सरः, यल्ँल्ँलोकं, तल्ँल्ँलोकमिति परसवर्णस्यासिद्धत्वादनुस्वारस्यैव द्विर्वचनम् । तत्र परस्य परसवर्णे कृते तस्य यय्ग्रहणेन ग्रहणात् पूर्वस्यापि

ऊकालोऽजिति समाधानप्रकारस्य अदुष्टत्वसमर्थनाय अमुमर्थमृष्यन्तरसंवादेन द्रढयति, "एष एवार्थ इति" अपर आहेति–अन्यवार्तिकारोऽप्याहेत्यर्थः । "ह्रस्वादीनां वचनात्प्रागिति–ऊकाल इति सूत्रे ह्रस्वदीर्घप्लुत' इत्यंशात् प्राक् यावान् अंशः 'ऊकालोऽच्, इत्येवंरूपः तावानेव योगोऽस्तु तत्कालेषु एकमात्राकालिक-द्विमात्राकालिक–त्रिमात्राकालिकेषु अच्सु अच् कार्याणि यथा स्युरिति पूर्ववन्नियम इत्यर्थः ।

प्रसङ्गादन्तः स्थानामपि अण्सूपदेशस्य फलं विचारयति–अथ किमर्थं'मिति अयं भावः- अत्र 'हण्' 'यवरलट्' इति द्वे सूत्रे कार्ये, तेन यवरलानाम्-अट्त्व-हश्त्व-अश्त्व-हल्त्वादीनां सिद्धिः । तच्छ्लोकेनेति छत्वसिद्धये 'शश्छोऽटी'ति अट्प्रत्याहारे लकारस्येष्टत्वात् । सरलेनेत्यादौ लकारव्यवधाने 'अट्कुप्वाङ्'ति णत्वाभावस्तु 'चुटुतुलशर्व्यवाये न, इति निषेधेन सिद्धः । महान् लम्ब इत्यादौ 'तोर्लि'त्यनेन बाधात् दीर्घादटीत्यस्य न प्राप्तिः । न चैवं रेफस्येण्त्वाभावात् गीर्षु इत्यादौ षत्वानापत्तिः । 'इण्कोर्नुम्विसर्जनीये'ति संहितापाठे 'रोरी'ति लोपेन रेफप्रश्लेषे इष्टासिद्धेः । तथा चाण्सु यवलपाठफलप्रश्नः सूपपन्नः

समाधत्ते—इहेति । सम् यन्ता इत्यादौ "मोऽनुस्वार" इति अनुस्वारे कृते "अनचि च" इत्येतद् दृष्ट्या 'वा पदान्तस्य' इति परसवर्णस्यासिद्धत्वादनुस्वारस्य द्वित्वे कृते यन्ताशब्दावयवं यकारं ययमादाय द्वितीयानुस्वारस्य 'वा पदान्तस्ये'ति परसवर्णेन अनुनासिके यँकारे कृते तस्य अनुनासिक यँकारस्य ग्राहकशास्त्रेण यय्ग्रहणेन ग्रहणात् प्रथमस्याप्यनुस्वारस्य परसवर्ण-

परसवर्णो यथा स्यात् ॥ नैतदस्ति प्रयोजनम् । वक्ष्यत्येतत्—द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम्. इति । यावता सिद्धत्वमुच्यते परसवर्ण एव तावद्भवति ॥ परसवर्णे तर्हि कृते तस्य यग्रहणेन ग्रहणाद् द्विर्वचनं यथा स्यात् । माभूद् द्विर्वचनम् ॥ ननु च भेदो भवति—सति द्विर्वचने त्रियकारकम्, असति द्विर्वचने द्वियकारकम् । नास्ति भेदः । सत्यपि द्विर्वचने द्वियकारकमेव । कथम् ? । 'हलो यमां यमि लोपः' इत्येवमेकस्य लोपेन भवितव्यम् ॥ एवमपि भेदः । सति द्विर्वचने कदाचिद् द्वियकारकम्, कदाचित् त्रियकारकम् । असति द्वियकारकमेव ॥ स एष कथं भेदो न स्यात् ? । यदि नित्यो लोपः स्यात् । विभाषा च स लोपः ॥ यथाऽभेदस्तथास्तु ।

❀ अनुवर्तते विभाषा शरोऽचि यद्वारयत्ययं द्वित्वम् ❀ ११–१

यदयं 'शरोचि' इति द्विर्वचनप्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यो—ऽनुवर्तते विभाषेति ॥ कथं कृत्वा ज्ञापकम् ? ।

सम्पत्तये अन्तस्थानामण्सूपदेश इति । खण्डयति —नैतदस्तीति—'द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम्' (पूर्वत्रासिद्धीयमद्वित्वे) इत्यनेन परसवर्णस्य द्वित्वदृष्ट्या सिद्धत्वे उक्ते द्वित्वात्प्राक् अनुस्वारस्य परसवर्णेन अनुनासिक-यँकारे जाते ततः प्राक् अनुस्वाराभावेन उक्तफलाभाव इति । सिद्धान्ती—अनुनासिक-यँकारस्य यग्रहणेन ग्रहणात् "अनचि च" इति द्विर्वचनसिद्धिः फलम् इत्याशयेनाह–परसवर्णे इति। खण्डयति–माभूद्द्विर्वचनमिति,व्यञ्जना-त्परस्य एकस्यानेकस्य वा (सजातीयव्यञ्जनस्य) उच्चारणे विशेषाभावाद् इत्यर्थः । समाधत्ते–ननु चेति, वैकल्पिकेषु भावपक्षानुष्ठानक्लेशस्य धर्माधिक्य-फलकत्वेन द्वियकारकरूपापेक्षया त्रियकारकरूपे धर्माधिक्यमित्यर्थः । खण्डयति–हलो यमां यमीति लोपस्य नित्यत्वेन द्वित्वोत्तरं द्वित्वनिष्पन्नयकारलोपे कृते त्रियकारकरूपासम्भवाद् इत्यर्थः । सिद्धान्त्येकदेशी लोपस्य वैकल्पिकत्वं साधयति–अनुवर्तते विभाषेत्यादिना । ज्ञापकमाह–'शरोची'ति ।

*** नित्ये हि तस्य लोपे प्रतिषेधार्थो न कश्चित्स्यात् * ११-२**

यदि नित्यो लोपः स्यात्, प्रतिषेधवचनमनर्थकं स्यात्। अस्त्वत्र द्विर्वचनम्, 'झरो झरि सवर्णे' इति लोपो भविष्यति। पश्यति त्वाचार्यः—विभाषा स लोप इति, ततो द्विर्वचनप्रतिषेधं शास्ति। नैतदस्ति ज्ञापकम्। नित्येऽपि तस्य लोपे स प्रतिषेधोऽवश्यं वक्तव्यः। यदेतद् 'अचो' रहाभ्याम् इति द्विर्वचनं लोपापवादः स विज्ञायते।

अयं भावः-'हलो यमां यमी'त्यस्य नित्यत्वे (हलोयमामित्यत्र 'झयो ह' इत्यतोऽन्यतरस्यां ग्रहणानुवृत्त्यभावे इत्यर्थः) झरो झरीत्यत्रापि विकल्पासम्बन्धात् तस्यापि नित्यत्वे कर्षति वर्षतीत्यादौ 'अचो रहाभ्या'मित्यनेन षकारस्य द्वित्वेऽपि एकस्य 'झरो झरी'त्यनेन नित्ये लोपे द्विषकाररूपाप्रसङ्गात् तद्वारणाय "शरोऽचि" इति निषेधो व्यर्थः। व्यर्थश्च सामर्थ्यमूलकं 'हलो यमां' 'झरो झरि' इति सूत्रद्वये 'अन्यतरस्यां' ग्रहणानुवृत्तिं' ज्ञापयति, तथा च कर्षतीत्यादौ षकारस्य 'अचो रहे'ति द्वित्वे 'झरो झरी'त्यस्य वैकल्पिकत्वादभावे द्विषकाररूपापत्तिः। तद्वारणाय 'शरोची'ति स्वांशे चरितार्थम्। शरतिरिक्ते संयन्ता कृष्णर्द्धिः इत्यादौ त्रियकारकादिरूपसिद्धिः ज्ञापन फलमिति।

खण्डयति—**नैतदस्ति ज्ञापकमिति**, अयं भावः-'हलो यमां' 'झरो झरी'त्यनयो र्नित्यत्वे यत्र यत्र 'अचोरहाभ्या' मित्यनेन द्वित्वं तत्र तत्र आभ्यां लोपे 'अचो रहाभ्या'मिति सूत्रप्रणयनं व्यर्थमेव, यम्-झर्भ्यामतिरिक्तस्य यरोऽभावात्। तथा च निरवकाशं 'अचोरहाभ्या'मिति द्वित्वं स्वविषये तौ लोपौ प्रति अपवादत्वेन प्रतिबध्नीयात्। लोपयोस्तु 'अचो रहे'ति द्वित्वाप्राप्तियोग्ये स्वतः सिद्धत्रिव्यञ्जनसंयोगे चारितार्थ्यं सम्भवति, यथा—आदित्य-शब्दात् देवतार्थे—'दित्यदित्यादित्ये' ति ण्यप्रत्यये 'यस्येति' लोपे आदित् य् य इत्यादौ 'हलोयमा'मित्यस्य चारितार्थ्यम्। तथा प्रपूर्वक-दा-धातोः क्तप्रत्यये "अच उपसर्गात्तः" इत्यनेन दा-धातोः आकारस्य तकारादेशे पूर्वस्य चर्त्वे प्र त्

कथम् ? । यर इत्युच्यते । एतावन्तश्च यरः । यदुत झरो वा यमो वा । यदि चात्र लोपः स्याद् द्विर्वचनमनर्थकं स्यात् । किं तर्हि तयो र्योगयो-रुदाहरणम् ? । यदकृते द्विर्वचने त्रिव्यञ्जनः संयोगः—प्रत्तम्, अवत्तम्, आदित्यः । इहेदानीं कर्त्ता हर्त्तेति द्विर्वचनसामर्थ्याल्लोपो न भवति । यथेह द्विर्वचनसामर्थ्याल्लोपो न भवति, एवमिहापि लोपो न स्यात्-कर्षति वर्षतीति । तस्मान्नित्येऽपि लोपेऽवश्यं स प्रतिषेधो वक्तव्यः । तदेतदत्यन्तं संदिग्धं वर्त्तते—आचार्याणां विभाषानुवर्त्तते न वेति ॥५॥

(द्विर्णकारानुबन्धासञ्जनफलाधि०)

लण् ॥ ६ ॥

अयं णकारो द्विरनुबध्यते-पूर्वश्चैव परश्च, तत्राण्ग्रहणेष्विण्ग्रहणेषु च संदेहो भवति, पूर्वेण वा स्युः, परेण वेति । कतमस्मिंस्तावदण्ग्रहणे संदेहः ? ॥ "ढ्लोपे पूर्वस्य दीर्घोऽणः" इति ।

त् त इत्यादौ 'झरो झरी'त्यस्य चारितार्थ्यम् । तथा च 'अचो रहाभ्या'मिति द्वित्वविषये लोपयोः तक्रन्यायेनाप्रवृत्त्या कर्षतीत्यादौ द्वित्वे द्विषकारकरूपापत्तिः तद्वारणाय 'शरोची'त्यस्यावश्यकत्वेन वैयर्थ्यमूलकविकल्पानुवृत्तिज्ञापकत्वाऽसंभव इति ।

'तदेतदत्यन्तं संदिग्ध'मिति, तथा च ज्ञापकेन अस्य वैकल्पिकत्वं न सिद्धयति, किन्तु 'लण्' सूत्रे "विभाषा च स लोपः, इत्यादि पूर्वाचार्यव्याख्यान-परम्परावशात् वैकल्पिकत्वं लोपस्य निर्णेयम्" । तथा च संयन्ता इत्यादौ अनुनासिकयँकारादेः यरादिप्रत्याहारेण ग्रहणमिति अन्तःस्थानां अणसूपदेशस्य फलं सिद्धम् । तदर्थं "हण्" "यवरलट्" इति न्यासः कर्तुमशक्य इति सिद्धम् ।

'अइउण्, लण्' इति सूत्रद्वये णकारानुबन्धासञ्जनेन अण्ग्रहणेषु प्रत्यासत्तिन्यायेन त्रयाणां बोधः, उत व्याप्तिन्यायेन चतुर्दशानां बोधः, इति सन्देहात् शास्त्रस्याननुष्ठापकत्वलक्षणाऽप्रामाण्यम्-इत्याशङ्क्य परिहरति-अयं णकार इत्यादिना । संदेहस्थलं प्रदर्शयति "ढ्लोपे" इत्यादि । "ढ्लोपे पूर्वस्य

* (असंदिग्धम्) * १२—१

असंदिग्धम् पूर्वेण न परेण। कुत एतत् ?।

* पराभावात् * १२—२

नहि ढ्लोपे परेऽणः सन्ति। ननु चायमस्ति-आतृढ आवृढ इति। एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण। यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात्। 'ढ्लोपे पूर्वस्य दीर्घोऽचः' इत्येव ब्रूयात्। अथवैतदपि न ब्रूयाद् अचो ह्येतद् भवति-ह्रस्वो दीर्घः प्लुत इति।

अस्मिंस्तर्ह्यण्ग्रहणे संदेहः—'केऽणः' इति। असंदिग्धं पूर्वेण, न परेण। कुत एतत् ?। पराभावात्। नहि के परेऽणः सन्ति। ननु चायमस्ति-गोका नौकेति। एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण। यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात्। 'केऽचः' इत्येव ब्रूयात्। अथवैतदपि न ब्रूयात्। अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति।

अस्मिंस्तर्ह्यण्ग्रहणे संदेहः—'अणोऽप्रगृह्यस्यानुनासिकः' इति। असंदिग्धं पूर्वेण, न परेण। कुत एतत ?। पराभावात्- नहि पदान्ताः परेऽणः सन्ति। ननु चायमस्ति-कर्तृ हर्तृ इति। एवं तर्हि सामर्थ्यातपूर्वेण,

---

दीर्घोऽणः'' ''केऽणः'' इति, आभ्यां सूत्राभ्यां दीर्घ-ह्रस्वयोः विधीयमानत्वात् 'अचश्च' इति परिभाषया 'अच' इति षष्ठ्यन्तस्य उपस्थितौ तस्यैव-ह्रस्वदीर्घ-विधानेन हलां ह्रस्वदीर्घाप्राप्त्या पुनः तयोः सूत्रयोः अण्ग्रहणसामर्थ्याद् अण् पूर्वणाकारेणैवेति निश्चीयते। तथा च " आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी " इति न्यायात् सामर्थ्यविशेषेण निर्णये सन्देहाभाव इति भावः। एवम् " अणोऽप्रगृह्यस्यानुनासिक " इत्यत्र 'अप्रगृह्यस्य' इति पर्युदासबलात् 'अच' एव अनुनासिक इति सिद्धे पुनरण्ग्रहणसामर्थ्यादण् पूर्वेणैवेति निश्चीयते। 'न पदान्ताः परेऽणः सन्ती'ति—परे इत्यस्य अचामपेक्षया परे इत्यर्थः। पदान्ताः इत्यस्य पदान्तकार्यभाज इत्यर्थः। तेन कमलमाचष्टे वृक्षव्यमाचष्टे इत्यर्थे कमल, वृक्षवी-शब्दाभ्यां णि

न परेण। यदि हि परेण स्याद्, अण्ग्रहणमनर्थकं स्याद् 'अचोऽप्रगृह्यस्यानुनासिकः' इत्येव ब्रूयात्। अथैतदपि न ब्रूयात्, अच एव हि प्रगृह्या भवन्ति।

अस्तिसर्वण्ग्रहणे संदेहः—'उरण् रपरः' असंदिग्धं पूर्वेण, न परेण। कुत एतत्?। पराभावात्। न ह्युः स्थाने परेऽणः सन्ति। ननु चायमस्ति= कर्त्रर्थं हर्त्रर्थमिति। किं च स्याद् यद्यत्र रपरत्वं स्यात्? ॥ द्वयो रेफयोः श्रवणं प्रसज्येत ॥ 'हलो यमां यमि लोपः' इत्येवमेकस्यात्र लोपो भविष्यतीति ॥ विभाषा स लोपः' विभाषा श्रवणं प्रसज्येत। अयं तर्हि नित्यो लोपः 'रो रि' इति ॥ पदान्तस्येत्येवं सः। न शक्यः स पदान्तस्येत्येवं विज्ञातुम्। इह हि लोपो न स्यात्-जर्गृधेर्लङ् अजर्घाः पास्पर्द्धेः अपास्पाः इति ॥

इह तर्हि मातॄणां पितॄणामिति रपरत्वं प्रसज्येत। आचार्यप्रवृत्तिर्ज्ञा-

---

जन्ताभ्यां क्रमेण क्विपि विचि च निष्पन्नयोः कमल् वृत्व्, इत्यनयोः पदान्त-लकार-वकार-सत्वेऽपि न दोषः।

चतुर्थं संदेहस्थलमाह "उरण् रपर" इति—कर्त्रर्थं हर्त्रर्थमिति कर्तृ अर्थ इति स्थिते 'इको यणऽचि' इति जायमानो यण्रूपो रेफः अनेन रपरः स्यात्। 'हलो यमां यमी'त्यस्य वैकल्पिकत्वेन पक्षे रेफद्वयश्रवणप्रसङ्गे पूर्वपक्षिणा उक्ते 'रोरी'ति लोपेन तस्याश्रवणं सिद्धान्ती साधयति अयं—तर्हीति। 'रोरी'त्यस्य "समः सुटि" "नॄन्पे" इत्यादि सूत्रसाहचर्यात् पदान्ते प्रवृत्तिमाशङ्क्य अजर्घा इत्यादौ अपदान्तस्य दीर्घाप्राप्त्या वारयति-'न शक्य इति, अजर्घा इति गृधेर्यङ् लुकि अभ्यासस्य रुगागमे लङि सिपि अटि शब्लुकि गुणे रपरे, हल्ङ्यादिलोप-भष् भाव-जश्त्वेषु कृतेषु अजर्घर्द् इति स्थिते 'दश्चे'ति रुत्वे 'रो री'ति लोपे 'ढ्रलोपे' इति दीर्घे अस्य सिद्धिः। एवं स्पर्ध संघर्षे इत्यस्य यङ्लुकि लङि सिपि अपास्पाः इति।

'उरण् रपर' इत्यस्य प्रवृत्तियोग्यं पर-अण्घटितं स्थलं प्रदर्शयति 'इह तर्हि मातॄणामित्यादि। 'नामी'त्यनेन ऋकारस्य स्थाने जायमाने

पश्यति—नात्र रपरत्वं भवतीति । यदयम् ' ऋत इद्धातोः ' इति धातुग्रहणं करोति । कथं कृत्वा ज्ञापकम् ? । धातुग्रहणस्यैतत्प्रयोजनम्-इह मा भूत्-मातॄणां पितॄणामिति । यदि चात्र रपरत्वं स्याद्धातुग्रहण-मनर्थकं स्यात् । रपरत्वे कृते अनन्त्यत्वादित्वं न भविष्यति । पश्यति त्वाचार्यो-नात्र रपरत्वं भवतीति, ततो धातुग्रहणं करोति ॥ इहापि तर्हि न प्राप्नोति-चिकीर्षति जिहीर्षतीति ॥ माभूदेवम् । ' उपधायाश्च ' इत्येवं भविष्यति । इहापि तर्हि प्राप्नोति —मातॄणां पितॄणामिति ॥ तस्मात्तत्र धातुग्रहणं कर्तव्यम् ॥ एवं तर्हि—सामर्थ्यात्पूर्वेण, न परेण । यदि परेण स्याद् अण्ग्रहणमनर्थकं स्यात् 'उरञ्परः' इत्येव ब्रूयात् ॥

दीर्घो रपरः प्रसज्यते, तं ज्ञापकेन वारयति ' ॠत इद्धातो ' रिति। यदि हि मातॄणामित्यादौ रपरत्वं स्यात्, तदा रेफान्तत्वेन ॠकारान्तत्वाभावाद् इत्वस्या प्राप्तौ धातुग्रहणं व्यर्थमेव स्यात्, तत्सामर्थ्याच्च अधात्ववयवे ऋकारे जायमानो दीर्घो रपरो न भवतीति कल्प्यते, इति । नन्वेवं कृधातोः सनि " अ-ज्झनगमे'ति दीर्घो जायमानो अधात्ववयव—ऋकारस्थानिकादेशाभावाद रपरः स्यात्, तथा च कॄ र् स इत्यवस्थायां ॠकारान्तत्वाभावात् ' ॠत इद्धातोः ' इति इत्वं न प्राप्नोति, तथा च चिकीर्षतीत्यस्यासिद्धिः, इत्या-शयवानाह—**इहापि तर्हीति** । खण्डयति—**मा भूदेवम् "उपधायाश्च" इत्येवं भविष्यतीति** । एवं सति मातॄणामित्यादौ रपरत्वे सति ' उपधायाश्चे 'त्यनेन प्राप्तमित्वं धातुग्रहणेन वारणीयमिति धातुग्रहणस्य चारितार्थ्ये सम्भवति तेन धातुग्रहणेन वैयर्थ्याभावाद् 'अधात्ववयव—ऋकारादेशोऽण् रपरो न भवति' इति पूर्वोक्तज्ञापनासम्भवाद् मातॄणामित्यादौ रपरत्वापत्तिः तदवस्थैव, तद्वारणायाह—**एवं तर्हि सामर्थ्यात् पूर्वेणेति** । अयं भावः-यदि मातॄणामित्यादै रपरत्वमिष्टं तर्हि ' उरज् रपरः ' इति न्यासेन सिद्धे पुनः ' अण् ' ग्रहण सामर्थ्यात् पूर्वेणेति निश्चीयते । कर्त्रर्थमित्यादौ रेफादेशस्य रपरत्वे 'रोरी'ति लोपः उक्त एव । अन्यस्तु ऋकारस्य स्थाने हलादेशोऽण् नास्त्येवेत्यर्थः ।

अस्मिँस्तर्ह्यण्ग्रहणे संदेहः—'अणुदित्सवर्णस्य चाप्रत्ययः' इति । असंदिग्धं परेण, न पूर्वेण ॥ कुत एतत् ? ।

* सवर्णेऽण् तु परं ह्युर्ऋत् * १२-३

यदयम् 'उर्ऋत्' इत्यृकारे तपरकरणं करोति । तज्ज्ञापयत्याचार्यः- परेण, न पूर्वेणेति ॥

इण्ग्रहणेषु तर्हि संदेहः ॥ असंदिग्धं परेण, न पूर्वेण ॥ कुत एतत् ? ॥

* य्वोरन्यत्र परेणेण् स्यात् * १२—४

पञ्चमं सन्देहस्थलमाह 'अणुदि' दिति 'अत्रापि "उर्ऋत्" इति ज्ञापकात् परणकारेण प्रत्याहार इति निश्चय इत्याह—'**सवर्णे अण् तु परं ह्युर्ऋत्**'। अयं भावः-"उर्ऋदि"ति सूत्रे तपरकरणं चुरादिण्यन्तात् कृत संशब्दने इति धातो लुङि चङि अचीकृतदित्यत्र दीर्घस्य ॠकारस्य स्थाने ह्रस्व एव यथा स्यात् अचीकृतत् इत्यादिवत्, इत्येतदर्थं कृतम् । 'अणुदित्' सूत्रे पूर्वेण अण्ग्रहणे तु उद्देश्यबोधकेन 'उः' इत्यनेन, विधेयबोधकेन 'ऋत्' इत्यनेन च अनण्त्वात् दीर्घकारस्य अग्रहणेन तस्य (दीर्घकारस्य) कॄतधातुस्थस्य न स्थानित्वम्. न वा तादृशस्य आदेशत्वं प्राप्तम्, इति दीर्घवारणार्थं कृतं तपरकरणं व्यर्थं सत् 'अणुदि'त्सूत्रे अण् ग्रहणं परणकारेणेति ज्ञापयति, तथा च दीर्घकारस्य स्थानित्वमादेशत्वं च प्रसक्तम् । तत्र आदेशे दीर्घवारणाय तपरकरणं स्वांशे चरितार्थमिति ।

एवं च अणुदित्सूत्रे ज्ञापकवशात् णकारांशे व्याप्तिन्यायः, अन्यत्राण् ग्रहणेषु प्रत्यासत्तिन्याय इति निश्चितम् ।

इदानीम् इण्ग्रहणे सन्देहमाह—'**इण् ग्रहणेषु**' इति, अत्रापि ज्ञापकवशात् निर्णयमाह-'**परेणेति**' ज्ञापकमाह-य्वोरन्यत्रेति, अयं भावः— "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" इति सूत्रे इकारोकारबोधार्थं "य्वोः" इति सार्धत्रिमात्रात्मकं पदमुपात्तम् । पूर्वणकारेण इण्प्रत्याहारे सम्भवति तु इण इति सार्धमात्राद्वयात्मकेन लघुना पदेन सिद्धे पूर्वोक्तगुरुभूतपदोच्चारणं

यत्रेच्छति पूर्वेण, संसृष्य ग्रहणं तत्र करोति–यञोरिति । तच्च गुरु भवति ॥ कथं कृत्वा ज्ञापकम् ? । तत्र विभक्तिनिर्देशे संसृष्य ग्रहणे चार्द्धचतस्रो मात्राः । प्रत्याहारग्रहणे पुनस्तिस्रो मात्राः । सोऽयमेवं लघीयसा न्यासेन सिद्धे सति यद् गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यः-परेण, न पूर्वेणेति ॥ किं पुनर्वर्णोत्सत्ताविवायं णकारो द्विरनुबध्यते ? ।

* व्याख्यानाच्च द्विरुक्तितः * १२—५

एतज्ज्ञापयत्याचार्यो–भवत्येषा परिभाषा ' व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम् ' इति । ' अणुदित्सवर्णस्य ' इत्येतत्परिहाय पूर्वेणाण्ग्रहणम्, परेणाण्ग्रहणम् इति व्याख्यास्यामः ॥ ६ ॥

व्यर्थं स्यात् । तत्सामर्थ्याच्च इण् सर्वत्र परणकारेणेति निश्चीयते । इति । भाष्ये 'अर्धचतस्र' इत्यस्य अर्धेन चतस्र इति व्युत्पत्त्या सार्धास्तिस्रो मात्रा इत्यर्थः । 'तिस्रो मात्रा' इति, इणस् इति षष्ठ्यन्तस्येत्यर्थः "इण इयङुवङौ" इति संहितापाठे तु सार्धमात्राद्वयमेवेत्यर्थः ।

ननु अन्येषु वर्णेषु सत्सु णकारस्यैव वारद्वयमनुबन्धस्यासञ्जनं संदेह कारणीभूतं किमर्थं महेश्वरेण कृतम् । इत्याशङ्क्य "व्याख्यानतो विशेषप्रतिपत्तिः" इति परिभाषाज्ञापनार्थं तत्, इति उत्तरयति 'व्याख्यानाच्च द्विरुक्तितः' इति । द्विरुक्तितः–णकारस्य द्विरुच्चारणेन, व्याख्यानात्, चकारेण न्यायादिति संगृह्यते, न्यायश्च ज्ञापकसामर्थ्यान्यतररूपः । व्याख्यानात्-उपदेशपरंपरारूपात् । तथा च व्याख्यानान्न्यायाच्च शब्दशक्तिर्निर्धारणीयेत्यर्थः।'व्याख्यानत इति' विशेषस्य–अन्यतराद्यर्थरूपस्य प्रतिपत्ति–र्निश्चयः व्याख्यानात्–आचार्यपरम्पराप्राप्तव्याख्यानेन भवतीत्यर्थः । सन्देहात्–श्रोतृणां सन्देहमात्रेण शास्त्रम् अलक्षणम्–अननुष्ठापकं लक्षणं (शास्त्रम्) अलक्षणं, तथा न भवति असंदिग्धानुष्ठानसिद्ध्यर्थं प्रवृत्तेऽस्मिन् शास्त्रे संदिग्धोच्चारणरूपमहेश्वरव्यवहारेण संदेहनिवृत्तिर्व्याख्यानेनैव करणीया नान्योपायेनेति नियम्यते इति भावः ।

(ञमञ् इति पृथग्योगफलाभावाधि०)

ञमङणनम् ॥ ७ ॥ झभञ् ॥ ८ ॥

किमर्थमिमौ मुखनासिकावचनावुभावनुबध्येते, न ञकार एवानुबध्येत ? कथं—यानि मकारेण ग्रहणानि ? । सन्तु ञकारेण । कथं— 'हलो यमां यमि लोपः' इति । अस्तु ञकारेण । 'हलो यञां यञि लोप' इति । नैवं शक्यम् । झकारभकारपरयोरपि झकारभकारयोर्लोपः प्रसज्येत । न झकारभकारौ झकारभकारयोः स्तः । कथं—'पुमः खय्यम्परे' इति ? । एतदप्यस्तु ञकारेण 'पुमःखय्यञ्परे' इति ? । नैवं शक्यम् । झकारभकारपरेऽपि हि खयि रुः प्रसज्येत । न झकारभकारपरः खयस्ति ॥ कथं—'ङमो ह्रस्वादचि ङमुण्नित्यम्' इति । एतदप्यस्तु ञकारेण 'ङञो ह्रस्वादचि ङञुण्नित्यम्' इति । नैवं शक्यम् । झकारभकारयोरपि हि पदान्तयो र्झकारभकारावागमौ स्याताम् ॥ न झकारभकारौ पदान्तौ स्तः । एवमपि पञ्चागमास्त्रय आगमिनो वैषम्यात्संख्यातानुदेशो न प्राप्नोति । सन्तु तावद्येषामागमानामागमिनः सन्ति । झकारभकारौ पदान्तौ न स्त इति कृत्वा आगवामपि न भविष्यतः ॥

(अक्षरपदार्थविचाराधि०)

अथ किमिदमक्षरमिति ।

अङणनम्, झभञ्, इति सूत्रयोः पृथगनुबन्धकरणं विचारयति- **किमर्थमिमाविति** । झकारभकारयोः पदान्ते जश्त्वं, खरि चर्त्वं, झशि च जश्त्वं भविष्यति । अन्येषु हल्षु परेषु झकारभकारयोरसम्भव एव इति मत्वा सर्वत्र समाधानम् । **एवमपि पञ्चागमाः त्रय आगामिन** इति 'ङञो ह्रस्वा' दिति—सूत्रस्य शाब्दबाधकालिकं संख्यासाम्यमादाय पूर्वपक्षी शङ्कते । सिद्धान्ती तु प्रयोगप्रतिपत्तिकालिकं संख्यासाम्यमादाय दोषं वारयति—**सन्त्विति** ।

'अइउण्' सूत्रे '**अक्षरसमाम्नाय**' इति व्यवहारात् यो वा इमा' मिति प्रतीकव्याख्याने पदशः, स्वरशः, अक्षरशः, इत्युक्तेः अक्षरपदार्थं जिज्ञासते- **अथ किमिदमक्षरमिति** । क्षर-धातोः अजन्तस्य नञा समासे सिद्धेन

* 'अक्षरं न क्षरं विद्यात्' * १४—१

न क्षीयते न क्षरतीति वाऽक्षरम् ।

* अश्नोतेर्वा सरोऽक्षरम् * १४—२

अश्नोतेर्वा पुनरयमौणादिकः सरन् प्रत्ययः। अश्नुते इत्यक्षरम् ।

* वर्णं वाहुः पूर्वसूत्रे * १४—३

अथवा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते ।

* किमर्थमुपदिश्यते * १४—४

अथ किमर्थमुपदेशः क्रियते ।

* वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते * १४—५

अक्षरशब्देन नित्यत्वं बोध्यते, तथा "अशू व्याप्तौ" अस्मात् सरन् प्रत्यये व्रश्चेतिषत्व-कुत्व-मूर्धन्येषु अक्षरशब्दसिद्ध्या व्यापकत्वं बोध्यते तथा च वार्तिकश्लोकार्धेन वर्णानां नित्यत्वं व्यापकत्वं च उक्तम् ।

इदानीं योगार्थं परित्यज्य रूढ्या अक्षरशब्दस्य वर्णवाचकता-इत्याह— "वर्णं वाहुः पूर्व सूत्रे" इति । पूर्वेषां सूत्रं पूर्वसूत्रं, पूर्वेषाम् इन्द्रादिव्याकरण-प्रणेतॄणाम् आचार्याणां सूत्रमित्यर्थः । तथा च सूत्रम्— 'वर्णा अक्षराणीति" पूर्वम् अनुबन्धकरणार्थश्च वर्णानामुपदेश इष्टबुद्ध्यर्थश्च इत्यादिना वर्णो-पदेशफले विचारितेऽपि कश्चिद्विशेषं वक्तुं पुनः शङ्कते—किमर्थमुपदिश्यते इति । 'वर्णज्ञानमिति । वर्णा ज्ञायन्तेऽनेनेति करणे ल्युटि—वर्णज्ञापकमित्यर्थः । वाग्विषय इति—वाक् विसीयते आबध्यतेऽनेनेति वाग्विषयः वाचो बन्धन—मपभ्रंशादिपरिहारेण मर्यादीकरणं—चतुर्दशसूत्रीरूपं तन्मूलकाष्टाध्यायीरूपं च शास्त्रमित्यर्थः । काऽसौ वाक्—यस्या मर्यादीकरणमनेन क्रियते इत्याह—'यत्र च ब्रह्म वर्तते' इति, वेदरूपेत्यर्थः, चकाराद्वेदोपबृंहणपुराणेतिहासादिरूपा च । तदर्थमिति—शास्त्रस्याक्षरसमाम्नायरूपस्य वर्णज्ञापकत्व-वाङ्मर्यादाकारकत्वरूप धर्मसत्वात् तत्तद्गुणलाभार्थमित्यर्थः । 'इष्टबुद्ध्यर्थं, लघ्वर्थं चेति' कलादि दोषरहितवर्णज्ञानार्थम्, अनुबन्धासञ्जनद्वारा लाघवेन पाणिनीयशास्त्रप्रवृत्त्यर्थं

सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य

चोपदेश इति वार्तिकार्थः। भाष्ये 'वाक्समाम्नाय' इति वाक्संग्रहोपाय इत्यर्थः। पुष्पितः फलित इति दृष्टफलाभ्युदयसम्पादनेन संजातपुष्पः। अदृष्टफलनिःश्रेयससम्पादनेन च संजातफलः। चन्द्रतारकवत्प्रतिमण्डित इति-चन्द्रतारागणवद् अनादिव्यवहारविषयत्वेन नित्यतया शोभाढ्यः। ब्रह्मराशिरिति ब्रह्मप्रतिपादको वेदराशिरित्यर्थः।

प्रसङ्गात् चतुर्दशसूत्र्या ब्रह्मप्रतिपादकत्वं विव्रियते-"अइउण्" इति अकारः-निर्गुण आत्मा ब्रह्मरूपः इम्-चित्कलां मायाम् (आश्रित्य) उः-सगुणो व्यापकः परमेश्वरः "ण्" आसीत्। अनेन सूत्रेण निर्गुणस्यापि ब्रह्मणः मायाशक्तिद्वारा सगुणत्वं सम्भवतीत्युक्तम्।

"ऋ ऌ क्"-ऋकारः-सगुणः परमेश्वरः, ऌकारं मायावृत्तिं स्वाभिन्नां क् अदर्शयत्, वृत्तिवृत्तिमतोः अभेदात्, शक्तिशक्तिमतोरभेदाच्च परमेश्वर-माया-तद्वृत्तीनां सर्वथा ऐक्यं विलक्षणकार्यपर्यवसायित्वं चानेनोक्तम्, अतएव ऋऌ-वर्णयोस्तादात्म्यमपि वर्ण्यते।

"एओङ्" "ए" इत्यस्य चित्कलाविशिष्टः परमात्मा साक्षी निर्गुण इत्यर्थः, "ओ" इत्यस्य मायाशबलितः सगुणः परमात्मा इत्यर्थः। ङ इत्यस्य ऐक्यमित्यर्थः। अनेन सूत्रेण मायाविशिष्ट-मायोपहित-चैतन्ययोः सगुण-निर्गुणयोः ऐक्यप्रदर्शनेन द्वैतं वास्तविकं नास्ति, अभेद एव वास्तविकः इत्युक्तम्।

"ऐ औच्" "ऐ"इत्यस्य चित्कलाविशिष्टो निर्गुण आत्मा इत्यर्थः, निर्गुणेऽपि साक्षिणि सगुणनानाभावापन्नसाक्ष्यनिरूपितः आरोपितः साक्षित्वरूपो धर्मः साक्ष्यबाहुल्याद् विस्फारितो भवति इति बोधनाय विवृततरभावापन्नयोः आकार-ईकारयोः (आत्मचित्कलयोः) योगे ऐ इति वर्णस्य तद्वाच्यार्थ तादात्म्यापन्नस्य सिद्धिः। एवमौकारेऽपि बोध्यम्। एकारे तु साक्ष्यनानात्वाभावात् तन्निरूपितसाक्षित्वस्य स्फारीभावो नास्ति इति दर्शयितुं तद्घटकयोः ततरत्वं नास्ति। "औ" इत्यस्य सृज्यमानप्राणिकर्मवशेन

स्फारीभूतया ईक्षणरूपमायावृत्या विशिष्टः सगुणः परमेश्वर इत्यर्थः । "च्" उद्युक्त इत्यर्थः । तथा च पूर्वोक्तसाक्षिणा निर्गुणेन अविनाभूतः सगुणः परमेश्वरः जगत्स्रष्टुमाविरासीत् । 'तदैक्षत बहु स्यां प्रजायेय' इति श्रुतेः । एवम् 'अ इ उ ऋ ऌ' इति पञ्चभिर्वर्णैः सम्पूर्णा वर्णसृष्टिः । तथा तत्तादात्म्यापन्नार्थानां च यथासम्भवं बोधः सृष्टिर्वा । ए ओ ऐ औ एभिस्तु 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति श्रुत्यनुसारेण स्रष्टृ-स्रष्टव्ययोरैक्यं प्रदर्शितम्, अत एव इमानि सन्ध्यक्षराणीति गीयन्ते ।

इदानीं सर्गोन्मुखात् परमेश्वरात् सगुणात् सृष्टिं प्रदर्शयति, "हयवरट्" इति । ह इत्यनेन आकाशभूतसृष्टिः । य इत्यनेन वायुभूतम् । व इत्यनेन जलभूतम् । र इत्यनेन तेजोभूतम् । ट् इति सृष्टमित्यर्थः ।

"लण्" इति—ल इत्यनेन पृथ्वीभूतम् ण् आसीत्, लण् इत्यस्य पृथक्करणेन पृथ्वीभूतस्य "अन्नाद्रेतः रेतसः पुरुषः" इति श्रुत्या बीजाङ्कुरन्यायेन सृष्टिचक्रप्रवर्तनायां वैशिष्ट्यमुक्तम् ।

"ञमङणनम्" ञ इति शब्दः । म इति स्पर्शः । ङ इति रूपम् ण इति रसः । न इति गन्धः, म् इति आसीदित्यर्थः । अनेन पञ्चानां महाभूतानां पञ्च गुणा उक्ताः ।

"झभञ्"—झ-इति वागिन्द्रियं, भ इति हस्तौ, ञ इति आविर्भूतम् । "घढधष्"—घ इति पादौ, ढ इति पायु, ध इति उपस्थम्, ष् इति उत्पन्नम् । अनेन सूत्रद्वयेन कर्मेन्द्रियाणामुत्पत्तिरुक्ता ।

"जबगडदश्" ज इति श्रोत्रम्, ब इति त्वक्, ग इति नयनम्, ड इति रसनम्, द इति घ्राणम् । श् इति उत्पादितम् । अनेन ज्ञानेन्द्रियाणां पञ्चानां सृष्टिरुक्ता ।

"खफछठथचटतव्"—ख इति उदानः, फ इति व्यानः, छ इति समानः, ठ इति प्राणः, थ इति अपानः, च इति मनः, ट इति बुद्धिः, त इति अहंकारः । अनेन सूत्रेण प्राणपञ्चकम्, अन्तःकरणत्रयञ्चोक्तम् । "कपय्" क इति प्रकृतिः, प इति पुरुषः, अनेन सूत्रेण वर्गपञ्चकस्य आद्यन्तवर्गयोः

ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते ।

प्रथमाक्षरयोः प्रकृतिपुरुषतादात्म्योक्त्या सर्वेषां तदन्तर्गतानां वर्णानां तदर्थानाञ्च प्रकृतिपुरुषतादात्म्यसूचनात् कारणानन्यत्वं कार्यस्य सूचितम् । 'शषसर्' श इति रजःकार्यं, ष इति तामसम्, स इति सात्विकम्, अनेन सत्वादि गुणत्रयसृष्टिरुक्ता ।

"हल्" ह इति जीवात्मा । अनेन सर्वसृष्ट्यनुस्यूतः कार्यानन्यः कारणी... परमात्मैव जीवरूपेण सर्वत्रानुस्यूत इत्युक्तम् । तथा च श्रुतिः— "सेऽयं देवता ऐक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽऽनुप्रविश्य नामरूपे व्याकरवाणीति" एवं च सर्ववर्णाद्यम्–अकारं" सर्ववर्णान्त्यं 'हकारं' च ...दाय 'अह'मिति जीववाचकस्य शब्दस्य निष्पत्तिप्रदर्शनेन तदर्थस्य जीवस्यापि तेनैव प्रकारेण आरोपितं रूपमिति जानन् पुरुषो जीवत्वं प्रविलापयन् य... स्वरूपसाक्षात्कारेण निश्रेयसभाग् भवतीत्यर्थः । (अत्र सर्वत्र चतुर्दश सू... मनुबन्धानां सामान्य क्रियार्थकत्वेन यथायथं क्रियावाचकत्वमूहनीयम् । ...षां विशेषार्थाभावेन प्रत्याहारेऽपि तेषामग्रहणं सिद्धम्) अनेन च वर्णानां ब्रह्मप्रतिपादकत्व प्रदर्शनेन वर्णोपासनयापि ब्रह्मोपासनसिद्धिः । यथा च—"ब्रह्मैवेदं सर्वमिति श्रुत्या सर्वस्य जगतः परमेश्वरस्वरूपत्वमुक्तम् । तथा "ओंकार एवेदं सर्वम्" इति श्रुत्या शब्दब्रह्मरूपत्वं सर्वस्योक्तम् । तदुपासना प्रकारश्च—

आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे,
द्वे पत्रे षोडशारे द्विदश दशदले द्वादशार्धे चतुष्के ।
वासान्ते बालमध्ये डफ-कठ-सहिते कण्ठमध्ये स्वराणां,
हक्षं तत्वार्थयुक्तं सकलदलयुतं वर्णरूपं नमामि ॥१॥

इत्यादि गुरूपदिष्टमार्गेण बोद्धव्यः । तदाह भाष्ये—"सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवतीति" तथा च हरिः—

इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये प्रथमस्याध्यायस्य
प्रथमे पादे द्वितीयमाह्निकम् ।

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्याना मधिविद्यं प्रकाशते ॥१॥
इदमाद्यं पदस्थानं सिद्धि-सोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥२॥
अत्रातीतविपर्यासः केवलामनुपश्यति । इति

प्ररोचनामाह—मातापितरौ चास्य स्वर्गे लोके र [illegible]येते । इति ।

सच्चिच्चित्यानन्दरूप-नित्यानन्दाख्यसद्गुर [illegible] ।
पर्वतीयस्य चरणद्वन्द्वाऽऽसाञ्जितचेतसा [illegible] ॥
लवपुर्यां प्राच्यमहाविद्यालय-विराजितम् ।
प्रधानाध्यापकपदमध्यासीनेन धीमता ॥ २ ।
मीमांसायुगुले शब्दशास्त्रे तर्केष्वधीतिना ।
भाण्डारिणा माधवेन शास्त्रिणाऽऽरचिता स्फुटा ॥३॥
पातञ्जले महाभाष्ये व्याख्या स्फोटविमर्शिनी ।
भूरि भद्राय भवताच्छब्दब्रह्मविचारिणाम् ॥४॥

इति भाण्डारिकुलोत्पन्न-वेदान्ततत्वनिष्ठ-श्रीहरिशास्त्रितनूजन्मना
श्रीमाधवशास्त्रिणा विरचितायां भाष्यव्याख्यायां स्फोट-
विमर्शिन्यां द्वितीयाह्निकं समाप्तम् ।